Acc 96

प्रथमस्कन्धः १

प्रारंभ०

(14)

भागवत

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

...कारः सर्गः १ पुरुषाद्ब्रह्मादीनामुत्पत्तिर्विसर्गः २ तेषामाधारार्थं विश्रांतिस्थानं ३ स्थितानामभिवृद्धिः पोषणम् ४ पुष्टानामाचारऊतिः ५ तत्रापि सदाचारो मन्वंतरम् ६ विष्णु...
...या ७ विष्णुभक्तानां प्रपंचाभावो निरोधः ८ निरोधो नाम सृष्टानां संहारः स चतुर्विधो नैमित्तिकः प्राकृतिको ब्रह्मलोकांते द्विनायुषो नित्यः प्रतिक्षणं मुक्तिरात्यंतिक इति स्मृतः ॥ निष्प्रपंचानां स्वरू...

...ः९ मुक्तानां ब्रह्मणि स्थितिरूपमाश्रयः १० ॥ २ ॥ श्रीरामप्रथमे

ॐ श्रीगणेशाय नमः ॥ ॐ नमो भगवते वासुदेवाय ॥ ॐ वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि ॥ यस्यास्ते हृद
येसंवित्तंनृसिंहमहंभजे ॥ १ ॥ विश्वसर्गविसर्गादिनवलक्षणलक्षितं ॥ श्रीकृष्णाख्यंपरंधामजगद्धामनमाम
ितत ॥ २ ॥ माधवोमाधवावीशौसर्वसिद्धिविधायकौ ॥ वंदेपरस्परात्मानौपरस्परनतिप्रियौ ॥ ३ ॥ संप्रदा
यानुरोधेनपौर्वापर्यानुसारतः ॥ श्रीभागवतभावार्थदीपिकेयंप्रतन्यते ॥ क्वाहंमंदमतिःक्वेदंमथनंक्षी

रवारिधेः ॥ किंतत्रपरमाणुर्वै यत्रमज्जतिमंदरः ॥ ५ ॥ मूकं
करोतिवाचालंपंगुंलंघयते गिरिम् ॥ यत्कृपातमहंवं
देपरमानंदमाधवम् ॥ ६ ॥ श्रीमद्भागवतंनाम सर्गादि
दशलक्षणम् ॥ महापुराण मत्स्यंचपंचलक्षणमिष्यते
नतुकंद्वादशस्कंधे ॥ दश भिर्लक्षणैर्युक्तंपुराणंतद्वि
दोविदुः ॥ कथितंचविधिर्ब्र ह्मन्महदल्पव्यवस्थयेति
श्रीमद्भागवताभिधः सुर तरुस्ताराङ्कुरः सज्जनिःस्कं
धैर्द्वादशभिस्ततः प्रविल सद्भक्त्यालवालोदयः ॥ १ ॥
द्वात्रिंशत्त्रिशतंचयस्यविलसच्छाखासहस्राण्यलंपर्णान्यष्टदशेष्टदोतिसुलभोवर्वर्तिसर्वोपरि ॥ ९ ॥
ग्रथ्यनानापुराणशास्त्रप्रबंधैः चित्तप्रशांतिमलभमानस्तत्रतत्रापरितुष्यन्नारददोपदेशतः ॥ श्रीमद्भ
गवद्गुणवर्णनप्रधानंश्रीमद्भागवतशास्त्रंप्रारिप्सुः ॥ श्रीवेदव्यासस्तत्प्रतिपाद्यदेवतानुस्मरणलक्ष
णंमंगलमाचरति ॥ जन्माद्यस्येति ॥ १ ॥ ॥ श्रीरामायनमः ॥ राम ॥
राम ॥ ॥ रामायनमः ॥ राम ॥

८

रामः १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मरीचितोये प्रसिद्धा॥ मृदि काचादौ वारिबुद्धिः ५

परं परमेश्वरं धीमहि इति॥ ध्यायेतेर्लिङि छान्दसः प्रयोगो ध्यायेमेत्यर्थः॥ बहुवचनं शिष्याभिप्रायमेवं तमेव स्वरूपतटस्थलक्षणाभ्यामुपलक्षयति तत्र स्वरूपलक्षणं सत्यमिति सत्यत्वे हेतुः यत्र यस्मिन् त्रयाणां मायागुणानां तमोरजःसत्त्वानां सर्गो भूतेन्द्रियदेवतारूपः अमृषा सत्यः यत्सत्यतया मिथ्यासर्गोपि सत्यवत्प्रतीयते॥ तं परं सत्यमित्यर्थः अत्र दृष्टान्तः तेजोवारिमृदां यथा विनिमयो व्यत्ययो ऽन्यस्मिन्नन्यावभासः स यथाधिष्ठानसत्तया सद्वत्प्रतीयत इत्यर्थः॥ तत्र तेजसि वारिबुद्धिः वारिणि च काचादिबुद्धिरित्यादि यथायथमूह्यं॥ यद्वा तस्यैव परमार्थसत्यत्वप्रतिपादनाय तदितरस्य मिथ्यात्वमुक्तं॥ यत्र मृषैव त्रिसर्गो न वस्तुतः सन्निति॥ अनेन प्रतीतमुपाधिसंबंधं वारयति धाम्ना स्वेन सदा निरस्तकुहकं निरस्तकपटं यस्मिंस्तं तटस्थलक्षणमाह॥ जन्मादीति अस्य विश्वस्य जन्मस्थितिभंगं यतो भवति॥ जन्मादीनि तं धीमहीति॥ तत्र हेतुः अन्वयादितरतश्चार्थेषु कार्येषु ... स्वरूपेणान्वयात्

जन्मस्थितिलयकारणं तटस्थलक्षणम्॥२

जन्माद्यस्य यत इति सूत्रं अस्य जगतो जन्मादि जन्मस्थितिभंगं यतः सर्वज्ञात् सर्वशक्तेः कारणाद्भवति तद्ब्रह्मेति वाक्यशेषः॥११

वेदं ब्रह्मेति वेदे

ॐ जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः॥ तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि॥१॥

प्राणन्याय्यं इति॥४ यद्ब्रह्म गच्छति॥४ तादात्म्यमेव प्रतिपद्यते॥४

नैयायिकानामनुमानमाह यद्वेति॥२

यात्॥ अकार्येभ्यः खपुष्पादिभ्यो व्यतिरेकात्॥ यद्वा अन्वयशब्देनानुवृत्तिरितरशब्देन व्यावृत्तिः॥ अनुवृत्तत्वात् सद्रूपं ब्रह्म कारणं मृत्सुवर्णादिवत् व्यावृत्तत्वात् विश्वं कार्यं घटकुंडलादिवदित्यर्थः॥ यद्वा सावयवत्वाद॰ न्वयव्यतिरेकाभ्यां यदस्य जन्मादि तद्यतो भवतीति संबंधः तथा च श्रुतिः॥ यतो वा इमानि भूतानि जायंते येन जातानि जीवंति॥ यत्प्रयंत्यभिसंविशंतीत्याद्या॥ स्मृतिश्च॥ यतः सर्वाणि भूतानि भवंत्यादियुगागमे॥ यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये॥ इत्याद्या तर्हि किं प्रधानं जगत्कारणत्वात् ध्येयमभिप्रेतं नेत्याह अभिज्ञो यस्तं ... स ईक्षत लोकान्नु सृजा इति॥ स इमांल्लोकानसृजतेति श्रुतेः॥ ईक्षितृत्वं ... तर्हि जीवः स्यान्नेत्याह स्वराट् स्वेनैव राजते यः तं स्वतः सिद्धज्ञानमित्यर्थः॥ ॥ वेदान्तिनां॥ प्रधानम्॥ ॥

यत्तद्विदितं प्रधानमचेतनं जगतः कारणं न शक्यं वेदांतेषु ... ईक्षतेर्नाशब्दम् ... सदेव सोम्येदमग्र आसीत् ... तत्तेजोऽसृजत ... प्रधानं जगत्कारणं ... ईक्षते

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ॥ स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १ ॥
हिरण्यगर्भाय विधेम परिचरेम ॥

तर्हि किं ब्रह्मादिवदेव गर्भः ॥ समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ॥ नेत्याह ॥ तेने इत्यादि कवये ब्रह्मणेपि ब्रह्म वे
दं यः तेने प्रकाशितवान् ॥ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ॥ तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षु
र्वै शरणमहं प्रपद्ये इति श्रुतेः ॥ ननु ब्रह्मणोन्यतो वेदाध्ययनमप्रसिद्धं ॥ सत्यं तत्तु हृदा मनसैव ॥ तेने अनेन बुद्धिवृ
त्तिप्रवर्तकत्वेन गायत्र्यर्थो दर्शितः वक्ष्यति हि ॥ प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि स्वलक्ष
णा प्रादुरभूत् किलास्यतः स मे ऋषीणामृषभः प्रसीदतामिति ॥ ननु च ब्रह्मा स्वयमेव सुप्र[illegible]बुद्धन्यायेन वे प्रमिति ५
दमुपलभतां नेत्याह ॥ यत्र यस्मिन् ब्रह्मणि सूरयोपि मुह्यंतीति तस्माद्ब्रह्मणोपि पराधीनज्ञानत्वात् ॥ स्वतः सिद्ध
ज्ञानः परमेश्वर एव जगत्कारणं अतएव सत्यः असतः सत्ताप्रदत्वाच्च परमार्थसत्यः सर्वज्ञत्वेन च निरस्तकुहकः
तं धीमहीति गायत्र्या प्रारंभेणाच गायत्र्याख्यब्रह्मविद्यारूपमेतत्पुराणमिति दर्शितं ॥ यथोक्तं मत्स्यपु
राणे पुराणदानप्रस्तावे ॥ यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः वृत्रासुरवधोपेतं तद्भागवतमिष्यते
लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितं ॥ प्रौष्ठपद्यां पौर्णमास्यां स याति वैष्णवं पदं ॥ अष्टादशसह
स्राणि पुराणं तत्प्रकीर्तितं ॥ पुराणांतरे च ॥ ग्रंथोष्टादशसाहस्रो द्वादशस्कंधसंमितः ॥ हय
ग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा ॥ गायत्र्या च समारंभस्तद्वै भागवतं विदुः ॥ पद्मपुराणे
अंबरीषं प्रति गौतमवचनं ॥ अंबरीष शुकप्रोक्तं नित्यं भागवतं शृणु ॥ पठस्व स्वमुखेनैव
नापि यदीच्छसि भवक्षयमिति ॥ अतएव भागवतं नाम[illegible]द[illegible]पि न शंकनी
यं ॥ इदानीं श्रोतृप्रवर्तनाय श्रीभागवतस्य कांडत्रयविषयेभ्यः
अभिप्रायतः ॥ सर्वशास्त्रेभ्यः श्रेष्ठत्वं द[illegible]र्शयति ध
र्म इति ॥ २ ॥॥

अश्वग्रीवेन द धीचा अश्विभ्यां यद्ब्रह्मोपदिष्टं सैव हयग्रीवब्रह्मविद्या

न्य[illegible] पि पुरा णमस्तीत्यन

राम: २

अत्र श्रीमति सुन्दरे श्रीभागवते परमो धर्मो निरूप्यते परमत्वे हेतुः प्रकर्षेण उज्झितं कैतवं फलाभिसंधिलक्षणं कपटं यस्मिन् सः प्रशब्देन मोक्षाभिसंधिरपि निरस्तः केवलमीश्वराराधनलक्षणो धर्मो निरूप्यत इति अधिकारितो पि धर्मस्य परमत्वमाह निर्मत्सराणां परोत्कर्षासहनं मत्सरः तद्रहितानां सतां भूतानुकंपिनामेवं कर्मकाण्डविषयेभ्यः शास्त्रेभ्यः श्रैष्ठ्यमुक्तं ज्ञानकाण्डविषयेभ्यो शास्त्रेभ्यः श्रैष्ठ्यमाह वेद्यमिति वास्तवं परमार्थभूतं वस्तु वेद्यं न तु वैशेषिकादीनामिव द्रव्यगुणादिरूपं यद्वा वास्तवशब्देन वस्तुनोंऽशो जीवः वस्तुनः शक्तिर्माया च वस्तुनः कार्यं जगच्च तत्सर्वं वस्त्वेव न ततः पृथगिति वेद्यमयत्नेनैव ज्ञातव्यं च ततः किमत आह शिवदं परमसुखदं किं च आध्यात्मिकादितापत्रयोन्मूलनं च अनेन ज्ञानकाण्डविषयेभ्यः श्रैष्ठ्यं दर्शितं कर्तृतोपि श्रैष्ठ्यमाह महामुनिः श्रीनारायणः तेन प्रथमं संक्षेपतः कृते देवताकाण्डगतेभ्यः श्रैष्ठ्यमाह परैः शास्त्रैस्तदुक्तैः साधनैर्वा

आध्यात्मिकं द्विविधं शारीरं मानसं च शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तं मानसं कामक्रोधलोभमोहईर्ष्याविषादविषयविशेषादर्शननिबंधनं आधिभौतिकं मानुषपशुपक्षिसरीसृपस्थावरनिमित्तं आधिदैवतं यक्षराक्षसविनायकग्रहाद्यावेशनिबंधनम्॥७॥

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनं श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्॥२॥ निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतं पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः॥३॥

ईश्वरो हृदि किं सद्य एव अवरुध्यते स्थिरीक्रियते वा अपरैः कदाचित् किं तु विलंबेन कथंचिद्देवैः अत्र शुश्रूषुभिः श्रोतुमिच्छद्भिरेव तत्क्षणादेवावरुध्यते इदमेव तर्हि किमिति सर्वे न शृण्वंति तत्राह कृतिभिरिति श्रवणेच्छा तु पुण्यैर्विना नोत्पद्यत इत्यर्थः तस्मादत्र काण्डत्रयार्थस्यापि यथावन्निरूपणादिदमेव सर्वशास्त्रेभ्यः श्रेष्ठं अतो नित्यमेतदेव श्रोतव्यमिति भावः॥२॥ इदानीं तु न केवलं सर्वशास्त्रेभ्यः श्रेष्ठत्वादस्य श्रवणं विधीयते अपि तु सर्वशास्त्रफलरूपमिदं अतः परमादरेण सेव्यमित्यर्थः निगमेति निगमो वेदः स एव कल्पतरुः सर्वपुरुषार्थोपायत्वात् तस्य फलमिदं भागवतं नाम तत्तु वैकुण्ठगतं नारदेनानीय मह्यं दत्तमिति मया च शुकस्य मुखे निहितं तच्च तन्मुखाद्भुवि गलितं शिष्यप्रशिष्यादिरूपपल्लवपरंपरया शनैरखंडमेवावतीर्णं न तूच्चनिपातेन स्फुटितमित्यर्थः॥ ॥ ॥

तेन ब्रह्मणो दत्तं व्यासाय२
तेन नारदाय दत्तं२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा ग प्री कु एतच्च भविष्यदपि भूतवन्निर्दिष्टं मनोगतात्वाख्यानेनैवास्य शास्त्रस्य प्रहृष्टत्वे ॥ तेषुवाम्रततूपेण [illegible] तल्लोके
हि शुकमुखस्पृष्टं फलममृतमिव स्वादु भवतीति प्रसिद्धं ॥ अत्र शुको मुनिः अमृतं परमानंदः स एव द्रवो रसः रसो वै स
ः रसं ह्येवायं लब्ध्वानंदी भवतीति श्रुतेः ॥ अतः हे रसिकाः रसज्ञाः तत्रापि भावुकाः हे रसविशेषभावनाचतुराः ॥ अ
हो भुवि गलितमिति ॥ अलभ्यलाभोक्तिः इदं भागवतं नाम फलं मुहुः ॥ पिबत ननु त्वगस्थ्यादिकं विहाय फलाद्रसः न ४
दसं ५ पीयते कथं फलमेव पातव्यं तत्राह रसं रूपं ॥ अतः त्वगस्थ्यादिहेयस्याभावात्फलमेव कृत्स्नं पिबत ॥ अत्र च रसता
दात्म्यविवक्षया रसवत्तस्य विवक्षितत्वात् गुणवचनेपि रसशब्दे मतुपः ॥ लोपाभावात् ॥ तेन विनैव रसं [illegible]
ति सामानाधिकरण्यं ॥ नत्र फलमित्युक्ते पानासंभवो हेयांशप्रसक्तिश्च भवेदिति तन्निवृत्त्यर्थं रसमित्युक्तं ॥ रसमि
स्यए त्युक्तेपि गलितं रसस्य पातुमशक्यत्वात् [illegible] फलमित्युक्तं [illegible] नामामृतपानेमोः
तुपिच्यान्यमित्याह ॥ आलयं लयो मोक्षः [illegible] रसेत्यन्ते
कि न सेव्यमपूर्वं [illegible] ॥ आत्मारामा [illegible] देव [illegible]

नैमिषेनिमिषक्षेत्रे ऋषयः शौनकादयः सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥ ४ ॥

तदेवमनेन श्लोकत्रयेण [illegible] देवतानमस्कारणपूर्वकं [illegible] जनादेसलयाधिकारिणं वृषिशः वि २
श्रोतृत्वे सम्बोधनेन [illegible] नैमिषे इति [illegible] विस्तरेणावक्तव्यानेमिषिप्रीयंते ऊर्गीभव
ति यज्ञनेमिः [illegible] नैमिषं तथा च वायवीये एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते ॥ यत्रास्य शीर्यते नेमिः स देशः
तपसः शुभः ॥ इत्युक्त्वा सूर्यसंकाशं चक्रं सृष्ट्वा मनोमयं प्रणिपत्य महादेवं विससर्ज पितामहः ॥ तेपि हृष्टतरा विप्राः प्रणम्य
जगतां प्रभुं ॥ प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्यशीर्यत ॥ तद्वनं तेन विख्यातं नैमिषं मुनिपूजितमिति ॥ नैमिषे इति पाठे वराहपु
राणोक्तं द्रष्टव्यं ॥ तथा हि गौरमुखमृषिं प्रति श्रीभगवद्वाक्यं ॥ एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा ॥ उवाच निमिषेणेदं
निहतं दानवं बलं ॥ अरण्येस्मिंस्ततस्त्वेवं नैमिषारण्यसंज्ञितं ॥ भविष्यति यथार्थं वै ब्राह्मणानां विशेषकमिति ॥ अनिमिष
श्रीविष्णुरत्र प्रवृत्तत्वात् तस्य क्षेत्रे तथा चा [illegible] शौनकादिः [illegible] ॥ स्वर्गाय हरिः
न २ स एव लोकः भक्तानां निवासस्थानं [illegible] ॥ सहस्रसमाः [illegible] यस्य [illegible] न २
कर्मणि हि प्रवृत्त [illegible] ॥ यद्वा आसत ऊर्ध्वं [illegible] उपयंतीत्यादि [illegible] आचार्य [illegible]
दीर्घत्वं सर्वविदितत्वात् ॥ ४ ॥ रामः

श्रास ।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रातः काले हुताः पावका हुताग्नयो यैस्ते अनेन नित्यनैमित्तिकहोमकालस्यं दर्शितं ॥ इदं वक्ष्यमाणं आदरात्पप्रच्छुः ॥५॥ विविदि(षि)तानर्थान् प्रस्तौति सूतस्य सर्वशास्त्रज्ञतामाविष्करोति ॥ त्वयेति त्रिभिः श्लोकैः ॥ इतिहासः महाभारतादिः तत्सहितानि न केवलमधीतानि ॥ अपि तु आख्यातान्यपि व्याख्यातानि च ॥ उत अपि यानि धर्मशास्त्राणि तान्यपि ॥ किंच यानीत्यादि विदां विदुषां मध्ये श्रेष्ठः व्यासः यानि वेद परावरे सगुणनिर्गुणे ब्रह्मणी विदं

त एकदा तु मुनयः प्रातर्हुतहुताग्नयः ॥ सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात् ॥५॥ ऋषय ऊचुः
त्वया खलु पुराणानि सेतिहासानि चानघ ॥ आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत ॥६॥ या
नि वेद विदां श्रेष्ठो भगवान्बादरायणः ॥ अन्ये च मुनयः सूत परावरविदो विदुः ॥७॥ वेत्थ त्वं सौम्य तत्स
र्वं तत्त्वतस्तदनुग्रहात् ॥ ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥८॥ तत्र तत्रांजसायुष्म
न्भवता यद्विनिश्चितं ॥ पुंसामेकांततः श्रेयः तन्नः शंसितुमर्हसि ॥९॥ प्रायेणाल्पायुषः सभ्य सा(धी)
कलावस्मिन्युगे जनाः ॥ मंदाः सुमंदमतयो मंदभाग्या ह्युपद्रुताः ॥ भूरीणि भूरिकर्माणि श्रोत
व्यानि विभागशः ॥ अतः साधोऽत्र यत्सारं समुद्धृत्य मनीषया ॥११॥ ब्रूहि नः श्रद्दधानानां येनात्मा
सुप्रसीदति ॥ सूत जानासि भद्रं ते भगवान्सात्वतां पतिः ॥१२॥ उद्धृतवचनेन

भगवान्

तीति तथा ॥७॥ वेत्थ जानासि सौम्य हे साधो तेन तत्तदनुग्रहात् ॥ तद्वचनो जाने दृष्टमाह ॥ ब्रूयुरिति ॥ स्निग्धस्य
प्रेमवतः ॥ उत एव रहस्यमपि ब्रूयुरेव ॥८॥ अंजसा सांप्रतं विनिश्चितं एकांततः श्रेयः ॥ अभिवांछितं श्रेयः साध
नं ॥९॥ अन्यैस्तु बहुना कालेन बहुशास्त्रश्रवणादिभिर्विनिश्चयं शक्यं इति त्वं तु तेन प्राज्ञः प्रायेणेति ॥१०॥११॥१२॥ व्या २

श्री॰ भा॰ प्रदी॰ ध

हे सभ्य साधो अस्मिन्युगे कलौ अल्पायुषो जनाः ॥ तत्रापि मंदा अलसाः तत्रापि सुमंदमतयः तत्रापि मंदभाग्या विघ्ना
कुला उपद्रुता रोगादिभिः नच बहुशास्त्रश्रवणेपि तावतैव फलसिद्धिरित्याह ॥ भूरीणि कर्माण्यनुष्ठेयानि
येषु तानि समुद्धृत्य यथा बुद्ध्या येन येनो हृत्स्ववचने आत्मा बुद्धिः संप्रसीदति सम्यगुपशमं याति प्रश्नांतरं सूत जा
नासि इति षड्भिः भद्रं ते इत्यात्मवक्त्रेनाशीर्वादः ॥ भगवानिति शश्वदैश्वर्यादिगुणः ॥ सात्वतां सङ्गहे न सम्यग्वर्ति
भं वा तदुपाख्यानयावित्पृच्छामिति सात्वतो भक्ताः स्वार्थे अण् सत्वाग्रुसादिदर्भ ॥ तस्य वा अश्रमणमार्ग तदहं
वेसावनरतिभवति ते वांपतिः पालकः यस्यार्थविशेषस्य चिकीर्षया वसुदेवस्य भार्यायां देवक्यां जातः अंग हे
सूत तन्नोत्तरं यिद्धि अर्हसि ॥ सामान्यतस्त्वावतारो भूतानां क्षेमाय पालनाय भवाय समृद्धये ॥ ११ ॥ तत्र भाव
देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया ॥ तन्नः शुश्रूषमाणानामर्हस्यंगानुवर्णितुं ॥ १२ ॥ यस्यावतारो भूता नाम्नः संसाराख्य २
नां क्षेमाय च भवाय च ॥ १३ ॥ आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् ततः सद्यो विमुच्येत यद्धि
भेति स्वयं भयं ॥ १४ ॥ यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः सद्यः पुनंत्युपस्पृष्टाः स्वर्धुन्यापोनुसेवया ॥ १५ ॥
को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः ॥ शुद्धिकामो न शृणुयाद्यशः कलिमलापहं ॥ १६ ॥ तस्य कर्मा
ण्युदाराणि परिगीतानि सूरिभिः ॥ ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः ॥ १७ ॥ अथाख्याहि हरेर्धी
मन्नवतारकथाः शुभाः ॥ लीला विदधतः स्वैरमीश्वरस्यात्ममायया ॥ १८ ॥ ॥ ब्रह्मादिभिः ३
मनुवर्णयितुं ॥ तद्यशः श्रवणेन त्वं कामाविष्कुर्वंति आपत्त्रयनिवृत्तिभिः ॥ १७ ॥ संसृतिमापन्नः प्राप्तः विशेषो पि ननसं
सृतेः ॥ अयहेतो ॥ यद्यतो नाम्नः भयमपि स्वयं बिभेति किं वयस्य पादसंश्रया ये षामत एव प्रशमः ॥ अयनं वर्त्माश्रा
यो वा येषां ते मुनयः उपस्पृष्टाः सन्निधिमात्रेण सेविताः सद्यः पुनंति स्वर्धुनी गंगा तस्या आपः ॥ तस्याः पादविसृताः
ततस्तत्रैव निषृति ॥ अनुसेवया ये न पुनंत्यप्यनुसेवया पुनंति स्वाद्यशुद्धिकामो नाम तत्कर्षोक्ति ॥ पुण्यश्लोकैरीड्या
नि स्तुत्यानि कर्माणि यस्य तस्य यशः ॥ अश्रान्तं वर्तनुयेति ॥ उदाराणि महान्ति परिगीतानि सम्यग्गीतानि सूरिभिः नारदा
दिभिः ॥ कलाः ब्रह्मरुद्रादिमूर्तीः ॥ अथेति अवतारेषु अवतारकथाः स्थितं कृष्णवतारकथाः ॥ अवसरे ॥ स्वैरमस्वाधीनतया तदा
शुभाः कथाः स्वैरं लीलां कुर्वतः श्रीकृष्णावतारप्रयोजनेनैव न त्वनुवृत्तिवशेन ज्ञातव्यं ॥ १८ ॥ ॥

नाम्नः संसाराख्य २

राम॰ ध

सं॰ ४

कलिमलापहं संसारदुःखनाशनम् ३ मे २

अश्रेमोपि ज्ञातएवेति २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवमौत्सुक्येन पुनरपि तच्चरितान्येव श्रोतुमिच्छन्तः ॥ तथात्मनः तृप्त्यभावमावेदयन्ति ॥ वयं त्विति ॥ १९ ॥
योगयागादिषु तृप्यामः स्म ॥ उद्गतं तमो यस्मात् स उत्तमः ॥ तथाभूतः श्लोको यशो यस्य तस्य विक्रमे तु वि
शेषेण न तृप्यामः ॥ अलमिति न मन्यामहे तत्र हेतुः यच्छृण्वतामिति ॥ यद्वान्येषु [illegible] नास्ति वयं त्वनेनेति
तपाहरस्यान्वयः ॥ अयमर्थः ॥ येथा स्थले तृप्तिर्भवति ॥ उदरपूर्त्या वा रसज्ञानेन वा ॥ स्वादुविशेषा
भावाद्वा ॥ तच्छृण्वतामित्यनेन श्रोत्रस्याकाशत्वात् भरणमित्युक्तं ॥ रसज्ञानामित्यनेन रसज्ञानतः पशुव
त्तृप्तिर्निराकृता ॥ इक्षुभक्षणवद्रसान्तराभावेन तृप्तिं निराकरोति पदे पदे प्रतिक्षणं स्वादु तेऽपि स्वादु अन्तः
श्रीकृष्णचरितानि कथयेत्याशयेनाह ॥ कृतवानिति ॥ अतिमर्त्यानीति मर्त्यानतिक्रान्तानि गोवर्धनोद्धरणा

वयं तु न वितृप्याम उत्तमश्लोकविक्रमे ॥ यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ॥ १९ ॥ कृतवान् कि
ल वीर्याणि सह रामेण केशवः ॥ अतिमर्त्यानि भगवान् गूढः कपटमानवः ॥ २० ॥ कलिमागतमा
ज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयं ॥ आसीना दीर्घसत्रेण कथायां सक्षणा हरेः ॥ २१ ॥ त्वं नः संदर्शितो धात्रा
दुस्तरं निस्तितीर्षतां ॥ कलिं सत्त्वहरं पुंसां कर्णधार इवार्णवं ॥ २२ ॥ ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये
धर्मवर्मणि ॥ स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः ॥ २३ ॥ इति श्रीभागवते महापुराणे प्रथम
स्कंधे नैमिषोपाख्याने प्रथमोऽध्यायः ॥ १ ॥ ॥ ॥

दीनि मनुष्येषु संभावितानीत्यर्थः ॥ ननु [illegible] कृतमेव तत्र [illegible] वकाशः स्यात् ॥ अत आ
ह कलिमागतं ज्ञात्वा तत्र क्षेत्रे श्रीविष्णुपदे ग्रहकामाः दीर्घसत्रेणाक्षिप्तमनस आसीनाः हरेः कथायां सक्षणाः कृत
तावसराः ॥ २१ ॥ अस्मिन्नु समये त्वद्दर्शनमीश्वरेणैव संपादितमित्यभिनन्दन्ति त्वमिति ॥ २२ ॥ कलिं निस्तितीर्ष
तां [illegible] कर्णधारो नाविक इव ॥ [illegible] धर्मस्य वर्मणि कवचरूपे केऽस्वां काष्ठां
मर्यादां स्वरूपमित्यर्थः ॥ अस्य चोत्तरं कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सहेत्ययं श्लोकः ॥ २३ ॥ ॥ ॥
इति श्रीभावार्थदीपिकायां प्रथमस्कंधे प्रथमोऽध्यायः ॥ १ ॥ व

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰
भा॰ग॰
प्र॰टी॰
५

तदेवंप्रथमेध्यायेषट्प्रश्नामुनिभिःकृताः॥ द्वितीयेतूत्तरंसूतःसंक्षेपेणाहतेष्वथ॥ विप्राणामिति पूर्वंभू
तैःसम्यक्प्रश्नैःसम्यक्संहृष्टः॥ रौमहर्षणिःरोमहर्षणस्यपुत्रः॥ उग्रश्रवाः॥ तेषांवचःप्रतिपूज्यसत्कृत्यप्रवक्तुमुपक्रान्त ॥ चक्रमे उप २
वान॥ प्रवचनस्योपक्रमेगुरुदेवतानमस्कारश्लोकमाहत्रिभिः॥१॥ तत्रस्वगुरोःश्रीशुकदेवस्यैश्वर्यंतच्चरि
तेनैवद्योतयन्नाह॥ यंप्रव्रजन्तंसंन्यस्यगच्छन्तं अनुपेतंमामुपनयस्वेतिउपनयनाद्यर्थंअनुपासंत्रयद्वालौकि
नाप्यनुपेतं अननुगतमेकाकिनमित्यर्थः॥ तत्रहेतुः॥ अपेतकृत्यंहित्यक्तसर्वकर्ममार्गेअप्रवर्तमाननै
ष्ठिकत्वात॥ द्वैपायनःश्रीव्यासदेवः॥ विरहात्कातरोभीतः॥ पुत्रहेपुत्रेतिनाम्नाजुहावआहूतवान्
दूरादाह्वानेप्लुतेसत्यपिसंधिरार्षः॥ तदातन्मयतयाश्रीशुकदेवरूपतयातरवोभिनेदुः हृताःप्रत्युत्त

व्यासउवाच॥ इतिसंप्रश्नसंहृष्टोविप्राणांरौमहर्षणिः॥ प्रतिपूज्यवचस्तेषांप्रवक्तुमुपचक्र
मे॥१॥ सूतउवाच॥ यंप्रव्रजन्तमनुपेतमपेतकृत्यंद्वैपायनोविरहकातरआजुहाव॥ पुत्रेति
तन्मयतयातरवोभिनेदुस्तंसर्वभूतहृदयंमुनिमानतोस्मि॥२॥ यःस्वानुभावमखिलश्रुति
सारमेकमध्यात्मदीपमतितितीर्षतांतमोन्धं॥ संसारिणांकरुणयाहपुराणगुह्यंतंव्यास
सूनुमुपयामिगुरुंमुनीनां॥३॥

सुहृष्टं २

स्पकृत्वंतः॥ पितुःस्नेहात्तदंधपरिहारायपयोहृत्तरूपेणउत्तरंदत्तवानित्यर्थः॥ तंमुनिमानतोस्मि त
न्मयत्वोपपादनायतद्विशेषणंसर्वभूतानांहृदयःआत्मा ह्यथनेयोगबलेनप्रविष्टःतीतिसर्वभूतहृदयः त
२॥ कृपालुतांदर्शयन्नाह॥ यइति॥ अर्थगाढतमःसंसारंतरंसंप्रवितर्तुमिच्छतांपुराणानांमध्येगोप्य
ततरैत्तत्वेन॥ वत्वारिविशेषणानिस्वः निजः असाधारणः अनुभावःप्रभावोयस्यतत्स्वानुभावम
खिलश्रुतीनांसारं एकमद्वितीयमनुपममित्यर्थः॥ अध्यात्मंकार्यकरणसंघातंअधिकृत्यवर्तमा
नमात्मतत्त्वमध्यात्मंतस्यदीपमात्मतत्त्वप्रकाशकमुपयामिशरणंगच्छामि॥३॥ एवंस्वाभ्यांगुरुंनम

वि २

राम॰
५

स्कृत्यहृदेप्रणम
ति २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

जयत्यनेन संसारमिति जयो ग्रन्थः ॥ तमुदीरयेदिति स्वयं तथोदीरयन् ॥ अन्यान्पौराणिकाननुशिक्षयति तेषां
वदः प्रतिष्ठं ज्य इति युक्तं न त्वनिष्टं जनकं करोति ॥ ४ ॥ हे मुनयः कथ्यया भवन्ति तदहं पृष्टः यतो लोकानां मं
गलमेतत् ॥ यतः श्रीकृष्णविषयः संप्रश्नः कृतः ॥ सर्वशास्त्रार्थसारं ... प्रश्नस्यापि कृष्णस्य पर्यवसानादेव मुक्तं
तत्र प्रथमं ... सर्वशास्त्रसारं ऐकान्तिकं श्रेयो ब्रूहीति ॥ तत्रोत्तरं स वै पुंसामिति ॥ अयमर्थः धर्मो द्विविधः प्र
वृत्तिलक्षणो निवृत्तिलक्षणश्च तत्राद्यः स्वर्गाद्यर्थः ॥ निवृत्तिलक्षणः सोऽपरः यतस्तु धर्मात् श्रवणादिलक्ष
णा भक्तिर्भवति स परो धर्मः स एवैकान्तिकश्रेय इति कथंभूता अहैतुकी हेतुः फलानुसंधानं तद्रहिता
अप्रतिहता विघ्नैरनभिभूता ॥ ६ ॥ ननु तमेवात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा

नारायणं नमस्कृत्य नरं चैव नरोत्तमं ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ४ ॥ मुनयः साधु
पृष्टोऽहं भवद्भिर्लोकमंगलं ॥ यत्कृतः कृष्णसंप्रश्नो येनात्मा सुप्रसीदति ॥ ५ ॥ स वै पुंसां परो धर्मो य
तो भक्तिरधोक्षजे ॥ अहैतुक्यप्रतिहता ययात्मा सुप्रसीदति ॥ ६ ॥ वासुदेवे भगवति भक्तियोगः
प्रयोजितः ॥ जनयत्याशु वैराग्यं ज्ञानं च यदहैतुकं ॥ ७ ॥ धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः
॥ नोत्पादयेद्यदि रतिं श्रम एव हि केवलम् ॥ ८ ॥ १ ॥

नाशकेनेत्यादिश्रुतिस्तस्य धर्मस्य ज्ञानोत्पत्तिहेतुत्वं ... भक्तिहेतुत्वमुच्यते सम्यक् न भक्तिद्वारेणेत्याह
वासुदेव इति ॥ अहैतुकं शुष्कतर्काद्यगोचरमौपनिषदमित्यर्थः ॥ ७ ॥ व्यतिरेकमाह धर्म इति योऽधर्मः स्वनुष्ठि
तः स यदि विष्वक्सेनकथासु रतिं नोत्पादयेत् ॥ ८ ॥ न हि स्वनुष्ठितोऽपि सन् ॥ अयमाशयः नतु मोक्षार्थ
स्यापि धर्मस्य श्रम एव मोक्षादि सेव्य ॥ अत आह केवलं विफलः श्रम इत्यर्थः ॥ ननु स्वर्गादिफलमित्याश
क्य ॥ एवकारेण निराकरोति तदपि नश्वरत्वात् न तत्फलमित्यर्थः ॥ नन्वक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भ
वतीत्यादिश्रुतेः ॥ न तत्फलस्य नश्वरत्वमित्याशंक्याह ॥ हि शब्देन साधयति ॥ तद्यथेह कर्मचितो लोकः
क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते इति तर्कानुगृहीतया श्रुत्या तत्प्रतिपादनात् ॥ ८ ॥

अ५

अयमर्थः भगवत्कथारतिद्वारा मोक्षफलप
र्यवसायित्वात्स धर्मो न श्रमः अयं तु न तथेति
केवलं श्रमः ॥ ८ ॥ १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री० भाग प्रदी० ८

तदेवं हरिभक्तिद्वारा तदितरवैराग्यात् ज्ञानपर्यन्तः ॥ परो धर्म इत्युक्तं ॥ तस्य भक्तिविनरसिद्ध्यसिद्धिवत्स्वनिषिद्धा
मुक्तफलभोगे वैराग्यं ॥ अन्ये तु मन्यन्ते धर्मस्यार्थः फलं ॥ तस्य च कामः फलं तस्य चेन्द्रियप्रीतिः ॥ तत्प्रीतेश्च पुनरपि ध-
र्मार्थादिपरम्परेति ॥ तथाहुः ॥ धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते इत्यादि ॥ तन्निराकरोति धर्मस्येति द्वाभ्यां ॥
आपवर्ग्यस्य आ अपवर्गपर्यन्तस्य ॥ अर्थाय फललाभाय नोपकल्पते योग्यो न भवति तथार्थस्यापि धर्मै-
कान्तस्य धर्म एवैकान्तः फलं तस्य कामो लाभाय न हि स्मृतो मुनिभिः ॥ कामस्य च विषयभोगस्य इन्द्रियप्रीतिर्ला-
भः फलं न भवति ॥ किन्तु यावता जीवेत् ॥ तावानेव कामस्य लाभः ॥ जीवनपर्याप्तः कामः सेव्य इत्यर्थः ॥ यदुक्तं ॥ आ-
हारार्थं कर्म कुर्यादनिन्द्यं कुर्यादाहारं प्राणसंधारणार्थं ॥ प्राणाः संधार्यास्तत्त्वजिज्ञासनार्थं तत्त्वं जिज्ञास्यं येन भूयो
न दुःखं ॥ जीवस्य जीवनस्य च पुनः कर्मानुष्ठानद्वारा कर्मभिर्य इह प्रसिद्धः सोऽर्थो न भवति किन्तु तत्त्वजिज्ञासैवे-

धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते ॥ नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः ॥ ९ ॥ का-
मस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता ॥ जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः ॥ १० ॥ वदन्ति तत्त-
त्त्वविदः तत्त्वं यज्ज्ञानमद्वयम् ॥ ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ ११ ॥ तच्छ्रद्दधाना मुनयो ज्ञा-
नवैराग्ययुक्तया ॥ पश्यन्त्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया ॥ १२ ॥ अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्रम-
विभागशः ॥ स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणम् ॥ १३ ॥ राम ॥

ति ॥ ननु च तत्त्वजिज्ञासा नाम धर्मजिज्ञासैव धर्म एव हि तत्त्वमिति केचित् तत्राह ॥ तत्त्वविदस्तु तदेव तत्त्वं वदं-
ति किं तत् ज्ञानं नाम अद्वयमिति ॥ क्षणिकविज्ञानपक्षं निवर्तयति तत्तु तत्त्वविदोऽपि विगीतवचनात् एव ॥ नैव त-
स्येदं तत्त्वस्य नामान्तरैरभिधानादित्याह [illegible] औपनिषदैर्ब्रह्मेति
हैरण्यगर्भैः परमात्मेति सात्वतैर्भगवानिति अभिधीयते ॥ ११ ॥ तच्च तत्त्वं स्वपरिक्रियया भक्त्यैव प्राप्यत इत्याह
तच्छ्रद्दधानाः ॥ ज्ञानवैराग्ययुक्तयेत्येतज्ज्ञानेन परोक्षं तत्त्वं तत्त्वमात्मनि ते पश्यन्ति किं तत् ॥ आत्मानं परमात्मानं
श्रुतेन वेदान्तादिश्रवणेन गृहीतया प्राप्तयेति भक्तेर्दार्ढ्यमुक्तं धर्मस्य फलं भक्तिः ॥ नार्थकामादिकमिती सम-
र्थ्य उपपाद्योपसंहरति ॥ अत इति ॥ १२ ॥ हे द्विजश्रेष्ठाः हरितोषणं हरेराराधनं संसिद्धिः फलं यस्माद्भक्तिविहीनो धर्मः

केवलं श्रम एव तस्माद्धरिः प्रधान एव धर्मोऽनुष्ठेय इत्याह तस्मादिति ॥

राम। ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एकेनएकाग्रेणमनसाभक्तिर्विहितेत्यर्थः केवलंश्रमएवेतिप्रपंचितं ॥ इदानींतुभक्तेः मुक्तिफलत्वंप्रपंचयति ॥१४॥ य
स्यानुध्यानमेवासिःखड्गः ॥ तेनयुक्ताविवेकिनः ग्रंथिमहंकारंनिबध्नाति यत्कर्मतंनच्छिंदति तस्यकथा
यांरतिंप्रीतिंकोनकुर्यात ॥१५॥ ननुसत्यमेवंकर्मनिर्मूलिनीश्रीहरिकथारतिस्तथापितस्याःरुचिर्नोत्पद्यतेकिंकु
र्मः तत्राह शुश्रूषोरिति ॥ पुण्यतीर्थनिषेवणादिभिर्निष्पापस्यमहत्सेवास्यात ॥ तथाचतद्धर्मश्रद्धाततःश्रवणे
च्छाततोरुचिःस्यादित्यर्थः ॥१६॥ ततःशृण्वतामिति पुण्येश्रवणकीर्तनेयस्यसः सतांसुहृत् हितकारीहृदय
निष्ठअभद्राणिकामादिवासनास्तानिधुनोतिःस्थः हृदयस्थःक्षिणोतीत्यर्थः ॥१७॥ ततश्चनष्टप्रायेष्विति सर्वाभद्राणां

तस्मादेकेनमनसाभगवान्सात्वतांपतिः ॥ श्रोतव्यःकीर्तितव्यश्चध्येयःपूज्यश्चनित्यदा ॥१४॥ यदनु
ध्यासिनायुक्ताःकर्मग्रंथिनिबंधनं ॥ छिंदंतिकोविदास्तस्यकोनकुर्यात्कथारतिं ॥१५॥ शुश्रूषोःश्र
द्धानस्यवासुदेवकथारुचिः ॥ स्यान्महत्सेवयाविप्राः पुण्यतीर्थनिषेवणात ॥१६॥ शृण्वतांस्वकथा
कृष्णः पुण्यश्रवणकीर्तनः ॥ हृद्यंतःस्थोह्यभद्राणिविधुनोतिसुहृत्सतां ॥१७॥ नष्टप्रायेष्वभद्रेषुनि
त्यंभागवतसेवया ॥ भगवत्युत्तमश्लोकेभक्तिर्भवतिनैष्ठिकी ॥१८॥ तदारजस्तमोभावाःकामलोभाद
यश्चये ॥ चेतएतैरनाविद्धंस्थितंसत्वेप्रसीदति ॥१९॥ एवंप्रसन्नमनसोभगवद्भक्तियोगतः ॥ भगव
त्तत्वविज्ञानंमुक्तसंगस्यजायते ॥२०॥ भिद्यतेहृदयग्रंथिःछिद्यंतेसर्वसंशयाः ॥ क्षीयंतेचास्यकर्मा
णिदृष्टएवात्मनीश्वरे ॥२१॥ ॥

नाशस्यतोत्तरकालत्वात् प्रायग्रहणंभागवतानांश्रीभागवतशास्त्रस्यवासेवयानैष्ठिकीनिश्चलाविक्षेप
काभावात ॥ रजस्तमसश्चयेवतत्स्वभावाभावाः कामादयः तैरनाविद्धंअनभिभूतंप्रसीदति उपशाम्यतिभग
वद्भक्तियोगतः ॥ प्रसन्नमनसः अतएवमुक्तसंगस्यतत्वज्ञानंफलमाह भिद्यतइति ॥२०॥ हृदयमेवग्रंथिः चिज्ज
डग्रंथनरूपोहंकारः ॥ अतएवसर्वसंशयाः असंभावनादिरूपाः कर्माण्यनारब्धफलानि ॥ आत्मनिस्वरूपभू
तेईश्वरेदृष्टे ॥ एवकारेणज्ञानानंतरमेवेतिदर्शयति ॥२१॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अत्र सदाचारं दर्शयन्नुपसंहरति ॥ अत इति आत्मनः प्रसादनीं मनःशोधनीं वासुदेवे भक्तिं कुर्वन्तीति भजनीय विशेषो दर्शितः ॥ तदेवोपपादयितुं ब्रह्मादीनां त्रयाणामेकात्मत्वेपि वासुदेवस्याधिक्यमाह सत्वमिति इहास्य विश्वस्यैकएवपरः पुमान् असाविश्वस्य स्थित्यादये हरिविरिंचिहरेति संज्ञाः ॥ केवलं भिन्नार्थत्वेह हरिविरिंचिहरा इति वक्तु ध्येसंधिराधे ॥ तत्र तेषां मध्ये श्रेयांसि शुभफलानि सत्वतनोर्वासुदेवाद्देवस्युः ॥२३॥ उपाधिवैशिष्ट्येन फलवैशिष्ट्य महर्षात्माह ॥ पार्थिवात्स्वप्रकृतित्रिप्रकाशरहितात् ॥ दारुणः काष्ठाद्धूमः प्रकृतिस्वभावस्त्रयीमयो वेदोक्तकर्म प्रवृत्तः ॥ ईषत्कर्मप्रत्यासत्तेः ॥ तस्मादप्यग्निस्त्रयीमयः ॥ साक्षात्कर्मसाधनत्वात् एवं तमसः सकाशाद्रजः रजसः स

अतो वै कवयो नित्यं भक्तिं परमया मुदा ॥ वासुदेवे भगवति कुर्वन्त्यात्मप्रसादनीं ॥२२॥ सत्वं रजस्तम इति
प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते ॥ स्थित्यादये हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र
खलु सत्वतनोर्नृणां स्युः ॥२३॥ पार्थिवाद्दारुणो धूमस्तस्मा[illegible]ग्निस्त्रयीमयः ॥ तमसस्तु रजस्तस्मात्सत्वं
यद्ब्रह्मदर्शनं ॥२४॥ भेजिरे मुनयोथाग्रे भगवंतमधोक्षजं ॥ सत्वं [illegible]शुद्धं क्षेमाय कल्पंते येनु तानिह ॥
मुमुक्षवो घोररूपान्हित्वा भूतपतीनथ ॥ नारायणकलाः शांता [illegible]जंति ह्यनसूयवः ॥२६॥ रजस्तमः
प्रकृतयः समशीला भजंति वै ॥ पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः ॥२७॥

काशात्सत्वं ब्रह्मदर्शनं ब्रह्मप्रकाशकं तत्र शाद्वेनलयात्मकत्वात्तमसः सकाशाद्रजसः सोपाधिकज्ञानहेतुत्वेन किं चिद्ब्रह्मदर्शनप्रत्यासत्तिमात्रमुक्तं न तु सर्वथा तत्प्रकाशकत्वं विक्षेपकत्वात् यत्तु ज्ञानं त्वसाक्षाद्ब्रह्मदर्शनं अतस्त द्गुणोपाधीनां ब्रह्मादीनामपि यथोत्तरं वैशिष्ट्यमिति भावः ॥२४॥ वासुदेवभक्तौ पूर्वाचारं प्रमाणयति भेजिरे इति । अथातो हेतोरग्रे पुरा विशुद्धसत्वमूर्तिं भगवन्तमधोक्षजं ॥ अतो ये तानुवर्तन्ते इह संसारे ते क्षेमाय कल्पन्ते ॥२५॥ ननु व्या तपि केचिद्भजन्तो दृश्यन्ते ॥ सत्यं मुमुक्षवस्त्वन्यान्न भजन्तीति किं तु सकामा एवेत्याह मुमुक्षव इति द्वाभ्यां भूतपतीनिति पितृप्रजेशादीनामुपलक्षणं अनसूयवो देवतान्तराणि निंदकाः सन्तः ॥२६॥ रजस्तमसी प्रकृतिः स्वभावो येषां ते अत एव पितृभूतादिभिः समं शीलं येषां ते श्रियासहैश्वर्यं प्रजाः चेप्सन्तीति तथा ताने ॥२७॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मोक्षप्रदत्वाद्वासुदेव एव भजनीय इत्युक्तं ॥ सर्वशास्त्रतात्पर्यगोचरत्वादपीत्याह द्वाभ्यां ॥ वासुदेवः परः तात्पर्य-
गोचरो येषां ते ॥ ननु वेदा मखपरा दृश्यंते इत्याशंक्य तेपि ॥ तदाराधनार्थत्वात्तत्परा इत्युक्तं ॥ योगा योगशास्त्रा-
णि तेषामप्यासनप्राणायामादिक्रियापरत्वं नाशंक्यं तासामपि तत्प्राप्त्युपायात्तत्परत्वमुक्तं ॥ २८ ॥ ज्ञानं ज्ञानशा-
स्त्रं ननु च तज्ज्ञानपरमेवेत्याशंक्य ज्ञानस्यापि तत्परत्वमुक्तं ॥ तपो ज्ञाने ॥ धर्मोथ धर्मशास्त्रं दानव्रतादि विषयं
ननु तत्स्वर्गपरमित्याशंक्य गम्यत इति गतिः ॥ तत्स्वर्गादिफलस्यापि तदानंदांशरूपत्वात्परैवेत्युक्तं यद्वा वेद इ-
त्यनेनैव ॥ ननु मखत्वात्सर्वाण्यपि वासुदेवपराणीत्युक्तं ॥ तत्र तेषां न तु मखयागक्रियादीनां नानार्थपरत्वात्त-
देकपरत्वमित्याशंक्य मखादीनामपि तत्परत्वमित्युक्तमिति द्रष्टव्यं ॥ २९ ॥ ननु जगत्सर्गप्रवेशनियमनादिवि-

वासुदेवपरा वेदा वासुदेवपरा मखाः ॥ वासुदेवपरा योगा वासुदेवपराः क्रियाः २८ वासुदेवपरं ज्ञा-
नं वासुदेवपरं तपः ॥ वासुदेवपरो धर्मो वासुदेवपरा गतिः २९ स एवेदं ससर्जाग्रे भगवानात्ममायया
सदसद्रूपया चासौ गुणमय्यागुणो विभुः ३० तया विलसितेष्वेषु गुणेषु गुणवानिव अंतःप्रविष्ट आ-
भाति विज्ञानेन विजृंभितः ॥ ३१ ॥ यथा ह्यवहितो वह्निर्दारुष्वेकः स्वयोनिषु नानेव भाति विश्वात्मा भू-
तेषु च तथा पुमान् ॥ ३२ ॥ ॥

लासयुक्ते वस्तुनि ब्रह्मणि सर्वशास्त्रसमन्वयो हि दृश्यते ॥ कथं वासुदेवपरत्वं सर्वस्येत्याह स एवेति चतुर्भिः पूर्वे
षेवश्लोकैस्तु सर्गकर्माणि दारुणानि बृहीति प्रश्नस्योत्तरं सदसद्रूपया कार्यकारणात्मिकया गुणमय्या स्वयं स्वतो
निर्गुणोपि सन्नित्यर्थः ॥ भगवतो जगत्कारणत्वमुक्त्वा प्रवेशनियमनलक्षणलीलामाह तयेति ॥ ३१ ॥ विलसितेषु
रूढेषु गुणेष्वाकाशादिष्वंतः प्रविष्टः सन् गुणवानिव मदयो नानागुणान् स्वाभिमानवानिव नन्दु वस्तुतस्तु व्याय तो
विज्ञानेन चिच्छक्त्या विजृंभितोन्वसितेन ॥ बहुरूपत्वलीलामाह यथेति ॥ ३२ ॥ स्वयोनिषु स्वाभिव्यंजकेषु अवहितो
निहितः ॥ विश्वात्मा पुमान् परमेश्वरो भूतेषु प्राणिषु तथा मितोपि प्रतियोनि नानात्वेन नानेव उच्यते ॥ ३२ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

देवतिर्यग्रूपेणवाभोगंलीलामाह ॥ असौहृदिभूतसूक्ष्माणिवेंद्रियाणिवात्माचमनश्चतैः ॥ स्वनिर्मितेषुचतुर्विधे-
षुइतिभोगेस्वातंत्र्यमुच्यते ॥ तद्गुणान्शब्दादिरूपान्विषयान्निजयाभुंक्तेभोजयतीतिणिजर्थोवाज्ञेयः पालयति
तीतिवातदात्मनेपदमार्षंभुजोनवनेइतिस्मरणात् ॥३३॥ इदानींसूततज्जनानासीतिप्रश्नोत्तरमाह भावयतियाल-
यति एतद्वसर्वावतारसाधारणप्रयोजनंविशेषतः हंसावतारस्यकुंतीस्तुतौवक्ष्यति लोकभावनःलोकक-
तादेवादिषुलीलावतारःतेषुनुरक्तः ॥३४॥ इतिश्रीभावार्थदीपिकायांप्रथमस्कंधेद्वितीयोध्यायः ॥२॥ अवता-
रकथाप्रश्नेत्रतीयेतत्रराभिधा ॥ पुरुषाद्यवतारोक्त्यातत्रचारिमवर्णनैः ॥ यदुक्तं ॥ अथाख्याहिहरेर्धीमन्नव-
तारकथाःशुभाइति ॥ तदुत्तरत्वेननानावताराननुक्रमिष्यन्प्रथमंपुरुषावतारमाह ॥ जगृहेइतिपंचभिः

पालयति

असौगुणमयैर्भावैर्भूतसूक्ष्मेंद्रियादिभिः ॥ स्वनिर्मितेषुनिर्विष्टोभुंक्तेभूतेषुतद्गुणान् ॥३३॥ भावयत्ये-
षसत्वेनलोकान्वैलोकभावनः ॥ लीलावतारानुरतोदेवतिर्यङ्नरादिषु ॥३४॥ इतिश्रीभागवतेप्रथम-
स्कंधेद्वितीयोध्यायः ॥२॥ सूतउवाच जगृहेपौरुषंरूपंभगवान्महदादिभिः ॥ संभूतंषोडशकलमा-
दौलोकसिसृक्षया ॥१॥ यस्यांभसिशयानस्ययोगनिद्रांवितन्वतः ॥ नाभिह्रदांबुजादासीद्ब्रह्मा
विश्वसृजांपतिः ॥२॥ यस्यावयवसंस्थानैःकल्पितोलोकविस्तरः ॥ तद्वैभगवतोरूपंविशुद्धंसत्वमू-
र्जितम् ॥३॥

महदादिभिर्महदहंकारपंचतन्मात्रैरेकादशेंद्रियाणिपंचमहाभूतानिइतिषोडशकलाअंशायस्मिन्
ननुयद्यपिभगवद्विग्रहोनैवंभूतः ॥ तथापिविराट्जीवांतर्यामित्वेनभगवतोविराड्रूपेणोपासनार्थमेवमु-
क्तमितिद्रष्टव्यं ॥ कोसौभगवान्यत्सापेक्षायांतंविशिनष्टि यस्यांभसिमहार्णवेशयानस्यविश्रांतस्यतत्रच
योगःसमाधिःतद्रूपांनिद्रांविस्तारयतःसतस्यनाभिरेवह्रदः ॥ तस्मिन्यदंबुजंतस्मात्सकाशाद्ब्रह्मासीत् अभूत्
पाद्मेकल्पेपौरुषंरूपंजगृहे ॥१॥ कीदृशंरूपंतदाह यस्येति ॥ ननुकीदृशोविग्रहःतस्ययोंभसिशेतेस्मतदाह
तत्तस्यभगवतोरूपंविशुद्धंरजआद्यसंभिन्नं ॥ अतएवोर्जितंनिरतिशयंसत्वंयतत्तद्योगिनांअनन्यत्तमित्याह पश्य-

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अदभ्रं अनल्पं ज्ञानात्मकं यच्चक्षुस्तेन सहस्रमपरिमितानि पादादीनि यस्मिन् अद्भुतं सहस्रं मूर्धादयो यस्मिंस्तत् सहस्रं यानि मौल्यादीनि तैरुल्लसत् शोभमानं॥ एतत्कूटस्थं नानावतारवदाविर्भावतिरोभाववदित्याह॥ ४॥ एतदादिनारायणाख्यं रूपं निधीयन्तेऽस्मिन्निति निधानं कार्यावसाने प्रवेशस्थानमित्यर्थः॥ बीजमुद्गमस्थानं॥ बीजत्वेपि नान्यबीजतुल्यं किं तु अव्ययं न केवलमवताराणामेव बीजं किंतु सर्वप्राणिनामित्याह॥ यस्यांशो ब्रह्मा तस्यांशो मरीच्यादिः तेन सनत्कुमारादयोऽवतारास्तत्र भवतीति चाह॥ स एवेति॥ ५॥ कौमारो ब्राह्मः प्राजापत्यो मानवः॥ इत्यादीनि सर्गविशेषनामानि यः पौरुषे इत्यत्र वक्ष्यते॥ स एव देवः कौमाराख्यं सर्गमाश्रितः सनत्कुमारादिब्राह्मणो भूत्वा ब्रह्मचर्यं चचार ६

पश्यंत्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतं॥ सहस्रमूर्धश्रवणाक्षिनासिकं सहस्रमौल्यंबरकुंडलोल्लसत्॥ ४॥ एतन्नानावताराणां निधानं बीजमव्ययं॥ यस्यांशांशेन सृज्यंते देवतिर्यङ्नरादयः॥ ५॥ स एव प्रथमं देवः कौमारं सर्गमाश्रितः॥ चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखंडितं॥ ६॥ द्वितीयं तु भवायास्य रसातलगतां महीं॥ उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः॥ ७॥ तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः॥ तंत्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः॥ ८॥ तुर्ये धर्मकलासर्गे नरनारायणावृषी॥ भूत्वात्मोपशमोपेतमकरोद्दुश्चरं तपः॥ ९ ॥

प्रथमं द्वितीयमित्यादिशब्दा निर्देशमात्रापेक्षया॥ अस्य विश्वस्य भवाय उद्भवाय महीमुद्धरिष्यन्निति कर्मोक्तिः॥ एवं सर्वत्रावतारकर्म योज्यमित्यनुसंधेयं॥ नारदावतारमाह तृतीयमिति॥ ७॥ ऋषिसर्गमुपेत्य तत्र देवर्षित्वमुपेत्येत्यर्थः॥ सात्वतं वैष्णवं तंत्रं पांचरात्रागमम् आचष्ट उक्तवान्॥ यतस्तंत्रात् त्रिगुणं कर्म बंधहेतुत्वेन भासमानं निष्कर्म मोक्षसाधनं भवति तेषां भावो नैष्कर्म्यं कर्मणामेव मोचकत्वं यतो भवति तदाचष्टेत्यर्थः॥ ८॥ तुर्ये अवतारे धर्मस्यांशः कला भार्या यस्य॥ अर्थाद्वा एव आत्मनो यत्पत्नीति निरुक्तेः॥ तस्याः सर्गे ऋषी भूत्वा इत्येकावतारतां दर्शयति॥ कपिलावतार

श्री॰ भा॰ पु॰ प्र॰ टी॰ ४

आसुरये तत्त्वग्रामे ब्राह्मणाय तत्त्वानां ग्रामस्य संख्यानिर्णयो यस्मिंस्तत्सांख्यं ॥ दत्तात्रेयावतारमाह षष्ठमिति ॥ १० ॥ अत्रेरप
त्यत्वं तेनैव वृतः सन्प्राप्तः अत्रेरपत्यमभिकांक्षत आह तुष्ट इति ॥ वक्ष्यमाणत्वात्कथं प्राप्तोऽनसूयया ॥ मत्सदृशा
पत्यमिच्छता मामेवापत्यं वृतवानिति दोषदृष्टिमकुर्वन्नित्यर्थः ॥ आन्वीक्षिकीमात्मविद्यां प्रह्लादादिभ्यश्च ॥ ११ ॥
यज्ञावतारमाह ॥ तत इति ॥ सयज्ञो यामाद्यैः स्वैस्वपुत्रैर्यामानामदेवास्तदाद्यैः सह स्वायंभुवनाममन्वंतरं
पालितवान् ॥ ततः स्वयमिंद्रोऽभूदित्यर्थः ॥ १२ ॥ ऋषभावतारमाह ॥ अष्टमेति ॥ सर्वाश्रमनमस्कृतमंत्याश्रमेणपा
रमहंस्यं वर्त्म धीराणां दर्शयन्नाभेराग्नीध्रपुत्रात् ऋषभो जातः ॥ १३ ॥ पार्थिवं वपुः राजदेहं पृथुरूपं पार्थिवं तदेहष्टया

अत्रिणा

पंचमः कपिलो नाम सिद्धेशः कालविप्लुतं ॥ प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयं ॥ १० ॥ षष्ठमत्रेरप
त्यत्वं वृतः प्राप्तोऽनसूयया ॥ आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ॥ ११ ॥ ततः सप्तम आकूत्यां
रुचेर्यज्ञोऽभ्यजायत ॥ स यामाद्यैः सुरगणैरपात्स्वायंभुवांतरं ॥ १२ ॥ अष्टमे मेरुदेव्यां तु नाभेर्जात उरु
क्रमः ॥ दर्शयन्वर्त्म धीराणां सर्वाश्रमनमस्कृतं ॥ १३ ॥ ऋषिभिः प्रार्थितो भेजे नवमं पार्थिवं वपुः ॥ दुग्धे
भूमिं मामोषधीर्विप्रास्तेनायं स उशत्तमः ॥ १४ ॥ रूपं स जगृहे मात्स्यं चाक्षुषोदधिसंप्लवे नाव्यारोप्य मही
मय्यामपाद्वैवस्वतं मनुं ॥ १५ ॥ सुरासुराणामुदधिं मथ्नतां मंदराचलम् ॥ दध्रे कमठरूपेण पृष्ठ एका
हे दशो विभुः ॥ १६ ॥

तु

विदं पार्थिवं देहं भजे श्रीविशेषलक्षणं ॥ इमां पृथिवीं सर्वाणि वस्तूनि दुग्ध ॥ आशगमाभावश्चार्षः ॥ हे विप्रास्तेन ह
ह्यीदोहनेन सोऽयमवतार उशत्तमः कमनीयतमः वश्याकांतावित्यस्मात् ॥ १४ ॥ मत्स्यावतारमाह रूपमिति चाक्षु
षमन्वंतरे य उदधिसंप्लवः तस्मिन् यद्यपि मन्वंतरावसाने प्रलयो नास्ति तथापि केनचित्कौतुकेन सत्यव्रताय
मायादर्शिता ॥ यथाष्टकांडे मार्कंडेयायेति द्रष्टव्यं महीमय्यां नावि नौकारूपायां मह्यामित्यर्थः अपाद्रक्षितवा
न् वैवस्वतमिति भाविनी संज्ञा ॥ १५ ॥ कूर्मावतारमाहेति ॥ सुरासुराणामिति ॥ कमठः कूर्मः तद्रूपेण एकादशावतारो विभुर्मं

॥ ३८ ॥

धान्वंतरावतारमाह ॥ धान्वंतरमिति ॥ धान्वंतरं धान्वंतरिरूपं द्वादशमं आदि प्रयोगस्त्वार्षः ॥ त्रयोदशमेव रूपं तच्च
विते नसहदर्शयति ॥ अपाययदित्यत्र सुधामित्यध्याहारः ॥ मोहिन्याः स्त्रिया रूपेणान्यान्सुरान्मोहयन् ॥ धान्वंत
रिरूपेणामृतमानीय मोहिन्या पाययदित्यर्थः ॥ १७ ॥ नृसिंहावतारमाह ॥ चतुर्दशमिति ॥ नारसिंहरूपं बिभ्रत्
परकं निग्रहित्वरणं ॥ १८ ॥ वामनावतारमाह ॥ पंचदशमिति ॥ दुष्टानां पदं वामयतीति वामनरूपं कृत्वा प्रत्यादि
त्सुः तस्मादाच्छिद्य ग्रहीतुमिच्छुः ॥ १९ ॥ परशुरामावतारमाह ॥ अवतार इति ॥ त्रिगुणं यथा भवति तथा सप्तकृ

धान्वंतरं द्वादशमं त्रयोदशममेव च ॥ अपाययत्सुरानन्यान्मोहिन्या मोहयन्स्त्रिया ॥ १७ ॥ चतुर्दशं ना
रसिंहं बिभ्रद्दैत्येंद्रमूर्जितं ॥ ददार करजैरूरावेरकां कटकृद्यथा ॥ १८ ॥ पंचदशं वामनकं कृत्वागादध्व
रं बलेः ॥ पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपं ॥ १९ ॥ अवतारे षोडशमे पश्यन्ब्रह्मद्रुहो नृपान्
त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं ॥ २० ॥ ततः सप्तदशे जातः सत्यवत्यां पराशरात् ॥ चक्रे वेद
तरोः शाखा दृष्ट्वा पुंसोल्पमेधसः ॥ २१ ॥ नरदेवत्वमापन्नः सुरकार्यचिकीर्षया ॥ समुद्रनिग्रहादीनि चक्रे
वीर्याण्यतः परम् ॥ २२ ॥ एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ॥ रामकृष्णाविति भुवो भगवान
हरद्भरम् ॥ २३ ॥ ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां ॥ बुद्धो नाम्ना जिनसुतः कीकटेषु भविष्यति २४
अथासौ युगसंध्यायां दस्युप्रायेषु राजसु ॥ जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः ॥ २५ ॥

त्वः सप्तवारानेकविंशतिवारानित्यर्थः ॥ २० ॥ व्यासावतारमाह तत इति ॥ अल्पमेधसोल्पप्रज्ञान्पुंसो दृष्ट्वा नदत्व
प्रहार्थं शाखाश्चक्रे ॥ २१ ॥ रामावतारमाह ॥ नरदेवत्वं राघवरूपेण प्राप्तः सन् ॥ २२ ॥ अतः परमष्टादशे रामकृष्णा
वतारमाह ॥ विंशतिमसद्भुनि वक्रकर्मतकारत्नापः ॥ छंदोनुरोधेन रामकृष्णावित्येवं जन्मनी प्राप्य ॥ २३ ॥ अजनस्य
सुतः ॥ जिनसुत इति पाठे जिनः स एव कीकटमध्ये गयाप्रयागमध्ये ॥ २४ ॥ कल्क्यवतारमाह ॥ युगसंध्यायां कलेरं
ते विष्णुयशसो ब्राह्मणात् सकाशाज्जनिष्यते ॥ अनुक्तसर्वसंग्रहार्थमाह ॥ अवतारा इति ॥ २५ ॥ ॥ ॥

निमाज्ञ १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा प्र टी.
१०

असंख्येयत्वे दृष्टांतः ॥ यथेति ॥ अविदासिनः उपक्षयशून्यात् ॥ दसु उपक्षये इत्यस्मात् सरसः सकाशात् कुल्याः क्षु
द्रप्रवाहाः विभूतीराह ऋषय इति ॥ २६ ॥ तत्र च विशेषमाह एते चेति ॥ २७ ॥ पुंसः परमेश्वरस्य केचिदंशाः केचित्कलावि
भूतयश्च ॥ तत्र मत्स्यादीनामवतारत्वेन सर्वज्ञत्वसर्वशक्तित्वेपि यथोपयोगमेव ज्ञानक्रियाशक्त्याविष्करणं ॥ कुमारना
रदादिष्वधिकारिकेषु यथोपयोगमंशकलावेशः पृथ्वादिषु शक्त्यावेशः ॥ कृष्णस्तु भगवान्साक्षान्नारायण एवा
विर्भूतस्सर्वशक्तित्वात् ॥ सर्वेषां प्रयोजनमाह ॥ इंद्रारयो दैत्यास्तैराकुलमुपद्रुतं लोकं मृडयंति सुखिनं कुर्वंति ॥ प
तत्कीर्तनफलमाह जन्मेति ॥ २८ ॥ गुह्यमतिरहस्यं जन्म प्रयतः ॥ शुचिः सन् दुःखग्रामात्संसारान्मुच्यत इत्युक्तं

अवतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः ॥ यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः ॥ २६ ॥ ऋषय
ो मनवो देवा मनुपुत्रा महौजसः ॥ कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥ २७ ॥ एते चांशकलाः पुंसः
कृष्णस्तु भगवान्स्वयम् ॥ इंद्रारिव्याकुलं लोकं मृडयंति युगे युगे ॥ २८ ॥ जन्म गुह्यं भगवतो य एतत्प्रय
तो नरः ॥ सायं प्रातर्गृणन्भक्त्या दुःखग्रामाद्विमुच्यते ॥ २९ ॥ एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः
मायागुणैर्विरचितं महदादिभिरात्मनि ॥ ३० ॥ यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले ॥ एवं द्र
ष्टरि दृश्यत्वमारोपितमबुद्धिभिः ॥ ३१ ॥

ननु कथं देहरूपसंबंधे सति ॥ न हि मुक्तिरित्याशंक्य देहसंबंधस्य भगवन्मायोत्थाविलसितत्वात् देहत्वावर्णादि
जनितविषयानंदनिरूपयन्ने इत्याशयेनाह एतदिति पंचभिः ॥ २९ ॥ अरूपस्य चिदेकरसस्यात्मनो जीवस्ये
तत्स्थूलं रूपं शरीरं भगवतो या माया तस्या गुणैर्महदादिरूपैर्विरचितं क्वात्मनि आत्मस्थाने शरीरे कृतमित्यर्थः
॥ ३० ॥ कथमित्यपेक्षायां स्वरूपावरणेन तन्न द्रष्टरि सदृष्टांतमाह ॥ यथा वायुना प्रेरितो मेघौघो नभसि आकाशे बुद्धि
भिरज्ञैरारोपितः ॥ यथा वा पार्थिवो रेणुः स्वतन्त्रधूसरत्वादिरनिले ॥ एवं द्रष्टर्यात्मनि दृश्यत्वं दृश्यत्वादिधर्मकं
शरीरमारोपितमित्यर्थः ॥ किंच ॥ ३१ ॥

राम
१०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अतः स्थूलाद्रूपात्परमन्यदपि रूपमारोपितमित्यनुषंगः ॥ कथंभूतं तत् यदव्यक्तं सूक्ष्मं तद्वदेव ॥ अव्यूढगु-
णं बृंहितं व्यूढः करचरणादिपरिणामः ॥ तथा अपरिणता अव्यूढा गुणास्तैर्बृंहितं रचितं आकारविशेषरहि-
तत्वादव्यक्तमित्यर्थः ॥ एतदेव कुतस्त्यादृ अदृष्टाश्रुतवस्तुत्वात् ॥ आकारविशेषवद्वस्तु भावात् यद्याकार-
विशेषवद्वस्तु तद्दृश्यते श्रूयते वा ॥ इंद्रादिवदिदं तु न तथा नहि तस्य सत्त्वे किं प्रमाणं तत्राह सजी-
वो जीवोपाधिः ॥ जीवो जीवेन निर्मुक्तः ॥ जीवो जीव विदित्यादौ जीवोपाधौ लिंगदेहे जीवशब्दप्रयोगात् जी-
वोपाधितया कल्पनतस्तत्सद्धः ॥ ननु स्थूलस्यैव भोगायतनत्वाज्जीवोपाधिरस्ति किमन्यकल्पनया इत्यत आह ॥ य-
यस्मात्तस्मात्पुनर्भवः ॥ पुनर्जन्मोत्क्रान्तिगत्यादीनां तेन विना असंभवादिति भावः ॥ तदेवमुपाधिद्वयमुक्त्वा तद-
पवादेन जीवस्य ब्रह्मतामाह ॥ ३३ ॥ यत्र यदेमे स्थूलसूक्ष्मे रूपे स्वसंविदात्मरूपसम्यग्ज्ञानेन प्रतिषिद्धे भवतः
ज्ञानेन प्रतिषिद्धे बाधिते तेन तत्सेव हेतुमाह ॥ अविद्ययात्मनि कृते कल्पिते इति तद्धेतोः ॥ तद्ब्रह्म तदा जीवो ब्रह्मैव भव

अतः परं यदव्यक्तमव्यूढगुणबृंहितं ॥ अदृष्टाश्रुतवस्तुत्वात्स जीवो यत्पुनर्भवः ॥ ३२ ॥ यत्रेमे सदस-
द्रूपे प्रतिषिद्धे स्वसंविदा ॥ अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनं ॥ ३३ ॥ यद्येषोपरता देवी माया
वैशारदी मतिः ॥ संपन्न एवेति विदुर्महिम्नि स्वे महीयते ॥ ३४ ॥

तीत्यर्थः कथंभूतं दर्शनं ज्ञानैकस्वरूपं तथापि भगवन्मायया संसारित्वे दर्शनाभावे विद्यमानत्वात्कथं
ब्रह्मतेत्यत आह यदीति ॥ ३४ ॥ असंदेहे संदेहवचनं यदि वेदाः प्रमाणं स्युरितिवत् वैशारदी विशारदः सर्वज्ञ
ईश्वरः तदीया देवी संसारचक्रेण क्रीडनशीला स्वयमेवोपरता भवति किमिति उपरता भवेत् ॥ तत्राह मति-
रिति ॥ अयं भावः ॥ यावदविद्यात्मनावरणविक्षेपौ करोति तावन्नोपरमति ॥ यदा तु सैव विद्यारूपेण पर-
णता तदा सदसद्रूपे जीवोपाधी दग्ध्वा निरिंधनाग्निवत्स्वयमेवोपरमेदिति ॥ तदा संपन्नो ब्रह्मस्वरूपं प्राप्तः
वेति विदुस्तत्त्वज्ञाः ॥ किमतो यद्येवं स्वे महिम्नि परमानंदस्वरूपे महीयते ॥ पूज्यते विराजत इत्यर्थः ॥ यथा जी-
वस्य जन्मादि मायया एवमीश्वरस्यापि जन्मकर्मादि मायेत्याह ॥ एवमिति ॥ ३५ ॥ ॥
रामायनमः ॥ राम ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰
भा॰ ग॰
प्र॰ टी॰
॥

अकर्तुः कर्माणि अजनस्य जन्मानि ह्युच्यंते तंत्रयोगिभिः॥ तर्हि जीववदीश्वरस्य को विशेषः॥ स्वातंत्र्यमेव विशेष इ
त्याह सवा इति॥ ३६॥ षाड्वर्गिकं इंद्रियषड्वर्गविषयं जिघ्रति दूरादेव गंधवद्गृह्णाति॥ न तु सज्जते इत्यर्थः॥ कुतः षड्गु
णेशः॥ षडिंद्रियनियंता॥ ३७॥ ननु किमीश्वरस्य सृष्ट्यादिकर्मभिर्विषयभोगैर्वा तत्राह नचेति॥ धातुर्जगद्विधातुरी
श्वरस्य ऊतीर्जगल्लीलाः॥ कुमनीषः कुबुद्धिर्निपुणेन तर्कादिकौशलेन नावैति जानाति मनसा रूपाणि वचसा ना
मानि संतन्वतो विस्तारयतो वचोभिरिति वक्तृत्वेनाभिप्रायेण मनोवचोभिः सद्भिरिति वा अज्ञः तु किं विजानाती
त्याह सवेद इति॥ ३८॥ अमायया अकुटिलभावेन संततया निरंतरया अनुवृत्त्या आनुकूल्येन भजनेन॥ भक्तिमार्गेण अद्य

एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च॥ वर्णयंति स्म कवयो वेदगुह्यानि हृत्पतेः॥ ३५॥ सवा इदं विश्व
ममोघलीलः सृजत्यवत्यत्ति न सज्जतेस्मिन्॥ भूतेषु चांतर्हित आत्मतंत्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः॥ २६
न चास्य कश्चिन्निपुणेन धातुरवैति जंतुः कुमनीष ऊतीः॥ नामानि रूपाणि मनोवचोभिः संतन्वतो नट
चर्यामिवाज्ञः॥ ३७॥ स वेद धातुः पदवीं परस्य दुरंतवीर्यस्य रथांगपाणेः॥ योऽमायया संततयानुवृत्त्या
भजेत तत्पादसरोजगंधं॥ ३८॥ अथेह धन्या भगवंत इत्थं यद्वासुदेवेऽखिललोकनाथे॥ कुर्वंति स
र्वात्मकमात्मभावं न यत्र भूयः परिवर्त उग्रः॥ ३९॥ इदं भागवतं नाम पुराणं ब्रह्मसंमितं॥ उत्तमश्लो
कचरितं चकार भगवानृषिः॥ ४०॥ निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत्॥ तदिदं ग्राहयामास
सुतमात्मविदां वरं॥ ४१॥ सर्ववेदेतिहासानां सारं सारं समुद्धृतं सतु संश्रावयामास महाराजं परीक्षितं ४२

ज्ञानरहीनाभिनंदति॥ अथेति॥ ३९॥ यतो भक्त एव भगवत्तत्त्वं जानाति॥ अथ अतो भगवंतः॥ सर्वज्ञाः भवंतो धन्याः
कृतार्थाः॥ कुतः यद्यस्मात्॥ इत्थं प्रवर्तमाना वासुदेवे आत्मभावं मनोवृत्तिं कुर्वंति॥ सर्वात्मकमैकांतिकं यस्मि
न्नात्मभावे सति भूयः परिवर्तो जन्ममरणावर्तो न भवति॥ एतत्किमेतच्छास्त्रं अपूर्वं कथयसीत्याह इदमिति
॥ ४०॥ ब्रह्मसंमितं सर्ववेदतुल्यं उत्तमश्लोकचरितं यस्मिंस्तदृषिः व्यासः तत्संप्रदायप्रवृत्तिमाह॥ तदिदमिति
धा॰ स्वस्तिप्रकं॥ ४१॥ ॥ प्रथमे ३ राम । ॥
॥

रामः
॥

प्रायेणामत्युपर्यंतानाशाकेनोपविष्टमिति वैराग्योक्तिः ॥ ४३ ॥ देवर्षिप्रभृतिविप्रर्षेः सकाशात् ॥ ४४ ॥ अध्यगमन्ताधीतवानस्मि तत्रकी
र्तयतस्तत्रनिविष्टः चेत्यन्वयभेदान्न पदावृत्तिदोषः यथाधीतं न तत्स्व मतिविलसितं तत्तथा मतिमत्यनुसारेण
संक्षेपतः कथितविस्तरतः श्रावयिष्यामि ॥ ४५ ॥ इति श्रीभावार्थदीपिकायां प्रथमेतृतीयः ३ ॥ तदेवं भागवतारंभकारणं विनवर्णयते
व्यासस्यापरितोषस्तत्र यः प्रवचनादिभिः ॥ इत्येवं प्रसन्नतया श्रावयिष्यामीति ब्रुवाणं मुनीनां बहूनां मध्ये एकेन वक्तुंः
वयोवृद्धः वृद्धेष्वपि बह्वृचः कुलपतिर्वंगन्नाय्यः तेषु अपि बह्वृचो बह्वृचः ऋग्वादीते नवक्ता ॥ अतएवंभूतत्वात्
शौनकोऽब्रवीत ॥ १ ॥ यथा कथामाह ॥ २ ॥ कस्मिन स्थाने केन हेतुनेति महाभारतादिधर्मशास्त्राणि कृतवतो मुनेः
तन्संहिताकरणे किं कारणमित्यर्थः कुत इति सार्वविभक्तिकस्तसिः केन प्रवृत्तिनेत्यर्थः ॥ कृष्णोव्यासः ॥ ४३ ॥

प्रायोपविष्टं गंगायां परीतं परमर्षिभिः ॥ कृष्णेस्वधामोपगते धर्मज्ञानादिभिः सह ॥ ४३ ॥ कलौ नष्टदृशामेष
पुराणार्कोधुनोदितः ॥ तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः ॥ ४४ ॥ अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात्
सोहं वः श्रावयिष्यामि यथाधीतं यथा मति ॥ ४५ ॥ इति श्रीभागवते प्रथमस्कंधे तृतीयोध्यायः ॥ ३ ॥ व्यासः ॥
इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणां वृद्धः कुलपतिः सूतं बह्वृचः शौनकोब्रवीत ॥ १ ॥ शौनकः ॥
सूत सूत महाभाग वद नो वदतां वर ॥ कथां भागवतीं पुण्यां यदाह भगवान् शुकः ॥ २ ॥ कस्मिन्युगे प्रवृत्ते
यं स्थाने वा केन हेतुना ॥ कुतः संचोदितः कृष्णः कृतवान्संहितां मुनिः ॥ ३ ॥ तस्य पुत्रो महायोगी समदृङ्निर्वि
कल्पकः एकांतमतिरुन्निद्रो गूढो मूढ इवेयते ॥ ४ ॥ दृष्ट्वानुयांतमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिद
धुर्नसुतस्य चित्रं तद्वीक्ष्य पृच्छति मुनौ जगदुस्तवास्ति स्त्रीपुंभिदा नतु सुतस्य विविक्तदृष्टेः ॥ ५ ॥

सतु संश्रावयामास तन्न शुकस्य व्याख्यानादिकं कथं घटितमिति प्रष्टुं तस्य असंगोदासीनतां दर्शयन् तस्येति त्र
समदृक समं ब्रह्मैवेति पश्यति अतो निर्विकल्पकः स्वार्थकः ॥ निरस्तभेदः ॥ किंच कस्मिन्नेतः समाप्तिर्यस्याः एवंभूतामतिः
यस्य सः ॥ यत उन्निद्रः मायाशयनादुद्बुद्धः ॥ या निशा सर्वभूतानां तस्यां जागर्ति संयमी तिस्मृतेः ॥ अतएव गूढोऽप्र
कटो मूढ इव प्रतीयते ॥ निर्विकल्पत्वं प्रपंचयति ॥ दृष्ट्वेति ॥ ५ ॥ आत्मजं शुकं प्रव्रजंतं अनुयांतं मनुगच्छंतमृषिं व्यासं
नग्नस्य संकोचभावेन परिधानं कृतवत्यः अनग्नमपीत्यनेनार्थात्तत्सुतो
नग्न इति सूचितम् सत्येतस्मात् क्रियानपरिदधुः तच्चित्रं वीक्ष्य पृच्छति तुभ्यं उमानिति भिदा भेदस्त्व

[illegible]

वो मितिप

एवंभूतोसौ कथमालक्षितो नातः कुरुजांगलानाश्रुतिदृष्टविशेषाः तान्संप्राप्तः प्रथमं ततो गजसाह्वये विचरन् गजेन सहितम् आ
ह्वयो नाम यस्य हस्तिनः हस्तिनापुरे हस्तीनाम राजा तेन निर्मितत्वात् ॥ ६ ॥ एवंभूतेन मुनिना सह यत्र संवादे एषा सात्वती भा
गवती श्रुतिः संहिता प्रवृत्ता व्याख्याता बहुकालावस्थानापेक्षितस्य त्वेकत्रावस्थानं दुर्लभमित्याह स इति ॥ ७ ॥ गोदोहन
मात्रकालं प्रतीक्षते नान्यथा भिक्षार्थं किंतु तेषामाश्रमं गृहं तीर्थीकुर्वन् ॥ तस्मादेवंभूतोत्र वक्ता त्वाश्चर्यं श्रोतृत्वं च
इति मतिवाश्चर्यं यतोत कथयत्याह ॥ अभिमन्युसुतं पंचभिः ॥ ८ ॥ गृणीहि कथय ॥ ९ ॥ समस्राट् चक्रवर्ती वेति वितर्के ॥
कस्य वा हेतोः कस्मात्कारणात् अधिराट् श्रयं अधिराज्यश्रियं संपदमनादृत्य ॥ १० ॥ यस्य पादनिकेतं चरणपीठं ह

कथमालक्षितः पौरैः संप्राप्तः कुरुजांगलान् ॥ उन्मत्तमूकजडवद्विचरन्गजसाह्वये ॥ ६ ॥ कथं वा पांडवेयस्य राजर्षेर्मुनिना सह ॥ संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः ॥ ७ ॥ स गोदोहनमात्रं हि गृहेषु गृहमेधिनाम् ॥ अवेक्षते महाभागस्तीर्थीकुर्वंस्तदाश्रमं ॥ ८ ॥ अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमं ॥ तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः ॥ ९ ॥ स सम्राट् कस्य वा हेतोः पांडूनां मानवर्धनः ॥ प्रायोपविष्टो गंगायामनादृत्याधिराट्श्रियं ॥ १० ॥ नमंति यत्पादनिकेतमात्मनः शिवाय हानीय धनानि शत्रवः ॥ कथं स वीरः श्रियमंग दुस्त्यजां युवैषतोत्स्रष्टुमहो सहासुभिः ॥ ११ ॥ शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः ॥ जीवंति नात्मार्थमसौ पराश्रयं मुमोच निर्विद्य कुतः कलेवरं ॥ १२ ॥ तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किंचन ॥ मन्ये त्वां विषये वाचां स्नातमन्यत्र छांदसात् ॥ १३ ॥ ॥

स्तुं धनान्यानीय पात्रे वा नमंति ॥ अंगहे सूत युवा तत्कर्णपवएषत ॥ आर्षमात्मनेपदं ॥ असुभिः प्राणैः सह
विरक्तस्य ॥ किं धनादिभिरिति चेत्तत्राह ॥ ११ ॥ लोकस्य शिवाय सुखाय भवाय भूतये समृद्ध्यै ऐश्वर्याय च ते जीवंति न त्वा
त्मार्थं एवं सत्यसौ राजा निर्विद्य विरक्तः अश्रयं परेषामाश्रयं कलेवरं कुतो हेतोर्मुमोच न हि परोपजीवनं स्वयं त्यक्तुं
मर्हति इत्यर्थः ॥ १२ ॥ यत्किंचन पृष्टोसि तत्सर्वमस्माकं समाचक्ष्व यस्माद्वाचां विषये स्नातं पारंगतं त्वां मन्ये छां
दसा[illegible]दन्यत्र वैदिककर्मातिरेकेण त्रैवर्णिकत्वात् कस्मिन्युगे इत्यादिप्रश्नानां व्यासजन्मकथनपूर्वकमुत्तरमाह स

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

का २

द्वापरे समनुप्राप्ते कदेत्यपेक्षायामाह ॥ तृतीये युगस्य पर्यये परिवर्ते वासव्यामुपरिचरवसोः वीर्याज्जातायां सत्य
वत्यां योगी ज्ञानी व्यासो जातः ॥१४॥ जलमुपस्पृश्य जले स्नानादिकं कृत्वेत्यर्थः आसीनो बभूवेति शेषः विविक्त
देशे अन्यादिरहिते काकाप्यस्पृष्टे ॥ अनेनैव बदर्याश्रमस्थानं सूचितं ॥१५॥ तत्र स ऋषिर्युगधर्मादिव्यतिकरं वीक्ष्य स
र्ववर्णाश्रमाणां यद्धितं तद्दध्याविति तृतीयेनान्वयः ॥ परावरज्ञः अतीतानागतवित् अव्यक्तरंहो वेगो यस्य तेन कालेन

बभूव २

सूत उवाच ॥ द्वापरे समनुप्राप्ते तृतीये युगपर्यये जातः पराशराद्योगी वासव्यां कलया हरेः ॥१४॥ सक
दाचित्सरस्वत्या उपस्पृश्य जलं शुचि ॥ विविक्त एक आसीन उदिते रविमण्डले ॥१५॥ परावरज्ञः स ऋषिः का
लेनाव्यक्तरंहसा ॥ युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे ॥१६॥ भौतिकानां च भावानां शक्तिह्रासं च तत्कृतं
अश्रद्दधानान्निःसत्त्वान्दुर्मेधान्ह्रसितायुषः ॥१७॥ दुर्भगांश्च जनान्वीक्ष्य मुनिर्दिव्येन चक्षुषा ॥ सर्ववर्णाश्रमा
णां यद्दध्यौ हितममोघदृक् ॥१८॥ चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकं ॥ व्यदधाद्यज्ञसंतत्यै वेदमे
कं चतुर्विधं ॥१९॥ ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः ॥ इतिहासपुराणं च पंचमो वेद उच्यते २०
तत्र ऋग्वेदधरः पैलः सामगो जैमिनिः कविः ॥ वैशंपायन एवैको निष्णातो यजुषामुत ॥२१॥ अथर्वांगिरसा
मासीत्सुमंतुर्दारुणो मुनिः ॥ इतिहासपुराणानां पिता मे रोमहर्षणः ॥२२॥ त एव वेदा दुर्मेधैर्धार्यन्ते पुरु
षैर्यथा ॥ एवं चकार भगवान्व्यासः कृपणवत्सलः ॥२३॥

कृ

युगधर्माणां व्यतिकरं संकरं प्राप्तं वीक्ष्य तथा भुवि युगे युगे ॥१६॥ भौतिकानां शरीरादीनां तत्कृतं कालकृतं निःसत्त्वान्
धैर्यशून्यान् दुर्मेधान्मंदमतीन् ॥१७॥ ततश्च तद्धोत्रोपलक्षिताः चत्वार ऋत्विजस्तत्संबद्धेनात्रैतच्छुद्धियं कर्म चातुर्होत्रं यज्ञ
शुद्धिकरं यज्ञसंतत्यै तानामविच्छेदाय ॥१९॥ चतुर्विधत्वमेवाह ऋगादीति उद्धृताः पृथक्कृताः ॥२०॥२१॥ दारुणः अथ
र्वोक्ताभिचारादिप्रवर्तकः ॥२२॥ व्यसन् विभक्तवंतः ॥२३॥ वेदविभागप्रयोजनमाह एवेति ॥२३॥ ये सर्वे मतिमेधाविभिर्धार्यंते

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री० भा० प्र० टी० १२

किंचद्विज वैथवा त्रैवर्णिकेषु धमाः । तेषां कर्मरूपेश्रेयसि श्रयः साधने श्रेयएवं भवेत् ॥ २५ ॥ अतएवतेषां हृपयाम्
तिनाभारतारव्यानं हृतं ॥ अनेनैव प्रकारेण भवति भूतानांश्रेय सिद्धिते ॥ २६ ॥ सर्वात्मकेनापि कर्मणा नातिप्रसीदद्धृद
ये यस्य सः ॥ २७ ॥ विद्वाप्रसन्नेरहं तं वितर्कयन्निदमुवाच स्वगतं ॥ २८ ॥ मानिताः शृंजिताश्चत्रु शासनमात्रा ॥ २९ ॥ देहादे
हभव आत्माजीवोवस्तुतो विभुः ॥ परिपूर्णएवात्मनास्वेन रूपेणासंपन्नः तादात्म्यमप्राप्त इवाभाति ॥ ब्रह्मवर्चसवे

स्त्रीशूद्रद्विजबंधूनां त्रयीनश्रुतिगोचरा ॥ कर्मश्रेयसि मूढानां श्रेयएवं भवेदिह ॥ २५ ॥ इति भारतमाख्या
नं कृपया मुनिना कृतं ॥ एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः ॥ २६ ॥ सर्वात्मकेनापि यदा नातुष्यद्धृदयं
ततः ॥ नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुचौ ॥ २७ ॥ वितर्कयन्विविक्तस्थ इदं चोवाच धर्मवित् ॥ धृतव्रतेन
हि मया छंदांसि गुरवोग्नयः ॥ २८ ॥ मानिता निर्व्यलीकेन गृहीतं चानुशासनं ॥ भारतव्यपदेशेन ह्याम्ना
यार्थश्च दर्शितः ॥ २९ ॥ दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत ॥ तथापि बत मे दैह्यो ह्यात्मा चैवात्मना
विभुः ॥ ३० ॥ असंपन्न इवाभाति ब्रह्मवर्चस्य सत्तमः ॥ किं वा भागवता धर्मा न प्रायेण निरूपिताः ॥ प्रियाः पर
महंसानां त एव ह्यच्युतप्रियाः ॥ ३१ ॥ तस्यैवं खिलमात्मानं मन्यमानस्य खिद्यतः ॥ कृष्णस्य नारदोभ्यागादा
श्रमं प्रागुदाहृतं ॥ ३२ ॥ तमभिज्ञाय सहसा प्रत्युत्थायागतं मुनिः ॥ पूजयामास विधिवन्नारदं सुरपूजि
तम् ॥ ३३ ॥ इति श्रीभागवते प्रथमस्कंधे चतुर्थोध्यायः ॥ ४ ॥

सी ब्रह्मवर्च २

दृष्ट्वा वर्णाश्रमाय नोत्कर्षजं तेजः ॥ तत्र साधवो ब्रह्मवर्चस्या लेषु सत्तमो निश्रेष्ठोपि यद्वा ॥ न केवलमसंपन्न इवाभा
ति अप्रस्तुत ब्रह्मवर्चसवान पि असत्तम इवाभाति । पावितं तेरेक मनीयत मोपि असंपन्नोहं स्वयमेवाशंकते किंवे
ति आह ॥ ३१ ॥ प्रायेण भूयस्त्वे न हि यस्मात्तएव धर्मा अच्युतस्य प्रियाः ॥ ३२ ॥ खिद्यमानं न खेदं प्राप्तवतः कृष्णस्य व्यास
स्य आश्रमं प्रागुदाहृतं सरस्वतीतीरस्थं ॥ ३३ ॥ तं नारदमागतमभिज्ञाय सहसा प्रत्युत्थाय विधिवत्पूजयामास ॥ ३४ ॥ इति

श्रीमद्भागवते प्रथमस्कंधे चतुर्थोध्यायः ॥ ४ ॥

राम० १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पंचमे सर्वधर्मेभ्यो हरिकीर्तनगौरवं ॥ आत्मचित्तप्रसादाय नारदेनोपदिश्यते ॥ उपसमीयेत्यासीनं विप्रर्षिं हृष्टवान् महायशाः सत्यवती
पद्वसत्विवेत्यनेन स्वात्मप्रहृतिर्योन्यते ॥ यद्वा इवेत्यनधिकारार्थम् अहो महानपि सन्नानीति स्मयमानः ॥ १ ॥ शारीरः शरीराभिमानी
आत्मा आत्मना तेन शरीरेण कच्चित् किं परितुष्यति मानस आत्मा मनोऽभिमानी तेन मनसा परितुष्यति ॥ २ ॥ कच्चिदेवाद्दितिते जिज्ञा-
सितं ज्ञातमिदं धर्मादि यत्तत्सर्वं त्वसंपन्नं सम्यक् ज्ञातमपि अस्माद् दृष्टितं चेत्यर्थः ॥ अपि इति पाठे संबोधनं ॥ सेपन्नत्वे हेतुः महदद्भु-
तं इति सर्वैरर्थैर्धर्मादिभिः परिबृंहितं परिपूर्णं ॥ ३ ॥ किंच यत्सनातनं नित्यं परं ब्रह्म तच्च त्वया जिज्ञासितमधीतमधिगतं शब्दं चेत्यर्थः
अथापि शोचसि तत्किमर्थमिति शेषः ॥ ४ ॥ आत्मा शारीरो मानसश्च तन्मूलं तस्यापरितोषस्य कारणं अव्यक्तमस्फुटं हे नारद त्वां पृच्छा

सूत उवाच ॥ अथ तं सुखमासीनमुपासीनं बृहच्छ्रवाः ॥ देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्निव ॥ १ ॥ श्रीनारद उवाच
पाराशर्य महाभाग भवतः कच्चिदात्मना ॥ परितुष्यति शारीर आत्मा मानस एव वा ॥ २ ॥ जिज्ञासितं सुसंपन्नमपि ते म-
हदद्भुतं ॥ कृतवान् भारतं यस्त्वं सर्वार्थपरिबृंहितं ॥ ३ ॥ जिज्ञासितमधीतं च ब्रह्म यत्तत्सनातनं ॥ तथापि शोचस्यात्मान-
मकृतार्थ इव प्रभो ॥ ४ ॥ व्यास उवाच ॥ अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे ॥ तन्मूलमव्यक्तमगाध-
बोधं पृच्छामहे त्वात्मभवात्मभूतं ॥ ५ ॥ स वै भवान्वेद समस्तगुह्यमुपासितो यत्पुरुषः पुराणः ॥ परावरेशो मनसैव वि-
श्वं सृजत्यवत्यत्ति गुणैरसंगः ॥ ६ ॥ त्वं पर्यटन्नर्क इव त्रिलोकीमन्तश्चरो वायुरिवात्मसाक्षी ॥ परावरे ब्रह्मणि धर्मतो व्र-
तैः स्नातस्य मे न्यूनमलं विचक्ष्व ॥ ७ ॥

आत्मकाले लोट्।

महदं आत्मभवो ब्रह्मा तस्यात्मनो देहाद्भूतः ॥ तमनत्पवागाधोतिगंभीरो बोधो यस्य तं त्वां ॥ अगाधबोधं तं प्रपंचयन्नाह ॥ स वै इति द्वाभ्यां
५ ॥ सर्वं गुह्यं त्वं वेदेहेत्वर्थः ॥ यस्मात्पुराणः पुरुष उपासितः त्वया कथंभूतः परावरेशः कार्यकारणनियंता मनसैव संकल्पमात्रेण
गुणैः कृत्वा विश्वं सृजतीत्यादि ॥ ६ ॥ किंच त्वं त्रिलोकीं पर्यटन्नर्क इव सर्वदर्शी योगबलेन च प्राणवायुरिव सर्वप्राणिनामन्तश्चरः स-
न्नात्मा साक्षी बुद्धिवृत्तीनां अतः परे ब्रह्मणि धर्मतो योगेन निस्नातस्य ॥ यदुक्तं याज्ञवल्क्येन ॥ इज्याचारदमाहिंसादानस्वाध्यायक-
र्मणां अयं तु परमो धर्मो यद्योगेनात्मदर्शनं ॥ अवरे ब्रह्मणि वेदाख्ये व्रतैः स्वाध्यायनियमैर्निस्नातस्य मे अलमत्यर्थं यन्न्यूनं तद्विच-
क्ष्व वितर्कय ॥ ७ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रानुदितप्रायमनुक्तप्रायं भगवद्यशो विमलं विनैव येनैव धर्मादिज्ञानेनासौ भगवान्न तुष्येत तत्तद्दर्शनं ज्ञानं खिलं न्यूनं मन्ये न तु भगव
द्यशःप्रधानं तज्ज्ञानं वर्णितं त्वयेति ॥ ८॥ चेत्याह द्वाभ्यां धर्मादिसाधनानि च तथा धर्मादिवत्प्राधान्येन वासुदेवस्य महिमा नोक्त इत्यर्थः
वासुदेवव्यतिरिक्तान्यविषयं ज्ञानं वेदवान्यविषयं वाक्तात्पर्यं खिलमेवेत्याह नेति ॥ ९॥ चित्रपदमपि यद्वचो हरेर्यशो न प्रगृणीत तं
द्वायसं तीर्थं काकतुल्यानां कामिनां रतिस्थानमुशन्ति मन्यन्ते कुतः मानसाः सत्त्वप्रधाने मनसि वर्तमाना हंसा यत्र तस्मिन्न विरमन्ति
कर्हिचिदपि नितरां न रमन्ते ॥ उशिक्क्षयाः उशिक् कमनीयं ब्रह्म तत्र यो निवासो येषां ते यथा प्रसिद्धा हंसा मानससरसि चरन्तः कमनी
यपद्मखण्डनिवासाः ॥ विचित्रान्नादियुक्तेऽप्युच्छिष्टगर्ते काकक्रीडास्थाने न रमन्ते इति विशेषः विनापि पदत्वान्नर्थं भगवद्यशःप्र
धानं वचः पवित्रमित्याह ॥ १०॥ तद्वागिति विसर्गः स चासौ वाग्विसर्गः वाक्प्रयोगः जनतानां समूहो जनता तस्या अघं विप्लावयति ना

नारदः॥ भवतानुदितप्रायं यशो भगवतोऽमलं॥ येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलं॥ ८॥ यथा धर्मादयश्चार्था मु
निवर्यानुवर्णिताः॥ न तथा वासुदेवस्य महिमा ह्यनुवर्णितः॥ ९॥ न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत क
र्हिचित्॥ तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा निरमन्त्युशिक्क्षयाः॥ १०॥ तद्वाग्विसर्गो जनताघविप्लवो यस्मिन्प्र
तिश्लोकमबद्धवत्यपि॥ नामान्यनंतस्य यशोंकितानि यच्छृण्वंति गायंति गृणंति साधवः॥ ११॥ नैष्कर्म्यमप्यच्युत
भाववर्जितं न शोभते ज्ञानमलं निरंजनं॥ कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणं॥ १२॥ ॥ ॥ ॥

शयतीति तथा यस्मिन्वाग्विसर्गे बद्धवत्यपि अपशब्दादियुक्तेऽपि प्रतिश्लोकमनन्तस्य यशोऽङ्कितानि नामानि भवन्ति तत्र हेतुः
यद्यानि नामानि साधवो महान्तो वक्तरि सति शृण्वन्ति श्रोतरि सति गृणन्ति अन्यदा तु स्वयमेव गायन्ति कीर्तयन्तीति ॥ भक्तिहीनं
कर्म ज्ञानं चेति कैमुतिकन्यायेन दर्शयति ॥ ११॥ निष्कर्म ब्रह्म तदेकाकारत्वान्निष्कर्मतारूपं नैष्कर्म्यं अज्यतेऽनेनेति अञ्जनमुपाधिः त
न्निवर्तकं निरञ्जनमेवंभूतमपि ज्ञानमच्युते भावो भक्तिः तद्वर्जितं चेत् ॥ अलमत्यर्थं न शोभते सम्यगपरोक्षत्वाय न कल्पते इत्य
र्थः ॥ तदा शश्वत्साधनकाले च फलकाले वा अभद्रं दुःखरूपं यत्काम्यं कर्म यदप्यकारणमकाम्यं तच्चेति चकारस्यान्वयः तदपि कर्मेश्वरे
नार्पितं चेत् कुतः पुनः शोभते बहिर्मुखत्वेन सत्त्वशोधकत्वाभावात् तदेवं भक्तिशून्यानि ज्ञानवाक्कर्मकौशलानि व्यर्थान्युक्त्वा यत

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अथो अतः कारणात् । अमोघा यथार्था दृक् धीर्यस्य स शुचि शुद्धं श्रवो यस्य सत्ये । रतः धृतानि व्रतानि येन स भवानेवं महागुणस्तावद् तत उ
रुक्रमस्याखिलविविधं चेष्टितं लीलां चित्तैकाग्र्येणाखिलस्य बंधमुक्तये तं समनुस्मर स्मृत्वा वर्णयेत्यर्थः ॥ एतच्च वाक्यांतरमिति मध्यम
पुरुषप्रयोगो नानुपपन्नः विपक्षे दोषांतरमाह ॥ १४ ॥ तत उरुक्रमविचेष्टितात् पृथग्दृशः ॥ अत एवान्यथा प्रकारांतरेण यत्किंचि
द्वर्णयितुं विवक्षतः तया विवक्षया कृतैः स्फुरितैः रूपैर्नामभिर्वैकल्पितैर्नोपस्थितैः ॥ दुःस्थिता अनवस्थिता सती मतिः कदाचित्कापि
विषये आस्पदं स्थानं न लभेत वातेनाहता चूर्णिता नौरिव ॥ यदुक्तं गीतासु ॥ व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन ॥ बहुशाखा
ह्यनंताश्च बुद्धयो व्यवसायिनां इति ॥ नन्वेवं हरियशो विना भारतादिकृतं धर्मादिवर्णनेन अकिंचित्करमित्युक्तं भवेत्तत विरुद्धमेव जातं

शु १

अथो महाभाग भवानमोघदृक् शुचिश्रवाः सत्यरतो धृतव्रतः ॥ उरुक्रमस्याखिलबंधमुक्तये समाधिनानुस्मर तद्विचेष्टि
तं ॥ १३ ॥ ततोन्यथा किंचन यद्विवक्षतः पृथग्दृशस्तत्कृतरूपनामभिः ॥ न कर्हिचित्क्वापि च दुःस्थिता मतिः लभेत वाताह
तनौरिवास्पदं ॥ १४ ॥ जुगुप्सितं धर्मकृतेनुशासतः स्वभावरक्तस्य महान्व्यतिक्रमः ॥ यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते
तस्य निवारणं जनः ॥ १५ ॥ ॥

इत्याह ॥ १५ ॥ जुगुप्सितं निंद्यं काम्यकर्मादि स्वभावत एव रक्तस्य रागिणः पुरुषस्य धर्मकृते धर्मार्थमनुशासतः तव महानयं व्य
तिक्रमः ॥ अन्यायः कुत इत्यत आह ॥ यस्य वाक्यतोऽयमेव मुख्यो धर्म इति स्थितः इतरः प्राकृतो जनः तस्य काम्यकर्मादेः श्रेयेन तत्त्वज्ञेन
क्रियमाणं निवारणं स्वयमेव वा त्वया क्रियमाणं यद्यप्यधिकारिभेदेनोक्तं ॥ तथापि स्वभावरक्तेनाज्ञजनस्य विरुद्धमेवेति भा
न मन्यते २ वः यद्वा न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरिति श्रुत्या क्रियमाणं निवारणं यथार्थमेतदिति न मन्यते किं तु प्रवृ
त्तिमार्गाधिकृतविषयं तदिति कल्पयति ॥ तदुक्तं मतांतरोपन्यासे महद्भिः तत्रैवं शाकलं तेव क्तं ये यं थपं गवादयो नराः ॥ महत्स्य वेन श्राकं
तिकं तैतेषामयं विधिः ॥ नैष्ठिकब्रह्मचर्यं वा परिव्राजकता पि वा ५ नैव ग्रपरहीतव्यं तेनादावेव तद्धनेत्यादि ॥ १५ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी
१५

ननुवेत्प्रवृत्तिमार्गोनिषिध्यतेतर्हिनिवृत्तिमार्गेसर्वक्रियात्यागेनैवपरमेश्वरस्वरूपानुभूतेःकिंतद्यशःकथनेनात्यतआहविचक्षणेति॥
विचक्षणोऽतिनिपुणःकश्चिदेवनिवृत्तितःसर्वक्रियानिवृत्त्यास्यविभोःसुखंनिर्विकल्पकसुखात्मकंस्वरूपंवेदितुंतातुमर्हति नतुनर
विचक्षणःप्रकृतिस्वभावःविधत्तेहेतुःनोततःकालतःयावच्चदेशतोयस्ततस्यविभोःचेष्टितंततःकारणाद्धेविभोअनात्मनोदेहाद्यभि
मानिनोतएवगुणैःसत्त्वादिभिःप्रवर्तमानस्यजनस्यदर्शयभवान्निवृत्तिमित्यर्थः॥ पाठांतरंहेभवन्निति संबोधनं॥ एवंतावत्काम्य
धर्मादेरनर्थहेतुत्वात्तद्विहायहरेर्लीलैववर्णनीयेत्युक्तं॥ इदानींतुनित्यनैमित्तिककर्मनिष्ठामप्यनादृत्यकेवलंभक्तिरेवोपदेष्टव्येत्याश
येनाहत्यक्त्वेति॥१६॥ ननुस्वधर्मत्यागेनभजन्भक्तिपरिपाकेनयदिकृतार्थोभवेत्॥ तदानकाचिच्चिन्तायदिपुनरपक्वएवम्रियेतततोभ्र
नर ष्टोहास्वधर्मत्यागनिमित्तोनर्थःस्यादित्याशंक्याह॥ ततोभजनात्कथंचित्पतनेनभ्रष्टेनम्रियेतवायदितदापिभक्तिरसिकस्य

विचक्षणोऽस्यार्हतिवेदितुंविभोरनंतपारस्यनिवृत्तितःसुखं॥ प्रवर्तमानस्यगुणैरनात्मनस्ततोभवान्दर्शयचेष्टितंविभो॥
१६॥ त्यक्त्वास्वधर्मंचरणांबुजंहरेर्भजन्नपक्वोऽथपतेत्ततोयदि॥ यत्रक्ववाभद्रमभूदमुष्यकिंकोवार्थआप्तोऽभजतांस्वधर्मतः
१७॥ तस्यैवहेतोःप्रयतेतकोविदोनलभ्यतेयद्भ्रमतामुपर्यधः॥ तल्लभ्यतेदुःखवदन्यतःसुखंकालेनसर्वत्रगभीररंहसा॥१८

कर्मानधिकारात्तत्रानर्थशंकाऽङ्गीकृत्याप्याह॥ वाशब्दःकटाक्षेयत्रक्वचनीचयोनावपिअमुष्यभक्तिरसिकस्याभद्रमभूत्किं
नाभूदेवेत्यर्थःभक्तिवासनासद्भावादित्यर्थः॥ हरिंअभजद्भिःतुकेवलंस्वधर्मतःकोवार्थआप्तःप्राप्तःअभजतामितिषष्ठीतुसं
बंधमात्रविवक्षया॥ ननुस्वधर्ममात्रादपिकर्मणापितृलोकादिप्राप्तेः पितृलोकप्राप्तिफलमस्त्येवतत्राह॥१७॥ तस्यैवभजन
स्यैवहेतोःप्रयतेतकोविदःउपरिब्रह्मपर्यंतमधःस्थावरपर्यंतंचभ्रमद्भिर्जीवैर्यन्नलभ्यते॥ षष्ठीतुपूर्ववत्तत्तुविषयसुखं
मन्यतएवप्राचीनकर्मणासर्वत्रनरकादावपिलभ्यतेदुःखवद्यथादुःखंप्रयत्नंविनापिलभ्यतेतद्वत्॥ तदुक्तंअशास्त्रीयानिदुःखानि
यथैवायांतिदेहिनां॥ सुखानितथामन्येदैन्यमत्रातिरिच्यते॥ यदुक्तं॥ यत्रक्ववाभद्रमभूदितितदुपपादयतिनवैइति॥१८॥

स्वक ५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मुकुंदसेवीजनः ज्ञातु कदाचित् संसृतिं चक्रयोगतोपि संसरति तिं नाव्रजेत् नाविशेत् ॥ यथा ह्यन्यवत् केवलकर्मनिष्ठः
वदिति वेथ मैः हि ज्ञानः ॥ कुत इत्यत आह ॥ मुकुंदांघ्र्योपगूहनमालिंगनं पुनः स्मरं विहातुं नेच्छेत ॥ यतोयं जनो रसग्र
हः ॥ येन रसनीयेन रसत्वेनैव शीघ्रं क्रियते ॥ यद्वा रसनीये यद्रसग्राहो यस्य ॥ न तु कर्मी भगवता ॥ यतते च ततो भूयः
संसिद्धौ कुरुनंदन ॥ पूर्वाभ्यासेन तेनैव क्रियते ह्यवशोपि सन्निति ॥ तदेवं भगवल्लीलाप्राधान्येवानुवर्णयेत्युक्ते
तत्र को भगवान् का वा तस्य लीला इत्यपेक्षायामाह ॥ १९ ॥ इदं विश्वं भगवानेव स तु अस्माद्विश्वस्मादितरः ईश्वरात्
ये व न पृथक् ॥ ईश्वरस्तु प्रपंचात्पृथगित्यर्थः ॥ तत्र हेतुः यतो भगवतो हेतोः जगतः स्थित्यादयो भवंति ॥ अनेनैव
लीला अपि दर्शिताः ॥ यद्वा इदं विश्वं भगवानिवेतर इव यः ॥ स जीवोपि भगवान् चेतनाचेतनप्रपंचस्तद्व्यतिरेकेण

न वै जनो जातु कथंचनाव्रजेन्मुकुंदसेव्यन्यवदंग संसृतिं ॥ स्मरन्मुकुंदांघ्र्युपगूहनं पुनर्विहातुमि
च्छेन्न रसग्रहो जनः ॥ १९ ॥ इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसंभवाः ॥ तद्धि स्वयं वेद
भवांस्तथापि वै प्रादेशमात्रं भवतः प्रदर्शितं ॥ २० ॥ त्वमात्मनात्मानमवेह्यमोघदृक् परस्य पुंसः परमा कृ२
त्मनः कलां ॥ अजं प्रजातं जगतः शिवाय यन्महानुभावाभ्युदयोधिगण्यतां ॥ २१ ॥ इदं हि पुंसस्तपसः
श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः ॥ अविच्युतोर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुव
र्णनम् ॥ २२ ॥

नास्ति मयपवैकलत्वमित्यर्थः ॥ हि शब्देन सर्वं खल्विदं ब्रह्मेत्यादिप्रमाणं सूचितं ॥ न हि स्वयमेव भवान्वेद प्रादेश
मात्रं उपदेशमात्रं आचार्यवान्पुरुषो वेदेत्यादिश्रुत्यर्थसंपादनाय प्रदर्शितं ॥ न च तत्र वाचा यापेक्ता ईश्वरावतारत्वा
दित्याह त्वमिति ॥ २१ ॥ हे अमोघदृक् त्वमात्मना स्वयमात्मानमेवाजं संतं जगतः शिवाय प्रजातमवेहि ॥ कुतः पर
स्य पुंसः कला ॥ यत्र अभूतं तत्र तस्मान्महानुभावस्य हरेरभ्युदयः पराक्रमोधिक्यपिकं गण्यतां निरूप्यतां ॥ अनेनैव तप
आदि सर्वं सफलं ... तदेवस्यादित्याह इदं हीति ॥ २२ ॥ कृनादयो भावेनिष्ठा इदमेव हि तपः श्रवणादेरविच्युतो नि
त्योर्थः फलं किं तत् उत्तमश्लोकस्य गुणानुवर्णनं यत् ॥ सत्संगतो हरिकथाश्रवणादिफलं स्वहृत्तोतेन प्रपंचपति
॥

अहं पुरा पूर्वे कल्पेऽतीते भवे पूर्वजन्मनि वेदवादिनां दास्याः सकाशादभवं जातोऽस्मि निरूपितो नियुक्तः ॥ कु योगिनां
शुश्रूषणे प्रावृषि वर्षायां लक्षिते चातुर्मास्ये निर्विविक्षतां ॥ निर्वेशमेकत्रवासं कर्तुमिच्छतां ॥ २३ ॥ अपेतान्यखिलानि
चापलानि यस्मात्तस्मिन् नियतेंद्रिये अधृतक्रीडनके त्यक्तक्रीडासाधने अनुवर्तिनि अनुकूले ॥ २४ ॥ उच्छिष्टलेपान् पात्र
लग्नान् ते हि द्विजैरनुज्ञातः सकृद्भुंजे तेन भोजनेनापास्तकिल्बिषो जातोऽस्मि ॥ तेषां धर्मे परमेश्वरभजने एवात्मनो मन
सो रुचिः प्रजायते स्मेत्यर्थः ॥ २५ ॥ अशृणवं [illegible] कृतवानस्मि श्रद्धया ममैव स्वतः सिद्धया न त्वन्येन बलाज्जनितया

अहं पुरातीतभवेऽभवं मुने दास्यास्तु कस्याश्चन वेदवादिनां ॥ निरूपितो बालक एव योगिनां शुश्रूषणे प्रा
वृषि निर्विविक्षतां ॥ २३ ॥ ते मय्यपेताखिलचापलेऽर्भके दान्तेऽधृतक्रीडनकेऽनुवर्तिनि ॥ चक्रुः कृपां यद्यपि तु
ल्यदर्शनाः शुश्रूषमाणे मुनयोऽल्पभाषिणि ॥ २४ ॥ उच्छिष्टलेपाननुमोदितो द्विजैः सकृत्स्म भुंजे तदपास्तकि
ल्बिषः ॥ एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म एवात्मरुचिः प्रजायते ॥ २५ ॥ तत्रान्वहं कृष्णकथाः प्रगायताम
नुग्रहेणाशृणवं मनोहराः ॥ ताः श्रद्धया मेऽनुपदं विशृण्वतः प्रियश्रवस्यंग ममाभवद्रुचिः ॥ २६ ॥ तस्मिं
स्तदा लब्धरुचेर्महामते प्रियश्रवस्यस्खलिता मतिर्मम ॥ ययाहमेतत्सदसत्स्वमायया पश्ये मयि ब्र
ह्मणि कल्पितं परे ॥ २७ ॥ इत्थं शरत्प्रावृषिकावृतू हरेर्विशृण्वतो मेऽनुसवं यशोऽमलं ॥ संकीर्त्यमानं मु
निभिर्महात्मभिर्भक्तिः प्रवृत्तात्मरजस्तमोपहा ॥ २८ ॥ तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः ॥ श्रद्दधा
नस्य बालस्य दान्तस्यानुचरस्य च ॥ २९ ॥

अतो मम मेत्यस्यापौनरुक्त्यं प्रियं श्रवो यशो यस्य तस्मिन्भगवति लब्धरुचेर्ममास्खलिता अप्रतिहता मतिरभवदित्यन्व
यः ॥ २७ ॥ यया मत्या परे प्रपंचातीते ब्रह्मरूपे मयि सदसत् स्थूलसूक्ष्मं च एतच्छरीरं स्वमायया स्वाविद्यया कल्पितं ॥ न
तु वस्तुतोऽस्तीति तत्क्षणमेव पश्यामि अतः सत्संग एवात्मतत्त्वशुद्धेर्हेतुरिति भावः ॥ एवं मम शुद्धे त्वंपदार्थे ज्ञाते दे
हादिकृतविक्षेपनिवृत्तेः सत्त्वकारणभूतरजस्तमोनिवर्तिका हरौ भक्तिर्जातेत्याह इत्थमिति ॥ २८ ॥ हरेर्यशोऽनु
सवं त्रिकालं ॥ २८ ॥ तस्येति शुद्धत्वंपदार्थस्य दृष्टभक्ति मनो मे प्रश्रितस्य विनीतस्य ॥ २९ ॥ ॥

रामः १८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

५२ ग्रस्तनममितिसाधनभूतेधर्मेतत्त्वज्ञानेशुश्रूषतस्मात्सर्वज्ञोविज्ञात्मा॥तेशुश्रूषतेतस्मायेश्वरस्तानंगुह्यतमंभगवतोदितंभागवतशा
स्त्रमेवाचष्टुमुपदिष्टवेतः॥ तदेवज्ञानंपूर्वोक्तंतंपदार्थतानादिवेकेनदर्शयतियेनैवेति॥ ३०॥ अविदेज्ञानदानहेतन्साधनधर्मेवहु
सं सूचितमित्याह एतदिति॥ ३१॥ तापत्रयस्याध्यात्मिकादेश्चिकित्सितंभेषजंनिवर्तकं सत्वशोधकमितियावत्॥ किंतत्भ
गवतिभावितंसमर्पितंयत्कर्मतत॥ कथंभूतेभगवतिईश्वरेसर्वनियंतरि॥ एवमपिचबन्धएवपश्चकृतद्दृष्टांतरूपेणत्रसं
सारहेतोःकर्मणःकथंतापत्रयनिवर्तकत्वं इति सामग्रीभेदेनघटतेइतिसदृष्टांतमाहद्वाभ्यां॥ ३२॥ यआमयोरोगोयेनचभूतादि
चेन्न१
तानेशुश्रूतमेयतस्मातादृभवतोदितं॥ अन्ववोचनामिष्यंतःकृपयादीनवत्सलाः॥ ३०॥ येनैवाहंभगवतोवासुदे
वस्यवेधसः॥ मायानुभावमविदंयेनगच्छंतितत्पदं॥ ३१॥ एतत्संसूचितंब्रह्मंस्तापत्रयचिकित्सितं॥ यदीश्वरेभ
गवतिकर्मब्रह्मणिभावितं॥ ३२॥ आमयोयेनभूतानांजायतेयश्चसुव्रत॥ तदेवह्यामयंद्रव्यंनपुनातिचिकित्सि
तं॥ ३३॥ एवंनृणांक्रियायोगाःसर्वेसंसृतिहेतवः॥ तएवात्मविनाशायकल्पंतेकल्पिताःपरे॥ ३४॥ यदत्रक्रियते
कर्मभगवत्परितोषणं॥ ज्ञानंयत्तदधीनंहिभक्तियोगसमन्वितं॥ ३५॥ ॥

नाजायतेतदेवकेवलमामयकारणभूतंद्रव्यंतमामयंनपुनातिननिवर्तयतीत्यर्थः॥ किंतुचिकित्सितंद्रव्यांतरैर्भावितंसत्
नाशयत्येवयथा॥ ३३॥ आत्मविनाशायकर्मनिर्हत्यैकल्पंतेसमर्थाभवंतिपरेईश्वरेकल्पिताः॥ अर्पिताःसंतःअत्रचपथ्यमेमहत्
सेवाततःतत्कृपाततस्तद्धर्मश्रद्धाततोभगवत्कथाश्रवणं॥ ततोभगवतिरतिःतयाचदेहद्वयविवेकात्मज्ञानंततोदृढाभक्तिः
ततोभगवत्तत्वविज्ञानंततस्तत्कृपयासर्वज्ञत्वादिभगवद्गुणाविर्भावइतिक्रमोदर्शितः॥ नचज्ञानेनात्मनाशकर्मनाशः॥ तत्
ज्ञानंभगवतिभक्तियोगाद्भवतिकथंकर्मणाकर्मनाशःस्यान्नाह॥ यदत्रेति॥ ३५॥ भगवदर्पणेनक्रियमाणंकर्मभक्तियोगं
जनयतिइतिसदाचारेणदर्शयति॥ ३५॥ ॥

नंकुर्वीमहि ३   ति॰

श्री भाग टी ७०

यत्रयदाभगवतःशिक्षयाकर्माणिकुर्वाणाभवंतितदाकृष्णस्यगुणनामानिगृणंति अनुस्मरंतिचकृत्स्नमित्यर्थः ॥ इयंचभगवच्छिक्षातु
गीतासुयत्करोषियदश्नासियज्जुहोषिददासियत् ॥ यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणमितिकीर्तनश्रवणरूपभक्तिहेतुत्वमुक्तं
ज्ञानहेतुत्वमाहद्वाभ्यांनमइतिनमोधीमहिमननमानम ॥ ३७ ॥ अमूर्तिकंमंत्रोक्तव्यतिरिक्तमूर्तिशून्यंयजतेपूजयति [stain] सपु॰ वेदं ४
मान्सम्यग्दर्शनोभवति ॥ एवंकृतवतिमयिहरिःस्वसदृशंतानादिदत्तवानित्याह ३८ इमंस्वनिगमंस्वोपदेशंनिगमंमयानुष्ठि
तमवेत्यज्ञात्वाभावंप्रीतिंच ॥ अतस्त्वमप्येवंकुर्वित्याहत्वमिति ॥ ३९ ॥ अदभ्रमनल्पंश्रुतंयस्यामंत्रणंहेअदभ्रश्रुतविश्रुतंविभोः

कुर्वाणायत्रकर्माणिभगवच्छिक्षयासकृत् ॥ गृणंतिगुणनामानिकृष्णस्यानुस्मरंतिच ॥ ३६ ॥ नमोभगवतेतुभ्यंवासुदे
वायधीमहि ॥ प्रद्युम्नायानिरुद्धायनमःसंकर्षणायच ॥ ३७ ॥ इतिमूर्त्यभिधानेनमंत्रमूर्तिममूर्तिकं ॥ यजतेयज्ञपुरु
षंससम्यग्दर्शनःपुमान् ॥ ३८ ॥ इमंस्वनिगमंब्रह्मन्नवेत्यमदनुष्ठितं ॥ अदान्मेज्ञानमैश्वर्यंस्वस्मिन्भावंचकेशवः ॥ ३९ ॥
त्वमप्यदभ्रश्रुतविश्रुतंविभोःसमाप्यतेयेनविदांबुभुत्सितं ॥ प्राख्याहिदुःखैर्मुहुरर्दितात्मनांसंक्लेशनिर्वाणमुशंतिना
न्यथा ॥ ४० ॥ इतिश्रीभागवतेप्रथमस्कंधेपंचमोऽध्यायः ॥ ५ ॥ सूतउवाच ॥ एवंनिशम्यभगवान्देवर्षेर्जन्मकर्मच ॥ भू
यःपप्रच्छतंब्रह्मन्व्यासःसत्यवतीसुतः ॥ १ ॥ वेदव्यासउवाच ॥ भिक्षुभिर्विप्रवसितेविज्ञानादेष्टृभिस्तव ॥ वर्तमानो
वयस्याद्येततःकिमकरोद्भवान् ॥ २ ॥ स्वायंभुवकयावृत्त्यावर्तितंतेपरंवयः ॥ कथंचेदमुदस्राक्षीःकालेप्राप्तेकले
वरं ॥ ३ ॥

येषांप्रख्याहिकथययेनविश्रुतेनवृत्तेनविदांविदुषांबुभुत्सितंबोद्धुमिष्टंसमाप्यते ॥ यतोदुःखैःपीडि[तानां]क्लेशप्रशांतिंप्रका
रांतरेणनमन्यंते ॥ ४० ॥ इतिभावार्थदीपिकायांप्रथमस्कंधेपंचमोऽध्यायः ॥ ५ ॥ व्यासस्यप्रत्ययार्थंचषष्ठेप्राग्जन्मसंभवं ॥ स्व
भाग्यंनारदःप्राहकृष्णसंकथनोद्भवं ॥ स्वयमपितच्चिकीर्षुर्गुरूपदेशानंतरंभाविनच्चरितंपृच्छतिभिक्षुभिरिति ॥ १ ॥ विप्रवसि
तेस्वदेशागमम नेकृतेसतिविज्ञानादेष्टृभिः ॥ २ ॥ परंवयउत्तरमायुःतेनत्वयाकथंवर्तितंनीतंइदमितिदासीपुत्रभूतंकलेवरमुद ६
स्राक्षीःउत्सृष्टवानसि ॥ ३ ॥

स्मा

एवं कल्पांतलक्षणः कालः ते स्मृतिं कथं न व्यवधात् न व्यवहितवान् । अडागमाभावस्त्वार्षः ॥ यतो ऽयं सर्वस्य निराकृतिः अपला-
पकस्तानेयस्मात्त्वं ॥४॥ अकारिषं कृतवानहं रेफश्च कारयोर्विश्लेषः छंदोऽनुरोधेन । ततः तावत्कंचित्कालं तत्रैव मातृस्नेहयंत्रितो-
ऽवसमित्याह त्रिभिः ॥५॥ एकात्मजा एक एवात्मजो यस्याः सा योषिन्मूढेति च स्नेहानुबंधे हेतुः ॥ किंकरीत्यस्यार्थं प्रपंचयति ॥६॥ अ-
स्वतंत्रा सा अतो न कल्पा समर्था नासीत् ॥ दारुमयी योषेति पारवश्ये दृष्टांतः ॥ स्नेहं चक्रे ॥७॥ अहं च दिगादिष्वनभिज्ञस्तत्रैव नि-
वसमित्याह ॥ अहं चेति तस्मिन्ब्रह्मकुले तस्या मातुः स्नेहानुबंधस्यावेक्षया कदाचिन्मे दितिप्रतीक्षयेत्यर्थः ॥ उषिवानवासं कृतवान्
पंचहायनः पंचवर्षः ॥८॥ गेहान्निर्गतां गां दुहंतीं हेतौ शतृप्रत्ययः दोग्धुं निर्गतामित्यर्थः ॥ सर्पः पादेन स्पृष्टः ईषदाक्रांतः अद-

प्राक्कल्पविषयामेतां स्मृतिं ते सुरसत्तम ॥ न ह्येष व्यवधात्काल एष सर्वनिराकृतिः ॥४॥ नारदः भिक्षुभिर्विप्रवसिते वि-
ज्ञानादेष्टृभिर्मम ॥ वर्तमानो वयस्याद्ये तत एतदकारिषं ॥५॥ एकात्मजा मे जननी योषिन्मूढा च किंकरी मय्यात्मजेऽ-
नन्यगतौ चक्रे स्नेहानुबंधनं ॥६॥ सास्वतंत्रा न कल्पासीद्योगक्षेमं ममेच्छती ॥ ईशस्य हि वशे लोको योषा दारुमयी यथा
७ अहं च तद्ब्रह्मकुले ऊषिवांस्तदपेक्षया ॥ दिग्देशकालाव्युत्पन्नो बालकः पंचहायनः ८ एकदा निर्गतां गेहाद्दुह-
न्तीं निशि गां पथि ॥ सर्पोऽदशत्पदा स्पृष्टः कृपणां कालचोदितः ॥९॥ तदा तदहमीशस्य भक्तानां शमभीप्सितः अनुग्र-
हं मन्यमानः प्रातिष्ठं दिशमुत्तरां ॥१०॥ स्फीतान्जनपदांस्तत्र पुरग्रामव्रजाकरान् खेटखर्वटवाटीश्च वनान्युपवनानि च ११

शदशादत ॥९॥ तदा तन्मातुर्मरणं शं कल्याणमिच्छत ईशस्यानुग्रहं मन्यमानः उत्तरां दिशं प्रातिष्ठं प्रस्थितोऽस्मि ॥१०॥ स्फीतान् जनप-
दादीनतियातः सन्नहं विपिनमद्राक्षमिति चतुर्थेनान्वयः ॥ जनपदादिषु नानाशब्दादोषश्रुतेषु समदृष्टिः सन्नानोद्धमिति वा-
त्यर्थं स्फीतान्समृद्धाञ्जनपदान्देशान् तत्र तस्यां दिशि पुरग्रामव्रजाकरान् तत्र पुराणि राजधान्यः ग्रामा भृत्यप्रोक्ताः विशाश्च
विप्रभृत्यास्त्रयश्चैव वसंतीति ॥ सत्रयामर्तिप्रोक्तः क्षुद्रार्तो वास एव चेति ॥ व्रजा गोकुलानि आकाराः रत्नाद्युत्पत्तिस्थानानि
तान् खेटः कर्षिकग्रामाः ॥ खर्वटा गिरितटग्रामा भृगुकावा ॥ एकतो यत्र ग्रामो नगरं चैकतः स्थितं ॥ मिश्रं तत्खर्वटं नाम नदी-
गिरिसमाश्रयमिति वाटाः पुष्पवाटिकाः वनानि स्वतः सिद्धवृक्षाणां समूहः ॥ उपवनानि रोपितवृक्षसमूहाः तानि च ११

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी १८

चिवैर्यान्तभिः स्वर्णमजतादिभिर्विचित्रान [illegible] द्रीं स्व ॥ रमैर्भग्रामुजामपापात्वोयेवांतेदुमायेवतान् ॥ शिवानिभद्राणिज
लाविवेषांतान्वनलिनीः सरसी ॥ १२ ॥ चित्राः स्वनायेषांतैः पत्तिभिः तन्नादप्रहृतैरित्यर्थः ॥ विभ्रमद्भिर्भ्रमरैः श्रीः शोभायासां
ताः नलिनीः ॥ १३ ॥ अतियानोविक्रमणगतः सन्महद्विपिनेवनमद्रातेकीदृशं नलुवेणशराणां स्तंभैः ऊर्शैः कीचकैः स्वग
ह्वरेंडमेभंतत्रवेणजानयपववि पुलांतरालगर्भाः कीचकाः सच्छि १४ घोरं [illegible] डः महत्प्रतिभयाकारं भयंकररूपं व्याः
लादीनामजिवंक्रीडास्थानं परिश्रांतानींद्रियाणि आत्मादेहश्च यस्य सन्नृपापरीतो व्याप्तः ॥ १५ ॥ उपस्पृश्याचांतः पिप्पलो

चित्रधातुविचित्राद्रीनिभभग्नभुजद्रुमान् ॥ जलाशयान्शिवजलान्नलिनीः सुरसेविताः ॥ १२ ॥ चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियः ॥ नलवेणुशरस्तंभकुशकीचकगह्वरे ॥ १३ ॥ एक एवातियातोहमद्राक्षं विपिनं महत् ॥ १४ घोरं प्रतिभयाकारं व्यालोलूकशिवाजिरं ॥ परिश्रांतेंद्रियात्माहं तृट्परीतो बुभुक्षितः ॥ १५ ॥ स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः ॥ तस्मिन्निर्मनुजेरण्ये पिप्पलोपस्थ आश्रितः ॥ १६ ॥ आत्मनात्मानमात्मस्थं यथाश्रुतमचिंतयम् १७ ॥ ध्यायतश्चरणांभोजं भावनिर्जितचेतसा ॥ औत्कंठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः ॥ १८ ॥ प्रेमातिभरनिर्भिन्नपुलकांगोतिनिर्वृतः ॥ आनंदसंप्लवे लीनो नापश्यमुभयं मुने १९ रूपं भगवतो यत्तन्मनःकांतं शुचापहं ॥ अपश्यन्सहसोत्तस्थे वैक्लव्याद्दुर्मना इव ॥ २० ॥ दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि ॥ वीक्षमाणोपि नापश्यमवितृप्त इवातुरः ॥ २१ ॥ एवं यतंतं विजने मामाहागोचरो गिराम् ॥ गंभीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव ॥ २२ ॥

आश्रितः १

पस्थेश्वत्थमूले उपविष्टः आत्मनाबुद्ध्या आत्मस्थं हृदिस्थं आत्मानं परमात्मानं ॥ १७ ॥ भावेन भक्त्या निर्जितं वशीकृतं यच्चे
तस्तेनौत्कंठ्येन अश्रुकलाकुले अक्षिणी यस्य सतस्य मे शनैर्हरिर्हृदि प्रादुर्भूतः ॥ १८ ॥ प्रेम्णोतिभरेण निर्भिन्नपुलकानि अंगा
नि यस्यानंदात्मा संप्लवे महापूरेउभयमात्मानं परं च ॥ १९ ॥ मनसः कांतमभीष्टं शुचापहं शोकस्य नाशकं हंत तीर्ण तथा तत उत्तस्थे
उत्थितोस्मि ॥ २० ॥ हृदि मनः प्रणिधाय स्थिरीकृत्यावितृप्तोऽहमातुर इवाभवमिति शेषः ॥ २१ ॥ गिरामगोचरः संवेदनस्या
विषयभूत इत्यर्थः ॥ २२ ॥ १८

मध्यशकं ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ईश्वरोऽहंतेति सानुकंपप्रबोधनेमाइतिमां द्रष्टुंनार्हसीत्यतोनविपक्वादग्धाःकषायामलाःकामादयोयेषांतेषांकुयोगिनामनिष्पन्न योगानांदुर्दर्शःअप्रत्यक्षःअतस्त्वंहिदृष्टोसितथाह ॥२३॥ सकृद्दर्शितंमयेतियत्एतत्कामायमय्यनुरागायत्वत्कामेनकिमित्य तआह मत्कामःशनैःसाधुःसर्वान्हृच्छयान्कामान्मुंचति ॥२३॥ सतांसेवयादीर्घयापिअदीर्घयापिअवद्यंनिंद्यंलोकंदेहंहित्वामज्जनतांमत्पार्षदतां गंतासि ॥२४॥ प्रजानांसृष्टौसर्गेनिरोधेसंहारेपिप्रजासर्गस्यनिरोधेइतिवा ॥२५॥ तत्प्रसिद्धंमहद्भूतंमहतोभूतस्यनिःश्वसितमेतद्यदृग्वेदइतिश्रुतेःकीदृशंईश्वरंसर्वनियंतारंनभसिलिंगंमूर्तिर्यस्यतत्नभोलिंगंसन्निहितमपिलिंग्यतेज्ञायतेलिंगं

हंतास्मिन्जन्मनिभवान्मामांद्रष्टुमिहार्हति ॥ अविपक्वकषायाणांदुर्दर्शोहंकुयोगिनां ॥२२॥ सकृद्यद्दर्शितंरूपमे तत्कामायतेनघ ॥ मत्कामःशनकैःसाधुःसर्वान्मुंचतिहृच्छयान् ॥२३॥ सत्सेवयादीर्घयातेजातामयिदृढामतिः हित्वावद्यमिमंलोकंगंतामज्जनतामसि ॥२४॥ मतिर्मयिनिबद्धेयंनविपद्येतकर्हिचित् ॥ प्रजासर्गनिरोधेपि स्मृतिश्चमदनुग्रहात् ॥२५॥ एतावदुक्त्वोपररामतन्महद्भूतंनभोलिंगमलिंगमीश्वरं ॥ अहंचतस्मैमहतांमही यसेशीर्ष्णावनामंविदधेनुकंपितः ॥२६॥ नामान्यनंतस्यहतत्रपःपठन्गुह्यानिभद्राणिकृतानिचस्मरन् ॥ गांपर्य टंस्तुष्टमनागतस्पृहःकालंप्रतीक्षन्विमदोविमत्सरः ॥२७॥ एवंकृष्णमतेर्ब्रह्मन्नसक्तस्यामलात्मनः ॥ कालः प्रादुरभूत्कालेतडित्सौदामिनीयथा ॥२८॥

नलिंग्यतेइत्यलिंगंतस्मैअहंहृष्टायअवनामंप्रणामंविदधेकृतवान्अहं ॥ तेनानुकंपितःसन्सह ॥२६॥ त्यक्तलज्जःसन्विमत्स रोजातोस्मीतिशेषः ॥२७॥ कालेस्वावसरेकालोमृत्युः ॥ प्रादुरभूत्प्राविर्भूतःकस्मादाविर्भावितदृष्टांतःतडिदिवेतिसौदामि नीतिविशेषणंस्फुटत्वप्रदर्शनार्थंसुदामामालातत्रभवासौदामिनीमालाकारेत्यर्थः ॥ यद्वासुदामापर्वतःतेनैकदिगिति कथ्यतेयोरितिनैकत्रस्मरणात्प्रेतिकेप्रादुर्भूतोसौदामिनीवत् ॥२८॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी
३९

प्रयुज्यमाने मयि तामित्ययमन्वार्थः ॥ हित्वावद्यमिमं लोकं गंतामज्जनतामसीति या भागवती भगवत्पार्षदरूपा शुद्धा सत्वमयी
तनुः प्रतिश्रुता तां प्रति भगवता मयि प्रयुज्यमाने नीयमाने आरब्धं यत्कर्म तन्निर्वाणं समाप्तं यस्यारब्धकर्मणः निर्वाणमिव
निर्वाणं यस्येति वा सः पंचभूतात्मको देहो न्यपतत् अनेन पार्षदतनूनामकर्मारब्धत्वं शुद्धत्वं नित्यत्वं इत्यादि सूचितं भवति । २९
इदं त्रैलोक्यमादायोपसंहृत्योदन्वत एकार्णवस्यांभसि शयाने श्रीनारायणे शिशयिषोः शयनं कर्तुमिच्छोः विभोर्ब्रह्मणोंतः
र्मध्यमनुप्राणं निश्वासेन सह विविशे प्रविष्टोहं आत्मनेपदमार्षं ॥ ततोवतीर्य विश्वात्मा देहमाविश्य चक्रिणः अवाप वै

प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुं ॥ आरब्धकर्मनिर्वाणो न्यपतत्पांचभौतिकः ॥ २९ कल्पांत इदमादाय शयानेंभ
स्युदन्वतः ॥ शिशयिषोरनुप्राणं विविशेंतरहं प्रभोः ॥ ३० ॥ सहस्रयुगपर्यंत उत्थायेदं सिसृक्षतः ॥ मरीचिमिश्रा ऋ
षयः प्राणेभ्योहं च जज्ञिरे ॥ ३१ ॥ अंतर्बहिश्च लोकांस्त्रीन्पर्येम्यस्कंदितव्रतः ॥ अनुग्रहान्महाविष्णोरविघातगतिः क्व
चित् ॥ ३२ ॥ देवदत्तामिमां वीणां स्वरब्रह्मविभूषितां ॥ मूर्छयित्वा हरिकथां गायमानश्चराम्यहं ॥ ३३ ॥ प्रगाय
तः स्ववीर्याणि तीर्थपादो प्रियश्रवाः ॥ आहूत इव मे शीघ्रं दर्शनं याति चेतसि ॥ ३४ ॥ एतद्ध्यातुरचित्तानां मात्रास्प
र्शेच्छया मुहुः ॥ भवसिंधुप्लवो दृष्टो हरिचर्यानुसेवनं ॥ ३५ ॥ यमादिभिर्योगपथैः कामलोभहतो मुहुः ॥ मुकुंद
सेवया यद्वत्तथात्माद्धा न शाम्यति ॥ ३६ ॥ ॥

ष्णवीं निद्रामेकीभूयाथ विष्णुनेति कूर्मोक्तेः स्वायनेंभसि पाठे स्वस्यायनेंभसि शिशयिषोर्ब्रह्मण इति श्रीनारायणे
नाभेदं विवक्षयोक्तमिति गमयितव्यं ॥ ३० ॥ प्राणेभ्य इंद्रियेभ्योहं मरीचिमिश्रास्तन्मुख्या ऋषयश्च जज्ञिरे स्वसृष्टमि ॥ ३१ ॥ ये
कर्मिणस्ते बहिर्यांति तापत्रयादिभिर्ब्रह्मलोकं गताः अंतर्न यांति ॥ अहं तु महाविष्णोरनुग्रहादखंडितब्रह्मचर्यव्रतः सन्नंतर्ब
हिश्च पर्येमि पर्यटामि क्वचिदप्यविघाता प्रतिहतागतिर्यस्य सः ॥ किमिति पर्यटसीश्वरात्तया लोकमंगलार्थमित्यत आह
चनामिं ॥ ३२ ॥ देवेनेश्वरेण दत्तां स्वराः ॥ निषादर्षभगांधारषड्जमध्यमधैवतपंचमश्चेति सप्त ॥ ॥

चकृतोब्रह्म
णः २
३९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तपस्तत्त्वस्वरूपाभिव्यंजकत्वात्तेनविभूषिता। स्वतःसिद्धसप्तस्वरा इत्यर्थः॥ मूर्छयित्वामूर्छनालापपूर्वंनीत्वाप्रगायंतातिस्वप्रयोजनमाह॥ ३३॥ परप्रयोजनमाह यातद्विरिति॥ मात्राविषयास्तेषांस्पर्शाभोगास्तेषामिच्छयायेआतुराणिचित्तानितेषां तेषांहरिवीर्यानुवर्णनंयदेतदेवभवसिंधोःसंसारस्यपोतः नकेवलंश्रुतिप्रमाणेनकिंत्वन्वयव्यतिरेकाभ्यांदृष्टएवेत्यर्थः॥ एत देवस्वानुभवेनद्रढयति॥३५॥ यमादिभिःनयानशाम्यतियथामुकुंदसेवयाअद्धासाक्षात्॥ आत्मामनःशा म्यतिकथंचिन्मुकुंदसेवामात्रेणशाम्यतिकिंपुनःतद्गुणवर्णनेनेतिभावः॥३६॥ इतिपूर्वपत्रस्यटीका॥ भवतोमनःपरितोषकं

सर्वंतदिदमाख्यातंयत्पृष्टोहंत्वयानघ॥ जन्मकर्मरहस्यंमेभवतश्चात्मतोषणं॥३७॥ सूतः॥ एवंसंभाष्यभगवा न्नारदोवासवीसुतं॥ आमंत्र्यवीणांरणयन्ययौयादृच्छिकोमुनिः॥३८॥ अहोदेवर्षिर्धन्योयंयत्कीर्तिंशार्ङ्गधन्व नः॥ गायन्माद्यन्निदंतंत्र्यारमयत्यातुरंजगत्॥३९॥ इतिश्रीभागवतेप्रथमस्कंधेषष्ठोध्यायः ६ शौनकः निर्गतेनारदेसूतभगवान्बादरायणः॥ श्रुतवांस्तदभिप्रेतंततःकिमकरोद्विभुः १ सूतउवाच ब्रह्मनद्यांस रस्वत्यामाश्रमःपश्चिमेतटे॥ शम्याप्रासइतिप्रोक्तऋषीणांसत्रवर्धनः २ तस्मिन्स्वआश्रमेव्यासोबदरीषंड मंडिते॥ आसीनोपउपस्पृश्यप्रणिदध्यौमनःस्वयं ३ ॥ नर्म

व्याख्यातं॥३७॥ आमंत्र्यआपृच्छ्ययादृच्छिकःस्वप्रयोजनसंकल्पशून्यः हरिकथागायकभाग्यंश्लाघयति॥ अहोइति॥३८ मा द्यन्हृष्यन्॥ तंत्र्यावीणया॥३९॥ इतिश्रीभावार्थदीपिकायांप्रथमस्कंधेषष्ठोध्यायः॥६॥ अथभागवतश्रोतुर्जन्मवक्तुःप रीक्षितः॥ सप्तमेबालवधाद्द्रौणेर्दंडःसमर्प्यते॥ तस्यनारदस्याभिप्रायंश्रुतवान्सन्॥१॥ ब्रह्मनद्यांब्राह्मणैरन्वितायांब्रह्मदे वत्यायांवा॥ सत्रंकर्मवर्धयतीतितथा॥२॥ बदरीणांसमूहेनषंडेनमंडितेमनःप्रणिदध्यौस्थिरीचकारसमाधिनाऽस्मरेति नारदेनोपदिष्टंधर्मंवक्तुमनानित्यर्थः॥३॥ ॥ २ १

नं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रणिहितेनिश्चले ॥ अतएवभक्तियोगेनामले पूर्वंपुरुषमीश्वरमपश्यदित्यर्थः ॥ पूर्णंईश्वरमितिवापाठः तदपाश्रयामीश्व
राश्रयांतदधीनांमायांचापश्यत् ॥ ईशमायाकृतांतांचजीवानांसंसृतिमपश्यदित्याह ॥ ४ ॥ ययासंमोहितःस्वरूपावरणेन
नविदितमःपरोपित्रिगुणव्यतिरिक्तोपितत्कृतंत्रिगुणात्माभिमानकृतमनर्थंचकर्तृत्वादिकंप्राप्नोति ॥ ५ ॥ अनर्थोपशमम
नीतियदधोक्षजेभक्तियोगःतंचापश्यत् एतत्सर्वंस्वयंदृष्ट्वाएवमजानतोलोकस्यार्थेसात्वतसंहितांश्रीभागवताख्यांचक्रे
तदनेनश्लोकद्वयेनभागवतार्थःसंक्षेपतोदर्शितः ॥ ५ ॥ संहितायाअनर्थोपशमकत्वंदर्शयति ॥ यस्यांश्रूयमाणायांइति

भक्तियोगेनमनसिसम्यक्प्रणिहितेमले अपश्यत्पुरुषंपूर्णंमायांचतदपाश्रयां ॥ ४ ॥ ययासंमोहितोजीवआ
त्मानंत्रिगुणात्मकं ॥ परोपिमनुतेनर्थंतत्कृतंचाभिपद्यते ॥ ५ ॥ अनर्थोपशमंसाक्षाद्भक्तियोगमधोक्षजे लो
कस्याजानतोविद्वांश्चक्रेसात्वतसंहितां ॥ ६ ॥ यस्यांवैश्रूयमाणायांकृष्णेपरमपूरुषे ॥ भक्तिरुत्पद्यतेपुंसःशोक
मोहभयापहा ॥ ७ ॥ ससंहितांभागवतींकृत्वानुक्रम्यचात्मजं ॥ शुकमध्यापयामासनिवृत्तिनिरतंमुनिः ॥ ८ ॥
शौनकउवाच ॥ सवैनिवृत्तिनिरतःसर्वत्रोपेक्षकोमुनिः ॥ कस्यवामहतीमेतामात्मारामःसमभ्यसत् ॥ ९ ॥

किं

अनःस्कृतायामित्यर्थः ॥ अनुक्रम्यशोधयित्वा एतदुक्तंभवतिविद्याशक्त्यामायानियंतानित्याविर्भूतपरमानंदस्वरूपः
सर्वज्ञःसर्वशक्तिरीश्वरःतन्माययासंमोहितःतिरोभूतस्वरूपस्तद्विपरीतधर्माजीवः ॥ तस्यचेश्वरभक्त्यालब्धज्ञाने
नमोक्ष इति ॥ तदुक्तंस्वामिनाह्लादिन्यासंविदाश्लिष्टः ॥ सच्चिदानंदईश्वरः ॥ स्वाविद्यासंवृतोजीवःसंक्लेशनिकराक
रः तथा ॥ सईशोयद्वशेमायासजीवोयस्तयार्दितः ॥ स्वाविर्भूतपरानंदःस्वाविर्भूतसुदुःखभूः ॥ स्वादृगुत्थविपर्या
सभवभेदजभीशुचः ॥ यन्माययाजुषन्नास्तेतमिमंनृहरिंनुमः इत्यादि ॥ ८ ॥

निवृत्ताः क्रोधाहंकाररूपो ग्रंथिर्येषां ते २

निर्ग्रंथाः ग्रंथेभ्यो निर्गताः तदुक्तं गीतासु ॥ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ॥ तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य चे-
ति यद्वार्थग्रंथिरेव ग्रंथः निर्गतस्तदयग्रंथो येभ्यस्ते इत्यर्थः ॥ ननु मुक्तानां किं भक्त्या इत्यादि सर्वाक्षेपपरिहारार्थमाह इत्थंभूतगुण
इति ॥ ननु भक्तिं कुर्वंतु नाम एतच्छास्त्राभ्यासे पुनः कस्य किं कारणमित्याह हरेरिति ॥ १० ॥ अध्यगादधीतवान् विष्णुजनाः प्रि-
या यस्येति वा एवंनादिप्रसंगेन तत्संगतिकाम इति भावः ॥ एतेन तस्य पुत्रो महायोगी इत्यादिना पृष्टकथाख्यानेप्रश्नत्रिः
कस्यमिति यत्तदुक्तं तस्योत्तरं उक्तं एवं यत्तु उक्तं परीक्षितः प्रायोपवेशेन श्रवणं कथमिति ॥ तस्य जन्म महाश्चर्यमित्यादिना
तस्योत्तरं वक्तुमाह परीक्षित इति ॥ ११ ॥ विलापयन्नित्युक्तिं वा संस्थां महाप्रस्थाने ॥ श्रीकृष्णकथानामुदयो यथा भवति

सूत उवाच ॥ आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे ॥ कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ॥ १० ॥ हरेर्गु-
णाक्षिप्तमतिर्भगवान्बादरायणिः ॥ अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः ॥ ११ ॥ परीक्षितोथ राजर्षे-
र्जन्मकर्मविलापनं ॥ संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयं ॥ १२ ॥ यदा मृधे कौरवसृंजयानां वीरेष्वथो-
वीरगतिं गतेषु ॥ वृकोदराविद्धगदाभिमर्शभग्नोरुदंडे धृतराष्ट्रपुत्रे ॥ १३ ॥ भर्तुः प्रियं द्रौणिरिति स्म पश्य-
न्कृष्णासुतानां स्वपतां शिरांसि ॥ उपाहरद्विप्रियमेव तस्य जुगुप्सितं कर्म विगर्हयंति ॥ १४ ॥ ॥

यदुक्तं तस्य जन्म परीक्षितः प्रायोपवेशनं मरणं कथमिति तस्य १

तथा परीक्षितो जन्मनि रूपयिष्यन्नादौ तावद्गर्भस्थस्य एव अश्वत्थाम्नो ब्रह्मास्त्रात्कृष्णेन रक्षित इति वक्तुं कथां प्रस्तौति यदे-
त्यादि ॥ १२ ॥ यदा द्रौणिरश्वत्थामा द्रौपदीपुत्राणां शिरांस्युपाहरत्तदा तन्माता रुदती ॥ तां च सांत्वयन् किरीटमाली अर्जुन इ-
त्याहेति तृतीये नान्वयः ॥ किमिति बालानां शिरांसि आनीतवानित्यपेक्षायामाह ॥ मृधे युद्धे यद्यपि पांडवाः कौरवा एव
तथापि संज्ञाभेदेन धृष्टद्युम्नः पांडवानां सेनापतिरिति सृंजयानामित्युक्तं ॥ वीरगतिं स्वर्गगतिं प्राप्याध्यनंतरं वृकोदरेणावि-
द्धया क्षिप्तया गदाया अभिमर्शेन घातेन भग्नावूरुदंडौ यस्य ॥ तथाभूते धृतराष्ट्रपुत्रे दुर्योधने सति ॥ १३ ॥ भर्तुर्दुर्योधनस्य
स्मेति वितर्के इति एवं स्वामतः इति पश्यन् न तु हि प्रियमेवेति वाक्यांतरेण विप्रियत्वे हेतुः जुगुप्सितमतिघोरं दुःसहं यथा भवति

४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी २१

वाद्यस्यकलाभिर्विडंबितः॥ आकुलेऽश्रुक्लिन्नेणीयस्याः साकिंकरीदस्यैकत्वेपितद्याणोबद्धत्वात्किरीटमालीसतो॥ १५॥ स्व
वःशोकास्रूणिप्रमृजामिपरिमार्जयामियद्यदाब्रह्मबंधोर्ब्रह्मणपथमस्याततायिनइति॥ अग्निदोगरदश्चैवशस्त्रपा
णिर्धनापहः॥ क्षेत्रदारहरश्चैवषडेतेह्याततायिनः॥ इतिस्मरणात्॥ अथाततायीशस्त्रपाणिःतेनवधेदोषःनत्वेलक्ष्यते
गांडीवाद्युत्तमौकैर्विशिखैर्बाणैरुपाहरेत्तत्समीपमुपनयामि॥ यत्रशिरआक्रम्यासनेविधायदग्धपुत्रास्नास्यसि॥ १६॥ वल्गु
वीरस्याविचित्राजल्पाभाषणानितैःसमर्जनःअच्युतएवमित्रंसूतःचयस्यदंसितो॥ बद्धकवचउग्रंधनुर्यस्यकपि
ध्वजःमानवधूनेयस्यसः उग्रः पुत्रेरथेनानयावत्॥ १७॥ आपतंतमुथावंतंसद्रोणिःकुमारहाबालघातीप्रकंपितहृदयः

त

मातास्तनानांनिधनेशिशूनांनिशाम्यघोरंपरितप्यमाना॥ तदारुदद्बाष्पकलाकुलाक्षीतांसांत्वयन्नाहकि
रीटमाली॥ १५॥ तदाशुचस्तेप्रमृजामिभद्रेयद्ब्रह्मबंधोःशिरआततायिनः॥ गांडीवमुक्तैर्विशिखैरुपाहरे
त्वाक्रम्ययत्स्नास्यसिदग्धपुत्रा॥ १६॥ इतिप्रियांवल्गुविचित्रजल्पैःससांत्वयित्वाच्युतमित्रसूतः॥ अन्वाद्रु
वद्दंसितउग्रधन्वाकपिध्वजोगुरुपुत्रंरथेन॥ १७॥ तमापतंतंसविलक्ष्यदूरात्कुमारहोद्विग्नमनारथेन
पराद्रवत्प्राणपरीप्सुरुर्व्यांयावद्गमंरुद्रभयाद्यथार्कः॥ १८॥

प्राणपरीप्सुःप्राणांलब्धुमिच्छुः॥ उर्व्यांयावद्गमंयावच्छक्यंतावद्दूरंपराद्रवत्पलायत॥ कोब्रह्मामृगोभूत्वास्वसुतां
मभिगत्वायतःसत्ररुद्रस्यभयाद्यथापलायतेयथापलायतार्कइतिवापाठे॥ वामनपुराणकथास्तुविनातथाहिविद्यु
न्मालीनामराक्षसोमाहेश्वरःकश्चित्॥ तस्मैरुद्रेणसौवर्णंविमानंदत्तं॥ ततोसावर्कस्यपृष्ठतोभ्राम्यन्विमानदीप्त्या
रात्रिंविलोपितवान्॥ ततोर्केणनिजतेजोभिर्द्रावयित्वातद्विमानंपातितं॥ ततःक्रुद्धाकुपितेरुद्रेभयादर्कःपराद्रवत्
ततोरुद्रस्यकरदत्तैर्दह्यमानःपतन्वाराणस्यांपतितःलोलार्कनाम्नाविख्यातोजातः॥ १८॥ ॥ २१

अशरणं स्वं रक्षितं [illegible] नतु पलायनमेव रक्षकमस्ति न तस्यापि उचितत्वात् इत्याह ॥ श्रां
तवाजिनो यस्य तेब्रह्मशिरोऽस्त्रं ब्रह्मास्त्रं द्विजात्मजः इत्युदीप्रदर्शितमाह ॥१९॥ तत् ब्रह्मास्त्रं समाहितः सन् तथापि तउ
पसंहारमजानन्नपि संधाने हेतुः प्राणकृच्छ्र इति ॥२०॥ ततो [illegible] सर्वतो दिशं प्रकटीभूतं तेजोभिप्रेक्ष्य ततः प्राणापद
मभिप्रेक्ष्य कृष्णं तवि तापयितं प्रथयमस्त्येनेति ॥२१॥ संसारनेहं तोदह्यमानानां तस्मा अपवर्गो ॥ अपवर्जयिता नाशक इत्यर्थः
॥२२॥ यतः त्वमीश्वरः साक्षात् कुतो यतः प्रकृतेः परः पुरुषः ॥ तत्कुतो यत आद्यः कारणं कारणत्वेऽपि अविकारितामाह
मायां व्युदस्याभिभूय कैवल्यरूपे आत्मन्येव स्थित इति त्रिवर्गदातापि त्वमेवेत्याह स इति ॥२३॥ यस्त्वं मायामभिभूय

यदाशरणमात्मानमैक्षत श्रान्तवाजिनं ॥ अस्त्रं ब्रह्मशिरो मेने आत्मत्राणं द्विजात्मजः ॥१९॥ अथोपस्पृ
श्य सलिलं संदधे तत्समाहितः ॥ अजानन्नपि संहारं प्राणकृच्छ्र उपस्थिते ॥२०॥ ततः प्रादुरभूत्तेजः प्रचं
डं सर्वतो दिशं ॥ प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह ॥२१॥ अर्जुन उवाच ॥ कृष्ण कृष्ण महाभाग भक्ताना
मभयंकर ॥ त्वमेको दह्यमानानामपवर्गोऽसि संसृतेः ॥२२॥ त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः ॥ मा
यां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ॥२३॥ स एव जीवलोकस्य मायामोहितचेतसः ॥ विधत्से स्वेन
वीर्येण श्रेयो धर्मादिलक्षणं ॥२४॥ तथायं चावतारस्ते भुवो भारजिहीर्षया ॥ स्वानां चानन्यभावानामनु
ध्यानाय चासकृत् ॥२५॥ किमिदं स्वित्कुतो वेति देवदेव न वेद्म्यहं ॥ सर्वतो मुखमायाति तेजः परमदारुणं
श्रीभगवानुवाच ॥ वेत्थेदं द्रोणपुत्रस्य ब्राह्ममस्त्रं प्रदर्शितं नैवासौ वेद संहारं प्राणबाध उपस्थिते ॥२७॥

स्थितः स एव मायाभिभूतस्य जनस्य धर्मादिफलमुपासितः सन् ॥ विधत्से वीर्येण प्रभावेण तथा चानेनावता
रेण स्वसाधुपत्तया तोलक्ष्यते इत्याह तथेति ॥२४॥ किं भूभारहरणं मदिच्छामात्रेण न भवति तत्राह स्वानां चाति
मतां भक्तानामनुध्यानाय तथानन्यभावानामेकान्तभावानां चैवं स्तुत्वा अस्त्रेण न वितापयति ॥२५॥ किमात्मकमि
दं कुतो वायातीति विचिकित्सिते ॥२६॥ इदं द्रोणपुत्रस्य ब्रह्मास्त्रं तेन च प्राणबाधे प्राप्ते प्रदर्शितं केवलं न तु तत्त्वयो
गेकुशल इत्यर्थः ॥ यतोऽसावुपसंहारं न वेद एतत्त्वं त्वं वेद जानासि ॥२७॥
रामायनमः ॥

श्री॰
भा॰ ग॰
प्र॰ टी॰
२२

प्रत्यवकर्षणे नेह्रुपायं न करोति निवर्तने क्षमितिभयं ॥ अतस्तत् स्वतेजसा त्वं ब्रह्मसुष्टं टंवत्सास्त्वं तेजसैव जहि त्वातथा
तस्य प्रतीपास्त्वं तदुपसंहृत्य स्वयमेव शाम्येत ॥ पतस्त्वमस्त्रतोसि ॥ २४ ॥ परेशानवत्स्यैव वीराः नात्र हंतीति तथा
फल्गुनोर्जुनः अथ सः स्पृष्ट्वा आचम्य तं श्रीकृष्णं परिक्रम्य प्रदक्षिणीकृत्य ब्रह्मास्त्राय ब्रह्मास्त्रं निवर्तयितुं ॥ २५ ॥ तत
स्तोभयोर्ब्रह्मास्त्रयोः तेजसी शरैः संहृत्य संवेष्टितेपरस्परं मिलित्वा वहृथा तेजसा वर्धतां किंकृत्वा याभ्यां दृश्य
मानेनव्याप्ततेजसा तेजसीशोरेः संवृते ... सोवमेते दीर्घं चाहह्य यथा प्रलयसमये अथ स्याः संकर्षणमुखात्मरूपतिष्ठिता तः अर्कसु संहृत्य वर्धतेन दह्यत्
र॰ ॥ तयोर्द्वयोरप्यंहेन योस्तेन दह्यमानाः [illegible] प्रजाः प्रलयाग्निमममंसे निरे ॥ ३० ॥ लोकानां व्यामयं व्यतिकर

नदृश्यान्यतमं किं विद्वंसं ब्रह्मवकर्षणं ॥ ज्ञात्वा त्वं तेनउत्रह्म मस्त्रत्तोत्यस्त्र तेजसा ॥ २८ ॥ स्ततउवाच अ
त्वा भगवता शोकं फाल्गुनः परवीरहा ॥ स्पृष्ट्वा पस्तं परिक्रम्य ब्राह्मं ब्राह्माय संदधे ॥ २९ ॥ संहत्यान्योन्यमु
भयोस्तेजसी शरसंवृते आवृत्य रोदसी खं च ववृधातेर्कवह्निवत् ॥ ३० ॥ दृष्ट्वास्त्रतेजस्तु तयोस्त्रीन्लोका
न्प्रदहन्महत् दह्यमानाः प्रजाः सर्वाः सांवर्तकममंसत ॥ ३१ ॥ प्रजोपद्रवमालक्ष्य लोकव्यतिकरं च तं
मतं च वासुदेवस्य संजहारार्जुनो द्वयं ॥ ३२ ॥ तत आसाद्य तरसा दारुणं गौतमीसुतं ॥ बबंधामर्षताम्रा
क्षः पशुं रसनया यथा ॥ ३३ ॥ शिबिराय निनीषंतं रज्ज्वा बद्ध्वा रिपुं बलात् ॥ प्राहार्जुनं प्रकुपितो भगवा
नंबुजेक्षणः ॥ ३४ ॥ मैनं पार्थार्हसि त्रातुं ब्रह्मबंधुमिमं जहि ॥ योसावनागसः सुप्तानवधीन्निशि
बालकान् ॥ ३५ ॥ मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडं ॥ प्रपन्नं विरथं भीतं न रिपुं हंति धर्मवित् ॥ ३६ ॥

विनाशमित्यर्थः वासुदेवस्य मतं चालक्ष्य ब्रह्मास्त्रद्वयमुपसंहृतवान् ॥ ३२ ॥ गौतमवंशजा गौतमी कृ
पीतस्याः सुतं अमर्षेण कोपेनताम्रेक्षिणी यस्य सः निबद्ध्य पनेदर्शनात् पशुमेयथेति तस्य बंधनं धर्मसंत्यज
दृष्टातः यथाया जिकः ॥ पशुमिति रशनया रज्ज्वा ॥ शोकरोषादियुक्तस्यापि अर्जुनस्य धर्मनिष्ठां ख्यापयता
यश्रीकृष्णवाक्यं तदाहृषद्भिः ॥ ३३ ॥ शिबिराय स्वा राजनिवेशाय नेतुमिच्छंतं प्रकुपित इति ॥ ३४ ॥ अनागसो
निरपराधान् रिपोरपि सुप्तस्य बालस्य च वधो न धर्म इत्यस्यार्थे दर्शीयति मत्तमिति ॥ ३५ ॥ मत्तं मद्यादिना
प्रमत्तमनवहितं उन्मत्तं ग्रहवातादिना जडं मंदं यमं प्रपन्नं शरणागतं विरथं भग्नरथं ॥ ३६ ॥ ॥ ॥

प्रोटस्की ८

सत १

श्रीमा॰
२२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तद्वधो दंडरूपः तस्यैव श्रेयः पुरुषार्थः॥ यद्यतो दंडप्रायश्चित्तरहितात् दोषात्स पुमान् अधो याति। तथा च स्मर्यते
राजभिर्धृतदंडास्तु कृत्वा पापानि मानवाः॥ विधूतकल्मषा यांति स्वर्गं सुकृतिनो यथेति ३७॥ तदसौ वध्यतां पाप आ
ततायी ३८॥ यद्यपि चोदितः तथापि हंतुं नैव हन्तुं आत्महननं पुत्रहंतारं महान् ४५॥ गोविंदः प्रियः सारथिर्यस्य अ
त्मजानुशोचंत्यै ४५ तथा परिभावेनाह तमानीतं कर्मणा जुगुप्सितेन दोषेण॥ बाल्यमपकृतं अपकारिणं कृ
पया निरीक्ष्य वामः शोभनः स्वभावो यस्याः॥ सा ननाम उवाच चेति चकारद्वयेन संभ्रमः सूचितः बंधनेनानयनमस्य

स्वप्राणान्यः परप्राणैः प्रभुत्वात् ग्रहणं खलः॥ तद्वधस्तस्य हि श्रेयो यद्दोषाद्यात्यधः पुमान् ३९ प्रति
श्रुतं च भवता पांचाल्यै शृण्वतो मम॥ आहरिष्ये शिरस्तस्य यस्ते मानिनि पुत्रहा॥ ३८॥ तदसौ वध्यतां पाप
आततायी आत्मबंधुहा॥ भर्तुश्च विप्रियं वीर कृतवान् कुलपांसनः॥ ३९॥ एवं परीक्षता धर्मं पार्थः कृष्णेन
चोदितः॥ नैच्छद्धंतुं गुरुसुतं यद्यप्यात्महनं महान्॥ ४०॥ अथोपेत्य स्वशिबिरं गोविंदप्रियसारथिः
न्यवेदयत्तं प्रियायै शोचंत्या आत्मजान्हतान्॥ ४१॥ तथाहृतं पशुवत्पाशबद्धमवाङ्मुखं कर्मजुगुप्सि
तेन॥ निरीक्ष्य कृष्णापकृतं गुरोः सुतं वामस्वभावा कृपया ननाम च॥ ४२॥ उवाच चासहंत्यस्य बंधनानय
नं सती॥ मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः॥ ४३॥ सरहस्यो धनुर्वेदः सविसर्गोपसंयमः अस्त्र
ग्रामश्च भवता शिक्षितो यदनुग्रहात्॥ ४४॥ स एष भगवान्द्रोणः प्रजारूपेण वर्तते॥ तस्यात्मनोऽर्धं पत्न्या
स्ते नान्वगाद्वीरसूः कृपी॥ ४५॥ तद्धर्मज्ञ महाभाग भवद्भिर्गौरवं कुलं वृजिनं नार्हति प्राप्तुं पूज्यं वंद्यम
भीक्ष्णशः॥ ४६॥ मा रोदीदस्य जननी गौतमी पतिदेवता॥ यथाहं मृतवत्सार्ता रोदिम्यश्रुमुखी मुहुः ४७

हंती असहमाना॥ ४३॥ सरहस्यो योगोपमंत्रसहितः विसर्गोऽस्त्रप्रयोगः उपसंयम उपसंहारः॥ ताभ्यां सहितोऽस्त्र
समूहः॥ ४४॥ किंच तस्य द्रोणस्य आत्मा देहः तस्यार्धं रूपी आस्ते अर्धत्वे हेतुः पत्नी अर्धो वा एष आत्मनो यत्पत्नीति श्रुतेः
नैयायानी अग्निमादधीयीतामिति श्रुतेरुभयोरेकाकारत्वाच्च रामार्थ्यं नानुमतेन्विष्टे कृष्णसाजीवतीत्याह नान्व
गच्छतोऽसंयतो वीरसूः पुत्रवती॥ ४५॥ तस्माद्गुरोः कुलं भवद्भिर्वृजिनं दुःखं प्राप्तुं नार्हति यतो वंद्यं पूज्यं च॥ ४६॥ मृतवत्सा

स्तनपुत्रा विपत्ते दोषमाहुर्यैरिति ४७ ॥

श्री० भाग० प्रटी० २३

तेषां मन्यानां कुलेकमंकथ भूतं सानुबंधं सपरिवारं ॥ शुचा शोकेनापि तन्यामंत्र्य ब्रह्मकुलं कदं प्रदहति ॥ ४८ ॥ धर्म्य
मित्यादयो वचसः षट् गुणाः पूर्वश्लोकेभ्यो दृष्टव्याः ॥ तत्र धर्म्यं धर्मादनपेतं प्रुच्यनात्प्रुच्यतामितिन्यायान्न्याय्यं दृनये पक्षपातशून्यं ३
तेसंवदतस्यमित्यादि सकरुणं तस्मात्मनोर्थमिति ॥ ३ ॥ निर्व्यलीकं नद्रुमत्तेति ॥ ४ ॥ समं मा रोदीदिति दुःखसाम्याके
५ ॥ महत्त्वं यैः कोपि न सितिति निष्टुरीक्रियाद्विनोपदेशात् ॥ ६ ॥ एवंभूतं राज्ञी वचो हि द्विजाः प्रत्यनंदन् ॥ अनुमोदितवान् ४९
नकुलादयश्च प्रत्यनंदन् युयुधानं सात्यकिः ॥ ५० ॥ तस्य तथाविधस्य द्रोणिं वधयवश्रेष्ठत्व प्रत्यासन्नरकपातप्रसंगा
त् तदाहनभवेदिति अहन्नजग्वान ॥ ५१ ॥ चतुर्भुजो कृष्णो रथभावः भीमपनेहं हेषहते द्रौपद्याश्च सहसा तत्त्रिवारऐप्र

यैः कोपितं ब्रह्मकुलं राजन्यैरजितात्मभिः ॥ तत्कुलं प्रदहत्याशु सानुबंधं शुचार्पितं ॥ ४८ ॥ सूत उवाच ॥ धर्म्यं
न्याय्यं सकरुणं निर्व्यलीकं समं महत् ॥ राजा धर्मसुतो राज्ञ्याः प्रत्यनंदद्वचो द्विजाः ॥ ४९ ॥ नकुलः सहदेवश्च
युयुधानो धनंजयः ॥ भगवान्देवकीपुत्रो ये चान्ये याश्च योषितः ॥ ५० ॥ तत्राहामर्षितो भीमस्तस्य श्रेयान्वधः
स्मृतः ॥ न भर्तुर्नात्मनश्चार्थे योहन्सुप्तान्शिशून्वृथा ॥ ५१ ॥ निशम्य भीमगदितं द्रौपद्याश्च चतुर्भुजः ॥ आ
लोक्य वदनं सख्युरिदमाह हसन्निव ॥ ५२ ॥ श्रीभगवानुवाच ॥ ब्रह्मबंधुर्न हंतव्य आततायी वधार्हणः ॥ म
यैवोभयमाम्नातं परिपाह्यनुशासनं ॥ ५३ ॥ कुरु प्रतिश्रुतं सत्यं यत्तत्सांत्वयता प्रियां ॥ प्रियं च भीमसेनस्य
पांचाल्या मह्यमेव च ॥ ५४ ॥ सूत उवाच ॥ अर्जुनः सहसाज्ञाय हरेर्हार्दमथासिना ॥ मणिं जहार मूर्धन्यं द्वि
स्या०१ जस्य सहमूर्धजं ॥ ५५ ॥ विमुच्य रशनाबद्धं बालहत्याहतप्रभं ॥ तेजसा मणिना हीनं शिविरान्निरयापयत् ॥ ५६

वृत्त्यापायश्च भूयोः ॥ संवारणार्थं विक्षत ॥ चतुर्भुजः संदिहानस्य सख्युरर्जुनस्य ॥ ५२ ॥ वधार्हणः वधार्हो मया एव शास्त्र
कृतानामाम्नायेन हंतव्यः ॥ तथा आततायिनमायांतमपि वेदांतपारगं जिघांसंतं जिघांसीयान्न तेन ब्रह्महा भवेत् ३ या
निवदतानतु भयमनुशासनमनुपालय ॥ ५३ ॥ उवाच प्रतिज्ञातं हरयेति प्रियां सांत्वयता यत्ताल्वपायत्प्रतिश्रुतं हननेन
तत्सत्यं कुरु मम ॥ तद्वधे भीमस्य प्रियं भवति अवधं द्रौपद्याः इत्येकस्य सम ॥ ५४ ॥ हार्दमभिप्रायमाज्ञाय यत्ता मूर्द्धन्यं २
त्वानस्यावाक्यद्वयं विदध्यात् ॥ अतोऽयमभिप्रायः इति ज्ञात्वेत्यर्थः ॥ असिनावच्छेदेन मूर्ध्नि भिन्नात् सकेशं ॥ ५५ ॥ तेज
सा मणिना च हीनं निरयापयत् निःसारितवान् ॥ अनेन क्रमेण सर्वं संपादितमित्याह ॥ ५६ ॥ ॥ राम २३

निर्हरणं दाहाद्यर्थं नयनं ॥ ५८ ॥ इति श्रीभावार्थदीपिकायां प्रथमस्कंधे सप्तमोध्यायः ॥ ७ ॥ अथाष्टमे कृपिताद्द्रौणेरस्त्राद्दत्ता
परीक्षितः ॥ श्रीकृष्णस्य च स्तुतिः कुंत्या राज्ञः शोकश्च कीर्त्यते ॥ तेषामुवाच ॥ संपरेतानां मृतानां गंगायामुदकं दातुं सकृष्णाः
कृष्णेन सहिताः स्त्रियः पुरस्कृत्य अग्रतः कृत्वा तस्मिन्कार्ये स्त्रीपुरःसरत्वविधानात् ॥ १ ॥ निनीयदत्त्वा हरिपादाब्जरजो
भिः पूतायाः सरितो गंगायास्तस्या जले पुनर्ग्रहणं दाहादावपि स्नातानां गम्यते ॥ २ ॥ कुरुपतिं युधिष्ठिरं सानुजं भीमादिभिः सहि

वपनं द्रविणादानं स्नानात्रिर्यापणं तथा ॥ एवं हि विप्रबंधूनां वधो नान्योस्ति दैहिकः ॥ ५७ ॥ पुत्रशोकातुराः स
र्वे पांडवाः सह कृष्णया ॥ स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकं ॥ ५८ ॥ इति श्रीभागवते प्रथमस्कंधे स
प्तमोध्यायः ॥ ७ ॥ सूत उवाच ॥ अथ ते संपरेतानां स्वानामुदकमिच्छतां दातुं सकृष्णा गंगायां पुरस्कृत्य
ययुः स्त्रियः ॥ १ ॥ ते निनीयोदकं सर्वे विलप्य च भृशं पुनः ॥ आप्लुता हरिपादाब्जरजःपूतसरिज्जले ॥ २
तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजं ॥ गांधारीं पुत्रशोकार्तां पृथां कृष्णां च माधवः ॥ ३ ॥ सांत्वयामास मु
निभिर्हतबंधूञ्शुचार्दितान् ॥ भूतेषु कालस्य गतिं दर्शयन्नप्रतिक्रियां ॥ ४ ॥ साधयित्वाजातशत्रोः स्वराज्यं
कितवैर्हृतं ॥ घातयित्वासतो राज्ञः कचस्पर्शक्षतायुषः ॥ ५ ॥ याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्प
कैः ॥ तद्यशः पावनं दिक्षु शतमन्योरिवातनोत् ॥ ६ ॥ आमंत्र्य पांडुपुत्रांश्च शैनेयोद्धवसंयुतः ॥ द्वैपायनादि
भिर्विप्रैः पूजितैः प्रतिपूजितः ॥ ७ ॥ गंतुं कृतमतिर्ब्रह्मन्द्वारकां रथमास्थितः ॥ उपलेभेभिधावंतीमुत्तरां
भयविह्वलां ॥ ८ ॥ पाहि पाहि महायोगिन्देवदेव जगत्पते ॥ नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परम् ॥ ९ ॥ ॥

तं च ॥ मुनिभिः सहितः ॥ ४ ॥ कितवैर्धूर्तैर्द्यूतादिभिर्दौपद्याः कचग्रहणादिभिः क्षतं नष्टमायुर्येषां तान् ॥ ५ ॥ याजयि
त्वेत्यादि भाविकथासंक्षेपः शतमन्योः शतक्रतोरिव ॥ ६ ॥ शैनेयः शिनेर्नप्ता सात्यकिः तेन उद्धवेन च संयुतः ॥ रथमास्थि
तः सन् ॥ ७ ॥ उत्तरां परीक्षिन्मातरमभिमुखं धावंतीमुपलेभे ददर्श ॥ ८ ॥ उत्तरा श्रीकृष्णं प्रार्थयते पाहि पाहीति द्वाभ्यां
अन्यस्तु प्रार्थनायोग्यो नास्तीत्याह त्वत्तोन्यमभयं भयरहितं न पश्यामि यत्र लोके परस्परं मृत्युः भवति तत्र प्रस्तुतं भयमा

युधिष्ठिरं ५

॥ भागवतटीका २ ॥

श्री भाग टी २४

अभिद्रवति अभिमुखमायाति तप्तमायसं लोहमयं शल्यं यस्य सः ॥ अतिकार्पण्यमाह काममिति कामं यथेष्टं मां दहतु मे गर्भो मा
निपात्यतां ॥१०॥ सोऽयमुपोद्घातो [illegible] ॥ यस्मादेवनातिक्रुपितस्य द्रौणेः पांडवध्वंसमिदं विश्वं कर्तुं प्रहितं ब्रह्मास्त्रं अबुध्यत ॥
अतएव बहून् स्वकांन् दृष्ट्वा गात्रमित्युक्तं ते हि स्वब्रह्मास्त्रस्यास्त्रांतरेरनिवर्त्यत्वात् ॥१२॥ तदुपसंहरति व्यसनं वीक्ष्य अनन्यविषयात्मा-
नां येषां स्वकनिर्मितानामित्यर्थः ॥१३॥ वैराट्या उत्तरायाः अंतःस्थः सन् गर्भमावृतवान् तत्र हेतुः यतः आत्मा अंतर्यामी योगेश्वरः इति
वहिः स्थस्यापि [illegible] पांडवानामपि कुरुवंशजत्वादेव [illegible] ॥१४॥ अमोघमप्रतिक्रिय

अभिद्रवति मामीश शरस्तप्तायसो विभो ॥ कामं दहतु मां नाथ मा मे गर्भो निपात्यतां ॥१०॥ सूत उवाच ॥ उपधार्य वच
२१ स्तस्या भगवान्भक्तवत्सलः ॥ अपांडवमिदं कर्तुं द्रौणेरस्त्रमबुध्यत ॥११॥ तर्ह्येवाथ मुनिश्रेष्ठ पांडवाः पंच सायः
कान् ॥ आत्मनोऽभिमुखान्दीप्तानालक्ष्यास्त्राण्युपाददुः ॥१२॥ व्यसनं वीक्ष्य तत्तेषामनन्यविषयात्मनां ॥ सुद
र्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः ॥१३॥ अंतःस्थः सर्वभूतानामात्मा योगेश्वरो हरिः ॥ स्वमायया
वृणोद्गर्भं वैराट्याः कुरुतंतवे ॥१४॥ यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियं ॥ वैष्णवं तेज आसाद्य समशा
म्यद्भृगूद्वह ॥१५॥ मा मंस्था ह्येतदाश्चर्यं सर्वाश्चर्यमयेऽच्युते ॥ य इदं मायया देव्या सृजत्यवति हंत्यजः ॥१६॥
ब्रह्मतेजोविनिर्मुक्तैरात्मजैः सह कृष्णया ॥ प्रयाणाभिमुखं कृष्णमिदमाह पृथा सती ॥१७॥ कुंत्युवाच
नमस्ये पुरुषं त्वाद्यमीश्वरं प्रकृतेः परं ॥ अलक्ष्यं सर्वभूतानामंतर्बहिरवस्थितं ॥१८॥ मायाजवनिकाच्छन्न
मज्ञाधोक्षजमव्ययं ॥ न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा ॥१९॥ ॥

च समशाम्यत् संप्रांतमासीत् ॥१५॥ एतद्ब्रह्मास्त्रप्रशमनं आश्चर्यं मा मंस्थाः मा मन्यस्व ॥१६॥ कृष्णया सह ॥१७॥ त्वा त्वां
नमस्ये नमस्करोमि न तु केनचित् मां नमस्करोषीत्याह आद्यं पुरुषं कुतः प्रकृतेः परं तत्र हेतुः ईश्वरं प्रकृतेरपि नियंतारं
अतएव सर्वभूतानामंतर्बहिश्च पूर्णत्वेनावस्थितं ॥ तथाप्यलक्ष्यं तत्र हेतुमाह मायेति ॥१८॥ मायैव जवनिका तिरस्क
रिणी तया छन्नं अतोऽज्ञा भक्तियोगानभिज्ञा [illegible] केवलं न नमस्यामि अधोक्षजं तेनायसानमधोक्षजे अव्ययमपरिच्छिन्नं
तत्र येवं ॥ मूढदृशा देहाभिमानिना अतस्त्वं न लक्ष्यसे ॥१९॥ ॥ ग्रंथः ॥

२४

किंच परमहंसानामात्मानात्मविवेकिनां ततो मुनीनां मननशीलानामपि ततश्चामलात्मनां निवृत्तरागादीनामपि
तथ्यातेन निजमहिम्ना नलक्ष्यसे ॥ अतो भक्तियोगं विधातुं त्वां वयं कथं हि पश्येम यद्वा परमहंसानामपि भक्तियोग
विधानार्थं त्वामात्मारामाणामप्याविर्भूय निजगुणैराकृष्य भक्तियोगं कारयितुमवतीर्णमित्यर्थः ॥२०॥ ज्ञानमन्तो
ऽशक्यत्वमुक्त्वा पुनः केवलं नमस्करोति ॥ श्रीकृष्णायेति द्वाभ्यां ॥२१॥ पंकजं नाभौ यस्य पंकजानां माला अस्ति यस्य पं
कजवत्समनेत्रे नेत्रे यस्य पंकजांकितौ अंघ्री यस्य तस्मै ततः कृतोपकारमनुस्मरति यथेति द्वाभ्यां ॥२२॥ अयमर्थः मात
तोपि ममाधिका तव प्रीतिः ॥ तथाहि हे हृषीकेश यथा देवकी कंसेन रुद्धा त्वया विमोचिता अत्राहं च तथैव

तथा परमहंसानां मुनीनाममलात्मनां ॥ भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः ॥२०॥ कृष्णाय
वासुदेवाय देवकीनंदनाय च । नंदगोपकुमाराय गोविंदाय नमो नमः ॥२१॥ नमः पंकजनाभाय नमः पं
कजमालिने । नमः पंकजनेत्राय नमस्ते पंकजांघ्रये ॥२२॥ यथा हृषीकेश खलेन देवकी कंसेन रुद्धाति
चिरं शुचार्पिता ॥ विमोचिताहं च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणात् ॥२३॥ विषान्महाग्नेः पुरु
षाददर्शनादसत्सभाया वनवासकृच्छ्रतः ॥ मृधे मृधेनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेभिरक्षि
ताः ॥२४॥ विपदः संतु नः शश्वत्तत्र तत्र जगद्गुरो ॥ भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम् ॥२५॥

किं मोचितेनेति काक्वा महाविशेषमुक्तः ॥ तं विशेषं दर्शयति सा तु चिरं रुद्धा सती तस्मादेव सकृद्विमोचिता
तथा च शुचार्पिता च सती न च तस्याः पुत्रा रक्षिता अस्ति वान्यो नाथस्तस्या मम त्वेति न किंचल्पवं तथाहं अद्य हि
विपद्गणात्त्वयापि मुहुः प्रीत्यैव सात्मजा च त्वयैव नाथेनेति विपद्गणमेव दर्शयति ॥२३॥ विषात् भीमस्य विषमयमो
दकदानात् महाग्नेर्जतुगृहदाहात् ॥ पुरुषादा हिडिंबादयो हि राक्षसाः ॥ तेषां दर्शनात् असत्सभायाः तस्यानात
त अभिनो रक्षिता आस्म भवाम आस्म ॥२४॥ या नस्तास्तु विपत्सु कीदृशं दर्शनं नास्ति पुनर्भवोपि भवद्दर्शने यस्मात् अथ
वा अपुनर्भवं मोक्षं दर्शयतीति यस्मात् ॥ ननु संपत्स्वेव परमेश्वरदर्शनं युक्तं स्वस्य चित्रत्वात् ततः किं विपदः प्रार्थ्यन्ते

श्री॰
भा॰ ग॰
प्र॰ टी॰
२५

गुणवृत्तये २

जन्मसत्कुले जन्मादिभिरेधमानो मदो यस्य सः ॥ अभिधातुं श्रीकृष्ण गोविंदेति वक्तुमपि अकिंचनानां गोचरं विष
यभूतं अस्तु न मनोरथ्य हृत्वणाय प्रणमति नमस्यति ॥ २६ ॥ अकिंचना भक्ता एव वित्तं सर्वस्वं यस्य तस्मै नमः । किं निवृत्ता
गोधर्मार्थकामविषया यस्मात् ॥ तस्मै उ त आत्मारामाय तत्कुतः शांताय रागादिरहिताय किंच कैवल्यपतये
कैवल्यं दातुं समर्थाय ॥ २७ ॥ ननु देवकीपुत्रं मां कथमेवं स्तोषि तत्राह मन्ये त्वामिति ॥ मन्ये त्वां कालं न तु देवकीपु
त्रं तत्र हेतुः ईशानं नियंतारं अनादिनिधनं आद्यंतशून्यं विभुं प्रभुं समं यथा भवति तथा सर्वत्र चरंतं ननु पार्थसा
रथ्यः कथं समस्त्वमित्यत्राह ॥ यद्यतः त्वत्तो निमित्तभूतात् भूतानामेव मिथः कलिः कलहो भवति ॥ न तु स्वतः त्व

जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान् ॥ नैवार्हत्यभिधातुं वै त्वामकिंचनगोचरं ॥ २६ ॥ नमोकिंचन
वित्ताय निवृत्तगुणवृत्तये ॥ आत्मारामाय शांताय कैवल्यपतये नमः ॥ २७ ॥ मन्ये त्वां कालमीशानमनादि
निधनं विभुं ॥ समं चरंतं सर्वत्र भूतानां यन्मिथः कलिः ॥ २८ ॥ न वेद कश्चिद्भगवंश्चिकीर्षितं तवेहमानः
स्य नृणां विडंबनं ॥ न यस्य कश्चिद्दयितोस्ति कर्हिचिद्द्वेष्यश्च यस्मिन्विषमा मतिर्नृणां ॥ २९ ॥ जन्म क
र्म च विश्वात्मन्नजस्याकर्तुरात्मनः ॥ तिर्यङ्नृषिषु यादस्सु तदत्यंतविडंबनं ॥ ३० ॥ गोप्याददे त्वयि कृता
गसि दाम तावद्या ते दशाश्रुकलिलांजनसंभ्रमाक्षं ॥ वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमो
हयति भीरपि यद्बिभेति ॥ ३१ ॥

पि वैषम्यं ननु निग्रहानुग्रहरूपं अपि समपि वैषम्यं प्रसिद्धं मनः आह ॥ न वेदेति ॥ २९ ॥ नृणां विडंबनं अनुकरणं ईह
मानस्य कुर्वतः यस्मिंस्त्वयि विषमा मतिः अनुग्रहनिग्रहरूपा भवति ॥ ३० ॥ अजस्य जन्म अकर्तुः कर्म तिर्यक्षु वराहा
दिरूपेण नृषु रामादिरूपेण ऋषिषु वामनादिरूपेण यादस्सु मत्स्यादिरूपेण तद्विडंबनमत्याश्चर्यमित्याह गो
प्येति ॥ ३१ ॥ गोपी यशोदा त्वयि कृतागसि दधिभांडस्फोटनकृतवति यावद्दाम रज्जुं आदत्ते बंधनायाह ॥ तावत्त्वत्तेण
मेव या ते दशा वस्था सा मां विमोहयति किंभूतस्य अश्रुकलिलं अश्रुमिश्रं अंजनं ययोः नेत्रयोः [illegible] लोचने संभ्रमेण
व्याकुले ताभ्यां यस्मिन् तद्वक्त्रं निनीय अधः कृत्वा नाट्यिष्यतीति अत एव भयस्य भावनया स्थितस्य यद्यतस्त्वत्तः

भीतिविदंभीतामवलितमनसे दृष्टा सा ॥

पा॰ सा॰
२५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अतएवअजान्मोहनतयाउक्तैर्यत्नात्तवजन्मादिवहुधावर्णयंतीत्याहकेचिदितिचतुर्भिः ॥ पुण्यश्लोकस्ययुधिष्ठिरस्यकीर्त-
येयदोरेवकीर्तयइतिवा ॥ मलयस्येवकीर्तयेयथाचंदनमिति [illegible] तथा ॥ ३२ ॥ वसुदेवस्यभार्यायांदेवक्यामजएव-
त्वमभ्यगात्प्रकटत्वमितिशेषः ॥ अपरपक्षप्रवेषः त्वार्थः अभवत्वमितिवापाठः स्वागमः ताभ्यामेवपूर्वंस्वतपः ॥ इत्थंभूम्या-
भ्योयाचितःसन् ॥ ३३ ॥ अ[illegible]स्यजगतःक्षेमायात्मभुवेति ॥ ब्रह्मप्रार्थनस्यप्राधान्यविवक्षयामतांतरं ॥ ३४ ॥ परमानंदस्व-
रूपात्तानमविद्यातनोदेहाद्यभिमानात्कामः ॥ ततःकर्माणितैः ॥ क्लिश्यतांक्लिश्यमानानांतन्निवृत्तयेश्रवणाद्यर्हाणिकर्मा-
णिकरिष्यन् ॥ अस्यपक्षस्यसिद्धांतत्वमभिप्रेत्यश्रवणादिफलमाहशृण्वंतीतिनंदंतिअन्यैःकीर्त्यमा[illegible]नमभिनंदंतिये-

केचिदाहुरजंजातंपुण्यश्लोकस्यकीर्तये ॥ यदोःप्रियस्यान्ववायेमलयस्येवचंदनं ॥ ३२ ॥ अपरेवसुदेवस्यदे-
वक्यांयाचितोभ्यगात् ॥ अजस्त्वमस्यक्षेमायवधायचसुरद्विषां ॥ ३३ ॥ भारावतारणायान्येभुवोनावइवोद-
धौ ॥ सीदंत्याभूरिभारेणजातोह्यात्मभुवार्थितः ॥ ३४ ॥ भवेस्मिन्क्लिश्यमानानामविद्याकामकर्मभिः ॥ श्रव-
णस्मरणार्हाणिकरिष्यन्नितिकेचन ॥ ३५ ॥ शृण्वंतिगायंतिगृणंत्य[illegible]भीक्ष्णशःस्मरंतिनंदंतितवेहितं
जनाः ॥ तएवपश्यंत्यचिरेणतावकंभवप्रवाहोपरमंपदांबुजं ॥ ३६ ॥ अप्यद्यनस्त्वंस्वकृतेहितप्रभोजिहास
सिस्वित्सुहृदोनुजीविनः ॥ येषांनचान्यद्भवतःपदांबुजात्परायणंराजसुयोजितांहसां ॥ ३७ ॥ ॥

जनाईहितंचरितंतावकंत्व[illegible]दीयंपदांबुजंतएवपश्यंत्येवाचिरेणैवेतिचसर्वत्रावधारणं ॥ कीदृशंभवप्रवाहस्यजन्म
परं[illegible]परायाउपरमोयस्मिंस्तत् ॥ इदानींतवास्मत्परित्यागोनउचितइतिआशयेनाहअपीतिचतुर्भिः ॥ ३६ ॥ हेप्रभोस्व-
हृदोनुजीवि[illegible]नोस्मानद्यापिस्वित्त्यक्तुंजिहाससि ॥ येषामस्माकमन्यत्परायणंनैवास्तितानेतो ॥ राजसुयोजितमंहोद्रोहःयैस्ते-
तेषांस्वानांकृतमीहितमपेक्षितंयेनेतिसंबोधनंविसर्गांतपाठेत्वंपदविशेषणं ॥ ननुतवबांधवोया[illegible]दवाःपुत्राःपां-
डवाःशूराःसमर्थाश्चतान्किंकार्पण्यमाईयसेअतआहकेवयमिति ॥ ३७ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी

यर्ह्यभवतः अदर्शनं यदा त्वमस्मान्न पश्यसि । तदा नाम्ना विद्यमाना रूपेण समृद्धाश्च यदुभिः सहिताः पांडवाः ॥ नामके वयं नके
यि अनिरुद्धा इत्यर्थः ॥ नामेत्यत्र दृष्टान्ते हृषीकाणामीशितुर्जीवस्याऽदर्शने यथा न किंचिन्नाम रूपं च तद्वत् ॥ ३८ ॥ किं च यथेदानी
मियमस्मत्पाल्या भूमिः स्वैरसाधारणैर्वज्राङ्कुशादिभिर्लक्षणैर्विलक्षितैश्चिह्नितैः ॥ त्वत्पादैरंकिता सती भाति तद्वत्तदा न विय
ति गेते सति न शोभिष्यते ॥ ३९ ॥ अपि च इमे जनपदा देशाः स्वृद्धाः समृद्धाः संतः ॥ गमने पांडवानामकुशलमगमने यादवा
नामित्युभयतो व्याकुलचित्ता सती ॥ ते पुत्रेष्वहनि स्नेहं त्यक्तुं प्रार्थयते प्राह अथेति ॥ ४० ॥ विश्वेशेत्यादि संबोधनानि स्नेहच्छेदे
सामर्थ्यख्यापनाय दृढं स्नेहं ततः किमत आह त्वयीति ॥ ४१ ॥ अनन्यविषया सती मे मतिस्त्वयि रतिमुद्वहतादविच्छिन्नां

केवयं नामरूपाभ्यां यदुभिः सह पांडवाः ॥ भवतोऽदर्शनं यर्हि हृषीकाणामिवेशितुः ॥ ३८ ॥ नेयं शोभिष्यते भूमि
र्यथेदानीं गदाधर ॥ त्वत्पदैरंकिता भाति स्वलक्षणविलक्षितैः ॥ ३९ ॥ इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः
वनाद्रिनद्युदन्वंतो ह्येधंते तव वीक्षितैः ॥ ४० ॥ अथ विश्वेश विश्वात्मन्विश्वमूर्ते स्वकेषु मे ॥ स्नेहपाशमिमं
छिंधि दृढं पांडुषु वृष्णिषु ॥ ४१ ॥ त्वयि मेऽनन्यविषया मतिर्मधुपतेऽसकृत् ॥ रतिमुद्वहतादद्धा गंगेवौघमुदन्व
ति ॥ ४२ ॥ श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य ॥ गोविंद गोद्विजसुरार्तिहरावता
र योगेश्वराखिलगुरो भगवन्नमस्ते ॥ ४३ ॥ सूत उवाच ॥ पृथयेत्थं कलपदैः परिणूताखिलोदयः ॥ मंदं जहास वैकुंठो

प्रीतिं करोत्वित्यर्थः ॥ ओघं प्रवाहं यथा गंगा प्रतिबंधं न गणयति ॥ एवमपि मतिर्विघ्नान्न गणयत्विति भावः एवमभ्यर्थ्य
पुनः प्रणमति ॥ ४३ ॥ हे कृष्णेति नमः ॥ उपकारान्स्मरंतीव बहुधा संबोधयति ॥ कृष्णसख अर्जुनस्य सखे वृष्णीनाम्
ऋषभश्रेष्ठ ॥ अवनिध्रुक्षु ये राजन्यास्तेषां वंशस्य दहन अनपवर्गवीर्य अक्षीणप्रभाव गोविंद प्राप्तकामधेनु द्विजसुराणा
मार्तिहरो ऽवतारो यस्येति ॥ ४३ ॥ कलानि मधुराणि पदानि येषु तैर्वाक्यैः परिणूतोऽखिलो महिमा उदयः यस्य सः ॥ गृणता
वितस्मान्नमिणतेति वक्ष्यदीर्घं दोर्बलं पृथेन मंदमीषत् ॥ तस्य हास एव माया तया च वदति ॥ हासो जनोन्मादकरी च माये

॥ श्री ॥

२६

त्वग्रिमेनन्यविषया मतिरितिय स्त्रार्थितं तत्हाढमित्यंगीकृत्य रथस्यानाद्भूजसाह्वयमागत्यपञ्चानांश्च यो र्मापास्त्रस्तभद्राप्रमु
खांस्त्रिय उपामेर्यत्रिस्तायस्तयुरंयास्यनुर्थिष्टिरेणप्रेमणा चैवकं चित्कालं निवसे हेति संशाथ्ये निवारितः ॥ अथभीमनि
र्याणमहोत्सवं वक्तुं उद्योद्भूतकथां प्रस्तौति ॥ ४८ ॥ व्यासाद्यैः प्रतिबोधितो पि मुच्यमानः सन्नाबुध्यत विवेकं न प्राप्तजन
ईश्वरेहा तैः स्वमकभीमनिर्याणमहोत्सवाय राजा सहकृष्णदेवेन गतवांस्तन्मार्गवेनायं प्रबोधनीय इति ईश्वराभिप्रायः
कार्येहृदयविलापकः तमजानन्निवित्यर्थः ॥ श्रीकृष्णेनापि इतिहासैः प्रबोधितो नाबुध्यत तत्र हेतुः ॥ अद्भुतकर्मणा यया क्रकृष्ण
उवसंस्थानावैगतो पियथोचितमेवबदन्नपि विश्रमेवद्दृढीकृतवान् ॥ एवमज्ञापि बोध यन्नबोधमेवदृढ्नीचकारेत्यर्थः ॥ अबो
धमेवप्रपंचयति षड्भिः ॥ ४९ ॥ प्राकृतेनात्मनाविश्वप्रातः ॥ ५० ॥ पारक्यस्य प्रवमृगालाया हास्यदेहस्या
तद्धाढमित्यपामेत्रप्रविश्यगजसाह्वयं ॥ स्त्रियश्च स्वपुरंयास्यत्प्रेमणा राज्ञा निवारितः ॥ ४८ ॥ व्यासाद्यैरीश्वरेहासैः
कृष्णेनाद्भुतकर्मणा ॥ प्रबोधितो पीतिहासैर्नाबुध्यत शुचार्पितः ॥ ४९ ॥ आहराजाधर्मसुतश्चिंतयत्सुहृदांवधम्
प्राकृतेनात्मनाविप्राः स्नेहमोहवशंगतः ॥ ५० ॥ अहो मे पश्यताज्ञानं हृदिरूढंदुरात्मनः ॥ पारक्यस्यैव देहस्य
बह्व्यो मे क्षौहिणीर्हताः ॥ ५१ ॥ बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः ॥ नमेस्यान्निरयान्मोक्षो ह्यपिवर्षशतायु
तैः ॥ ५२ ॥ नैनोराज्ञः प्रजाभर्तुर्धर्मयुद्धेवधोद्विषां ॥ इतिमेनंतुबोधायकल्पतेशासनंवचः ॥ ५३ ॥
[illegible]मेमयावह्वोक्षौहिण्यो हताः ॥ अक्षौहिणी प्रमाणं श्रीव्यासेनोक्तं ॥ अक्षौहिणीप्रसंख्याता रथानां द्विजसत्तमाः ॥ संख्या
गणानतत्त्वज्ञैः सहस्राण्येकविंशतिः ॥ शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः ॥ गजानां च प्रसंख्यानमेतावदिह कीर्तितं
॥ ज्ञेयं शतसहस्रं तु सहस्राणि नवैव तु ॥ नराणामपि पंचाशच्छतानि त्रीणि चैव हि ॥ पंचषष्टिसहस्राणि तथाश्वानां
शतानि च ॥ दशोत्तराणि षट्प्राहुः संख्यातत्त्वविदो जनाः ॥ एतामक्षौहिणीं प्राहुर्यथावदिह संख्ययेति ॥ ५१ ॥ स्वतः सर्वथा
॥ भवतीतियत्प्रजा[illegible]नेशितास्तदेवं वचः कृतोनकल्पते बोधायेत्यर्थतत्र हेतुःप्रजाभर्तुरेव न तदोषश्रुतिचेतन्नाहनैनोराज्ञ इति ॥ ५२ ॥ द्विषां वधे एनःपापं न
मन्यतोतवधे[illegible]केऽयोधनेनेशं जायां पाल्यमानानामयाराज्यतोऽभिनव्रहतनानाप्रपमेवेदं ज्ञातमिति ॥ ५३ ॥ ॥ ॥ ॥

२१८७० रथा
२१८७० गजा
१०९३५० पदा
६५६१० अश्वाः
२१८७०० जोड़

तद्धर्मोऽनुज्ञातः १ · यरलव

युद्धे स्वस्वधर्मो भवत्तेनायमधर्मः ॥ स्त्रीणां मद्धतानां बंधवो यावन्तो मां द्रोहाय द्विष्टौ समुत्थितः ॥ तं व्यपोहितुं अपाकर्तुं कल्पः
समर्थो नाहं गृहमेधीयैर्गृहाश्रमिभिर्विहितैः ॥ न तु च सर्वं पाप्मानं तरति ब्रह्महत्यां च योऽश्वमेधेन यजते य उ चैनमेवं वेदेति श्रु
तेः ॥ पापमश्वमेधेन न यपोहितुं कथं इत्याशंक्याविवेकाविजृंभितमेव हेतुवादमाश्रित्य निराकरोति यथेति ॥ ५१ ॥ यथा पंकेन पंके
पंकांभो न मृज्यते यथा वा सुरालेपकृतं मद्यभाण्डं सुरया न मृज्यते तथैवं भूतहत्यामेकां प्रमादतो जातां बुद्धिपूर्वं

स्त्रीणां मद्धतबंधूनां द्रोहो योऽसाविहोत्थितः ॥ कर्मभिर्गृहमेधीयैर्नाहं कल्पो व्यपोहितुं ॥ ५१ ॥ यथा पंकेन पंकां
भः सुरया वा सुराकृतं ॥ भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति ॥ ५२ ॥ इति श्रीभागवते प्रथमस्कंधेऽष्टमोऽध्यायः
८ ॥ सूत उवाच ॥ इति भीतः प्रजाद्रोहात्सर्वधर्मविवित्सया ॥ ततो विनशनं प्रागाद्यत्र देवव्रतोऽपतत् ॥ १ ॥ तदा ते
भ्रातरः सर्वे सदश्वैः स्वर्णभूषितैः ॥ अन्वगच्छन्रथैर्विप्रा व्यासधौम्यादयस्तदा ॥ २ ॥ भगवानपि विप्रर्षे रथेन
सधनंजयः ॥ स तैर्व्यरोचत नृपः कुवेर इव गुह्यकैः ॥ ३ ॥ दृष्ट्वा निपतितं भूमौ दिवश्च्युतमिवामरं ॥ प्रणेमुः पांड
वा भीष्मं सानुगाः सह चक्रिणा ॥ ४ ॥ तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तम ॥ राजर्षयश्च तत्रासन्द्रष्टुं भरतपुंगवं ॥ ५
पर्वतो नारदो धौम्यो भगवान्बादरायणः ॥ बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ॥ ६ ॥ वसिष्ठ इंद्रप्रमदस्त्रितो
गृत्समदोऽसितः ॥ कक्षीवान्गौतमोऽत्रिश्च कौशिकोऽथ सुदर्शनः ॥ ७ ॥ अन्ये च मुनयो ब्रह्मन्ब्रह्मरातादयोऽमलाः ॥ शि
ष्यैरुपेता आजग्मुः कश्यपांगिरसादयः ॥ ८ ॥ तान्समेतान्महाभागानुपलभ्य वसूत्तमः ॥ पूजयामास धर्मज्ञो देश
कालविभागवित् ॥ ९ ॥

हिंसा यायैर्यज्ञैर्मार्ष्टुं शोधयितुं नार्हतीति ॥ ५२ ॥ इति श्रीभावार्थे प्रथमस्कंधेऽष्टमोऽध्यायः ॥ ८ ॥ युधिष्ठिराय भीष्मेण सर्व
धर्मनिरूपणं ॥ हरिस्तुतिश्च मुक्तिश्च नवमे तस्य वर्ण्यते ॥ यदर्थं श्रीकृष्णेन तस्याविवेको वर्धितः तद्दर्शयति इतीति सर्वधर्मा
णां विविदिषया वेदितुमिच्छया विनशनं कुरुक्षेत्रं देवव्रतो भीष्मः ॥ १ ॥ सदश्वैः श्रेष्ठाश्वयुक्तैः रथैः ॥ २ ॥ तत्र तदा संस्तन्दं
एवमेवागता इत्यर्थः भरतपुंगवं भीष्मं ॥ ५ ॥ रेणुकासुतः परशुरामः ॥ ६ ॥ मित्रां ब्रह्मरातः शुकः आंगिरसो बृहस्पतिः ॥ ८ ॥ वसूत्तमः

हृदिस्थं संतं पूजयामास ॥१०॥ उपासीनान् समीपोपविष्टान् प्रश्रयो विनयः प्रेम स्नेहस्ताभ्यां उपसंगतान्
पांडवान् अभ्याचष्टाभ्यभाषत ॥ अनुरागास्रैः स्नेहाश्रुभिरंधीभूतेन चक्षुषा उपलक्षितो ददर्शेति वा ॥ अभिभाषण-
माह त्रिभिः अहो इत्येकादशभिः ॥११॥ हे धर्मनंदनाः क्लिष्टं यथा भवति एवं जीवितुं नार्हथ यूयमिति ॥ यदेतदहो कष्टं जुगुप्सितं
अहो अन्याय्यं चैतत् यतो यूयं विप्रधर्माच्युताश्रया अयोग्या येषां ते ॥१२॥ किंच संस्थिते मृते बालाः प्रजा यस्याः सा वधूश्चेति
दैन्यं दर्शितं ॥ तोकान्यपत्यानि तद्वती अपत्यैः सह क्लेशान् प्राप्तेत्यर्थः ॥ कालकृतत्वेन शोकं वारयति सर्वमिति द्वाभ्यां ॥ स्त

कृष्णं च तत्प्रभावज्ञ आसीनं जगदीश्वरं ॥ हृदिस्थं पूजयामास मायया उपात्तविग्रहं ॥१०॥ पांडुपुत्रानुपासीनान्
प्रश्रयप्रेमसंगतान् ॥ अभ्याचष्टानुरागास्रैरंधीभूतेन चक्षुषा ॥११॥ अहो कष्टमहोन्याय्यं यद्यूयं धर्मनंदनाः
जीवितुं नार्हथ क्लिष्टं विप्रधर्माच्युताश्रयाः ॥१२॥ संस्थिते तिरथे पांडौ पृथा बालप्रजा वधूः ॥ युष्मत्कृते बहू-
न्क्लेशान्प्राप्ता तोकवती मुहुः ॥१३॥ सर्वं कालकृतं मन्ये भवतां च यदप्रियं ॥ सपालो यद्वशे लोको वायोरि-
व घनावलिः ॥१४॥ यत्र धर्मसुतो राजा गदापाणिर्वृकोदरः ॥ कृष्णोस्त्री गांडिवं चापं सुहृत्कृष्णस्ततो विप-
त् ॥१५॥ न ह्यस्य कर्हिचिद्राजन्पुमान्वेद विधित्सितं ॥ यद्विजिज्ञासया युक्ता मुह्यंति कवयोपि हि ॥१६॥ तस्मा-
दिदं दैवतंत्रं व्यवस्य भरतर्षभ ॥ तस्यानुविहितोनाथा नाथ पाहि प्रजाः प्रभो ॥१७॥

भवतामप्रियं यद्वशो यस्य कालस्य वशवर्ती स कालः ॥ अहो दुर्घटघटनापटुः काल इत्याह यत्रेति ॥१४॥ यत्र कृष्णः सः
सखा अस्त्री धन्वी तत्र तत्रापि विपत् उ एव शरीरबलात् अस्त्रैः उ एव शौर्यं वेद संपन्नावनीत्यर्थः ॥ न च कृष्णस्य कथं
कालोतिक्रमेत इत्यपेक्षायामाह ॥१५॥ न ह्यस्य ईश्वरस्य कृष्णस्येति विशेषं गृहीत्वा निर्दिशति ॥ विधित्सितं विधातुमिष्टं यस्य विधि-
त्सितस्य विजिज्ञासया कवयोपि मुह्यंति ॥१६॥ दैवतंत्रमीश्वराधीनं व्यवस्य निश्चित्य तस्येश्वरस्यानुविहितोनुवर्ती सन्
करोति ॥ हे नाथ कुलपरंपरागत स्वामिन् प्रभो समर्थ अनाथाः प्रजाः पाहि अनुवर्तनीय ॥ परमेश्वरस्य श्रीकृष्णस्य एवेत्या-

कृत्यर्थः २

२

श्री भाग टी २८

एष एव भगवान् सर्वेश्वरः कालएव यत आद्यः पुमान् ॥ ततश्च यतो नारायणः साक्षात् । तदुपपादयति गूढस्येति ॥ १८
अनुभावं प्रभावं ॥ १९ ॥ त्वमज्ञानाद्यमेवं मन्यसे मातुलेयं देवकीसुतं प्रियं प्रीतिविषयं मित्रं प्रीतिकर्तारं । सुहृत्तमम् उप
कारानपेक्षोपकारकं च सौहृदाद्धि स्वाज्ञात् सारथिं च अकरोः कृतवानसि । सचिवं मंत्रिणं च । तन्नीश्वरः चेत् कथं नीचे
सारथ्यादौ प्रवृत्तः तत्राह सर्वेति ॥ २० ॥ तत्कृतं नीचोच्चकर्मकृतं ममयोग्यं मयायोग्यमिति मतेर्वैषम्यं । क्वचिदपि नास्ति कु
तो निरवद्यस्य रागादिदोषरहितस्य तत्कृतमनहंकृतेः ॥ तत्कुतः समदृशः तत्रापि हेतुः सर्वात्मनः यद्वेषे वा हेतुर्हेतु
अद्वयस्य तदपि कुतः ॥ २

एष वै भगवान्साक्षादाद्यो नारायणः पुमान् ॥ मोहयन्मायया लोकं गूढश्चरति वृष्णिषु ॥ १८ ॥ अस्यानुभावं
भगवान्वेद गुह्यतमं शिवः ॥ देवर्षिर्नारदः साक्षाद्भगवान्कपिलो नृप ॥ १९ ॥ यं मन्यसे मातुलेयं प्रियं मित्रं सु
हृत्तमं ॥ अकरोः सचिवं दूतं सौहृदादथ सारथिं ॥ २० ॥ सर्वात्मनः समदृशो ह्यद्वयस्यानहंकृतेः ॥ तत्कृतं मतिवै
षम्यं निरवद्यस्य न क्वचित् ॥ २१ ॥ तथाप्येकांतभक्तेषु पश्य भूपानुकंपितं ॥ यन्मेसूंस्त्यजतः साक्षात्कृष्णो दर्शन
मागतः ॥ २२ ॥ भक्त्यावेश्य मनो यस्मिन्वाचा यन्नाम कीर्तयन् ॥ त्यजन्कलेवरं योगी मुच्यते कामकर्मभिः ॥ २३ ॥ स दे
वदेवो भगवान्प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहं ॥ प्रसन्नहासारुणलोचनोल्लसन्मुखांबुजो ध्यानपथः
चतुर्भुजः ॥ २४ ॥ ॥

नं २ हेतुमद्भावः ॥ २१ ॥ तथापि समत्वेपि हे भूप अनुकंपितं यातो मे प्राणांस्त्यजतः साक्षात्स्वयमेव नत्विंद्रादिरूपेण ॥ इदानीं
देहत्यागपर्यंतं श्रीकृष्णावस्थानं प्रार्थयते भक्त्येति द्वाभ्यां ॥ २२ ॥ यावदिति विलंबं द्योतयति अहं हिनोमि त्यजामीति
त्यक्ते ॥ मिदं प्रसन्नात्मत्वेन स्वाते ॥ प्रसन्नहासेनारुणलोचनाभ्यां चोल्लसद्रुचिरं मुखांबुजं यस्य ध्यानस्य पंथा विषयः योग्यैः
चिंत्यते केवलं सोयतः स्थितः सन्मां प्रतीक्षतामित्यर्थः ॥ २५ ॥ तत्रापि चतुर्भुज एव वैकुंठनिवासी भक्तक्लेशनापहारी हरिरेव
अहिगोचरो भवतु यत्किमपि अवस्थांतररूपत्वेन दृष्टमप्राकृत्वात् ॥ भक्तानां सेव्यसेवकभावातिरिक्तं नहि किमप्यादरणीयं

तस्मात्त्वंकेयं वाक्यमाकर्ण्य ॥२४॥ पुरुषस्वभावेन विहितान्वर्णजातिसाधारणान्धर्मान्वर्णयामासेति तृतीयेनान्वयः
यथावर्णं वर्णधर्मान् ॥ यथाश्रमम् आश्रमधर्मान् वैराग्यरागाभ्यामुपाधिभ्यां क्रमेणाश्रितं उभयं निवृत्तिरूपं लक्षणं ये
षां तान् पुनस्तत्रैव विशेषमाहदानेति ॥२५॥ मोक्षधर्मान् शमादीन् भगवद्धर्मान् हरितोषणान् द्वादश्यादिनियमरूपा
न् समासव्यासौ संक्षेपविस्तारौ तावेव योगात् उपायौ ताभ्यां ॥२६॥ धर्मादीन् यथाधिकारं नियतोपाख्यासहिता
न् यथा यथावत् नानाख्यानेषु ये इतिहासाः ॥ तेषु यथा संततितथा वर्णयामास ॥२७॥ छंदेनेच्छयाप्तत्वयेस्य सः ॥२८॥

सूत उवाच ॥ युधिष्ठिरस्तदाकर्ण्य पाराशर्यानेप्रारयंजेरे श्रुत्वा द्विविधान्धर्मान् ऋषीणामग्रत एव तौ ॥२५॥ पु
रुषस्वभावविहितान्यथावर्णं यथाश्रमान् वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् ॥२६॥ दानध
र्मान् राजधर्मान् मोक्षधर्मान् विभागशः ॥ स्त्रीधर्मान् भगवद्धर्मान् समासव्यासयोगतः ॥२७॥ धर्मार्थकाममो
क्षांश्च सहोपायान् यथा मुने ॥ नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित् ॥२८॥ धर्मं प्रवदतस्तस्य स कालः
प्रत्युपस्थितः ॥ यो योगिनश्छंदमृत्योर्वांछितस्तूत्तरायणः ॥२९॥ तदोपसंहृत्य गिरः सहस्रणीर्विमुक्त
संगं मन आदिपूरुषे ॥ कृष्णे लसत्पीतपटे चतुर्भुजे पुरःस्थितेऽमीलितदृग्व्यधारयत् ॥३०॥ विशुद्धया धार
णया हताशुभस्तदीक्षयैवाशु गतायुधश्रमः ॥ निवृत्तसर्वेंद्रियवृत्तिविभ्रमस्तुष्टाव जन्यं विसृजन् जनार्दनं
देहं ३१

सहस्रणीः पुंडे समीपस्थान्सहस्रं रथिनो नयतीति सहस्रणी भीष्मः ॥ सहस्रणीरिति पाठे सहस्रार्थवतीर्गिरः लसं
तो शोभमानो पीतो पटो यस्य तस्मिन् ॥ अमीलितदृगेव मनो व्यधारयत् ॥३०॥ अनयैव शुद्धया धारणया हतमशुभं
यस्य सः ॥ तस्य श्रीकृष्णस्येक्षया रक्षैव गतं आयुधश्रमो यस्य सः ॥ अत एव निवृत्तः सर्वेंद्रियवृत्तीनां विभ्रमो विविधो
भ्रमो यस्मात्सः ॥ जन्यं देहं परमफलरूपां श्रीकृष्णे रतिं प्रार्थयितुं प्रथमं स्वकृतमर्पयति ॥ ३१ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अविन्न प्रेत्यर्थः २

श्री
भाग
टी
२९

इति नानाथ मोक्ष पार्थे मनि मे नो धारणा उपकल्पिता समर्पिता क्षमा च ता ॥ ए गवे श्रेष्ठे भगवति विन्न स्थानिक्ता सा अविन्न [illegible]
निवा क्षेदः [illegible] विगतो भमा यस्मात् तस्मिन् यमवे ये त्व अन्य त्रम न्नेना स्तीत्यर्थः ॥ तदेव परमैश्वर्यमाह स्वस्व स्वरूप
तेप रमानेर मुपगते प्राप्ते एव क्वचित् कदाचिदिह हंते विक्रीडिते प्रकृतिमये पुषि स्वीकृतवति ॥ न तु स्वरूपतिरोधानेन जी
ववत्पारतंत्र्य इत्यर्थः ॥ विहृत मिति कं प्रपंचयति यद्यतः प्रकृतेः भवप्रवाहः स्थिरं प्रभवति ॥ २२ ॥ इदानीं श्रीकृष्णम्
तिं वर्णयन्न रतिं प्रार्थयते ॥ त्रिभुवन कमनं त्रिलोकरामेकमेव यन्तक मनीयं तद्वपुर्दधाने रतिर्मे स्तु तमालवत् नीलवर्णीय स्पत
न ॥ प्रातः कालीनारवेः करा इव रुचतश्च गौरेयी तेन अमलेन निर्मलेन अंबरेण यस्मिन् स तत् ॥ अलकैः कुलैरुपरि आहृते आनना क्षेयस्मि
न तवि जयसखे पार्थसारथौ ॥ अनवद्याहेतुकी कलाभि संधिरहिता रतिरस्तु ॥ विजयसखित्वमत्र वर्णयन्न रतिं प्रार्थयते
भीष्म उवाच ॥ इतिमति रुपकल्पिता वितृष्णा भगवति सात्वतपुंगवे विभूम्नि ॥ स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृ
तिमुपेयुषि यद्भवप्रवाहः २२ ॥ त्रिभुवनकमनं तमालवर्णं रविकरगौरवरांबरं दधाने ॥ वपुरलककुलावृ
ताननाब्जं विजयसखे रतिरस्तु मेनवद्या ॥ २३ ॥ युधि तुरगरजो विधूम्र विष्वक्कचलुलितश्रमवार्यलंकृता
स्ये ॥ मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेस्तु कृष्ण आत्मा ॥ २४ ॥ सपदि सखिवचो निशम्य मध्ये
निजपरयो [illegible] र्बलयोरथं निवेश्य ॥ स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्ममास्तु ॥ २५ ॥
२३ युधि युद्धे तुरगाणां खुरजस्तुरगजस्तेन विधूम्रा धूसरास्तेचते च विष्वक् समंततः चलंतः कुंतलाः तैर्लुलितं विकी
र्णं श्रमवारि स्वेदबिंदुरूपं तेन भक्तवात्सल्य द्योतकेनालंकृतमास्यं यस्य तस्मिन् श्रीकृष्णे ममात्मा मनो अस्तु रमतामित्यर्
थः ॥ पुनः किंभूते मदीयैर्निशितैः शरैः विभिद्यमाना त्वक् यस्य ॥ शरैरेव विलसत्कवचं यस्य तस्मिन् ॥ २४ ॥ सेनयोरुभयोर्म
ध्ये रथं स्थापयमेच्युत यावदेतान्निरीक्षेहं योद्धुकामानवस्थितानिति सख्युरर्जुनस्य वचो निशम्य ॥ सपदि तत्क्षणमेव
स्वपरबलयोः सैन्ययोर्मध्ये स्थिते पार्थसखे रतिरस्तु ॥ तत्र स्थित्वा हृतं सर्वं दर्शयति परस्य ड यौधनस्य सैनिकानामायु
रक्ष्णा कालदृष्ट्या हृतवति ॥ असौ भीष्म असौ द्रोण असौ कर्ण इति तत्त्वदर्शनव्याजेन दृष्ट्यैव सर्वेषामायुराकृष्याऽर्जुनस्य जयं कृ
तवति न केवलं अर्जुनस्य सपत्न्या हरणे नैव जयमावहत् किंतु अविद्याहरणेनापीत्याह ॥ २५ ॥ ॥ ॥

कु २

२९

पु इति २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

व्यवहितानांदूरेस्थितानांपृतनानांसेनानांमुखमिवमुखंअग्रेस्थितान्भीष्मादीन्निरीक्ष्येत्यर्थः॥ स्वजनवधाद्विमुखस्य
निवृत्तस्य॥ तदुक्तंगीतासु॥ एवमुक्त्वार्जुनःसंख्येरथोपस्थउपाविशत्॥ उत्सृज्यसशरंचापंशोकसंविग्नमा
नसः इति॥ कुमतिमहरदहंहनेत्यादिकुबुद्धिंनकेवलंरणेनैवजयमाहवत्॥ किंत्वविद्याहरणेनापि॥ ममतुहातमन्त्र
यहकृतवानित्याहद्वाभ्यां॥ ३६॥ स्वनिगममपहायप्रवाहसहायमात्रंकरिष्यामीत्येवंभूतांस्वप्रतिज्ञांहित्वा॥
श्रीकृष्णशस्त्रंग्राहयिष्यामीत्येवंरूपांमत्प्रतिज्ञांऋतंसत्यंयथाभवति॥ तथाहिअधिकांकर्तुंयोरथस्थःसन्
२ धृतरथचरणंचक्रंयेनसः॥ तदाचैमातुष्पनाभ्यविस्मनेकृदरस्यसर्वभूतभुवनभारेणप्रतिपदंचलद्गुःचलन्तीगौः

संरंभेन१

व्यवहितपृतनामुखंनिरीक्ष्यस्वजनवधाद्विमुखस्यदोषबुद्ध्या॥ कुमतिमहरदात्मविद्ययायश्चरण
रतिःपरमस्यतस्यमेस्तु॥ ३६॥ स्वनिगममपहायमत्प्रतिज्ञामृतमधिकर्तुमवप्लुतोरथस्थः॥ धृतरथ
चरणोभ्ययाच्चलद्गुर्हरिरिवहन्तुमिभंगतोत्तरीयः॥ ३७॥ शितविशिखहतोविशीर्णदंसःक्षतजपरिप्लु
तआततायिनोमे॥ प्रसभमभिससारमद्वधार्थंसभवतुमेभगवान्गतिर्मुकुंदः॥ ३८॥ ॥

हन्तुं१

अवप्लुतःसहसैवावतीर्णः [illegible] सन्नभ्ययात्अभिमुखमधावत्॥ इभंहरिःसिंहइवकथंभूतो
रीयस्मात्रेनैवसंरंभेनपथिगतंपतितमुत्तरीयंवस्त्रंयस्यसमुकुंदोमेगतिर्भवत्वित्युत्तरेणान्वयः॥ ३७॥ एवं
यदाभ्ययात्तदास्मयमानस्याततायिनोथर्विनोमेशितैस्तीक्ष्णैर्विशिखैर्हतस्ताडितोविशीर्णदंसःविध्व
स्तकवचः॥ क्षतजेनरुधिरेणपरिप्लुतःव्याप्तःप्रसभंबलाद्वारयतमर्जुनमप्यतिक्रम्यमद्वधार्थमभिससारग
मिनगाम॥ एवंयोलोकप्रतीत्यार्जुनपक्षपातीवलितः॥ वस्तुतस्तुममैवानुग्रहंकृतवान्॥ यन्ममभक्तेनोक्तं
वचःतन्माहथ्यासत्यमस्तुसएवभगवान्मेगतिर्भवत्वित्यर्थः॥ तदेवमन्यायैरपिभृत्यरक्षावाग्रेहकृस्मरतिमापशास्त्रं

म

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

विजयोऽर्जुनस्तस्य रथ एव कुटुम्बं अहङ्कृतसेवयापि रक्षणीयो यस्य तस्मिन्नात्ततोत्रे प्रतोदो येन तस्मिन् ॥ धृता हयानां रश्म
यः प्रग्रहा येन तस्मिन् श्रीहारादिभिरीक्षणीयेन कारणेन तादृशविशिष्टशोभादिभिः तत्तच्छ्रिया सारथिश्रियेव ईक्षणीये शोभ
मानेन मुमूर्षोर्मे रतिरस्तु न ह्यन्यत्र वर्तिनि किमिति । प्रार्थ्यते अत आह भगवत्यविनिवर्त्यये तदाह इह युद्धे हताः सर्वे यं नि
रीक्ष्य सरूपेन तत्समानं रूपं प्रापुरिति दिव्यरूपाणि प्रापुरित्यर्थः ॥ तन्मयमेण युध्यमाना स्तत्स्वरूपं प्रापुरित्येतन्नविचित्रं ॥ यतो मदो
न्मत्ता अपि प्रापुरित्याश्चर्यमाह ॥ ३९ ललितागतिश्च विलासश्च वल्गुहासाश्च प्रणयनिरीक्षणं च तैः कल्पितः ॥ उ धा

विजयरथकुटुंब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये ॥ भगवति रतिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य
हता गताः सरूपं ॥ ३९ ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः ॥ कृतमनुकृतव
त्य उन्मदांधाः प्रकृतिमगन्किल यस्य गोपवध्वः ॥ ४० मुनिगणनृपवर्यसंकुलेऽन्तः सदसि युधिष्ठिरराजसू
य एषां ॥ अर्हणमुपपेद ईक्षणीयो मम दृशिगोचर एष आविरात्मा ॥ ४१ ॥

रुर्मानः पूजा यासां ताः श्रीकृष्णेन मदेनान्धाः ॥ अत एव तदेकचित्तत्वेन तस्य कृतं कर्म गोवर्धनोद्धरणादिकमनुकृत
वत्यो गोपवध्वः यस्य प्रकृतिं स्वरूपमगमन् अगन्निति मकारलोप आर्षः किल प्रसिद्धं तस्मिन्मे रतिरस्तु इति पूर्वेणान्वयः
जगत्साक्षात्तामवस्थामाह ॥ ४० मुनिगणैर्नृपवर्यैश्च संकुले आकीर्णे अन्तः सदसि सभामध्ये ॥ युधिष्ठिरस्य राजसूये एषां
मां मुनिगणादीनामीक्षणीयः अहो नृपमदोऽसहिमेत्येव मामध्ये एणाविलोकनीयः सन्नुपपेदे प्राप एष जगतामात्मा
मम दृशिगोचरः दृष्टिविषयः सन्नाविः प्रकटं वर्तते अहो मे भाग्यमिति भावः ॥ सोऽहं कृतार्थोऽस्मीत्याह तमिममिति ॥ ४१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तमिममजं सम्यगधिगतः प्राप्तोस्मि ॥ सम्यक्त्वमाह ॥ विधूतभेदमोहः तदेवं भेदस्यौपाधिकत्वमाह आत्मक
ल्पितानां स्वयं निर्मितानां शरीरभाजां प्राणिनां हृदि हृदि प्रति हृदयं धिष्ठितं अधिष्ठितं अकारलोपस्त्वार्षः ।
नैकधा अनेकधा ॥ धिष्ठानभेदात् अनेकधाभानमित्यर्थः ॥ अत्र दृष्टांतः ॥ सर्वप्राणिनां दृशं दृशं प्रति एकमेवार्क
मनेकधा प्रतीतमिवेति ॥ ४२ ॥ मनोवाग्दृष्टीनां वृत्तिभिः ॥ परमात्मनि श्रीकृष्णे अंतरेव लीनः श्वासो यस्य सः ॥ ४३

तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानां ॥ प्रतिदृशमिव नैकधार्कमेकं
समधिगतोस्मि विधूतभेदमोहः ॥ ४२ सूत उवाच ॥ कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः ॥ आत्म
न्यात्मानमावेश्य सोंतःश्वास उपारमत् ॥ ४३ ॥ संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले ॥ ४४ सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये ४४
तत्र दुंदुभयो नेदुर्देवमानववादिताः शशंसुः साधवो राज्ञां खात्पेतुः पुष्पवृष्टयः ॥ ४५ तस्य नि
र्हरणादीनि संपरेतस्य भार्गव युधिष्ठिरः कारयित्वा मुहूर्त्तं दुःखितोभवत् ॥ ४६ ॥ तुष्टुवुर्मुनयो
हृष्टाः कृष्णं तद्गुह्यनामभिः ॥ ततस्ते कृष्णहृदयाः स्वाश्रमान्प्रययुः पुनः ॥ ४७ ॥ ततो युधिष्ठिरो
गत्वा सहकृष्णो गजाह्वयं ॥ पितरं सांत्वयामास गांधारीं च तपस्विनीं ॥ ४८ ॥ पित्रा चानुमतो राजा
वासुदेवानुमोदितः ॥ चकार राज्यं धर्मेण पितृपैतामहं विभुः ॥ ४९ ॥ ॥ इति श्रीभागवते प्र
थमस्कंधे युधिष्ठिरप्रलंभो नाम नवमोध्यायः ॥ ९ ॥ ॥
ध्रिय.

निष्कले निरुपाधौ संपद्यमानं मिलितमाज्ञाय आलक्ष्य ॥ ४४ ॥ देवैर्मानवैश्च वादिताः राज्ञां मध्ये ये साधवो
नस्तुयुवः ॥ ४५ ॥ निर्हरणादीनि संस्कारादीनि सम्परेतस्य मुक्तस्यापीत्यर्थः ॥ ४६ ॥ कृष्णे हृदयं येषां कृष्ण
स्य हृदयं अयं निगूहंति कृष्णपरहृदयं येषां रहस्य नामभिर्ब्रह्मेत्यादिभिः ॥ ४७ ॥ पितरं धृतराष्ट्रं तप
स्विनीं संतापवतीं ॥ ४८ ॥ राजा युधिष्ठिरः ॥ ४९ ॥ इति श्रीभावार्थदीपिकायां प्रथमस्कंधे नवमोध्यायः ॥ ९ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा. प्र. टी. गु.

दशमे कृतकार्यस्य हस्तिनापुरतो हरेः ॥ स्त्रीभिः संस्तूयमानस्य वर्ण्यते द्वारकागमः ॥ राज्यं चकारेत्युक्तं तत्र शङ्कु
न्तिहत्येति तस्य विशेषयति स्पर्धनि सर्यपने ॥ तयोस्तु विजयस्पृथः ॥ संग्रामो येषां ते ॥ अतएव धनादिहरणादाततायि
नः तान् हत्वा प्रत्यवरुद्धभोजनः ॥ वंधुवधदुःखेन संकुचितभोगः ॥ राज्यलाभेन प्राप्तभोगोवा कथं राज्ये प्रवृत्तः प्रवृ
त्तोवाननः किमकार्षीत् ॥ तत्र प्रश्नद्वयोत्तरं श्रीकृष्णस्य श्रीनृपपालोत्प्रश्नन इत्याशयेनोत्तरमाह ॥ १ ॥ वंशकुरोः संरो
हयित्वा पराशिवत्तणीयेन संरोहांकुरितं कृत्वा कथं भूतं वंशं वंशादवाग्निनिर्दग्धं वंशमेव दवो वनेन स्मात्कु
लनः ॥ क्रोधरूपोग्निस्तेन निर्दग्धं तदयं निजराज्ये निवेश्य राज्यप्रश्नत्रो हे तमुक्ता किमकार्षीदित्यस्योत्तरमाह नि

शौनक उवाच ॥ हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां वरिष्ठः ॥ सहानुजैः प्रत्यवरुद्धभो
जनः कथं प्रवृत्तः किमकार्षीत्ततः ॥ १ ॥ सूत उवाच ॥ वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोहयित्वा भव
भावनो हरिः ॥ निवेशयित्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीतमना बभूव ह ॥ २ ॥ निशम्य भीष्मोक्तम
थाच्युतोक्तं प्रवृत्तविज्ञानविधूतविभ्रमः ॥ शशास गामिन्द्र इवाजिताश्रयः परिध्युपान्तामनुजा
नुवर्तितः ॥ ३ ॥ कामं ववर्ष पर्जन्यः सर्वकामदुघा मही ॥ सिषिचुः स्म व्रजान् गावः पयसोधस्वतीर्
मुदा ॥ ४ ॥ नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः ॥ फलन्त्योषधयः सर्वाः काममन्वृतु तस्य वै ॥ ५
नाधयो व्याधयः क्लेशा दैवभूतात्महेतवः ॥ अजातशत्रावभवन् जन्तूनां राज्ञि कर्हिचित् ॥ ६ ॥

प्राप्येति ॥ २ ॥ प्रवृत्तं यद्विज्ञानं परमेश्वराधीनं जगत्तत्त्वं तद्रूपमित्येवं भूतं तेन विधूतो विभ्रमः ॥ अहंकर्तेत्या
दिरूपो मोहो यस्य सः ॥ अनुजैरनुवर्तितः सेवितः सन् अजितः श्रीकृष्ण एवाश्रयो यस्य सः ॥ परिधिः समुद्रः त
त्पर्यन्तां गां पृथ्वीं पालयामास तस्य राज्यमनुवर्णयति कामिति त्रिभिः ॥ ३ ॥ मही सर्वकामदोग्ध्रीव भूव व्र
जान् गोष्ठानि ऊधस्वतीः ॥ ऊधस्वत्यः ऊधः क्षीराशयः स्थूलो यासां ताः पयः सिषिचुः अभ्यषिंचन् ॥ ४ ॥ ऋतिऋतौ
॥ ५ ॥ आधयो मनोव्यथा व्याधयो रोगाः क्लेशाः शीतोष्णादिवाधाः ॥ दैवं च भूतानि आत्मा च हेतवो येषां अधिदैवि
कादीनां जंतूनां नाभवन् ॥ इदानीं द्वारकागमनं निरूपयितुमाह उषित्वेति ॥ ६ ॥

राम. गु.

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्वसुः सुभद्रायाः ॥७॥ तं युधिष्ठिरं ॥८॥ युयुत्सुः धृतराष्ट्राद्वैश्यायां जातो गौतमः कृपः यमौ नकुलसहदेवौ ॥९॥
अन्याश्च स्त्रियो मत्स्यसुता उत्तरा तस्याः पुनर्ग्रहणं गर्भरक्षकश्रीकृष्णविरहे मोहाधिक्यात् यद्वा मत्स्यसुता
नाम अन्यवती नैषां कृष्णविरहासहनं कैमुत्यन्यायेनाह सत्संगादिति द्वाभ्यां ॥१०॥ सतां संगाद्धेतोः मुक्तः पुत्रा
दिविषयो दुःसंगो येन सः सद्भिः कीर्त्यमानं रुचिकरं यस्य यशः सकृदप्याकर्ण्य तत्संगं त्यक्तुं न शक्नोति ॥११॥

उषित्वा हास्तिनपुरे मासान् कतिपयान् हरिः ॥ सुहृदां च विशोकाय स्वसुश्च प्रियकाम्यया ॥७॥ आमं
त्र्य चाभ्यनुज्ञातः परिष्वज्याभिवाद्य तं ॥ आरुरोह रथं कैश्चित्परिष्वक्तोऽभिवादितः ॥८॥ सुभद्रा द्रौप
दी कुन्ती विराटतनया तथा ॥ गान्धारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ ॥९॥ वृकोदरश्च धौम्यश्च स्त्रियो
मत्स्यसुतादयः ॥ न सेहिरे विमुह्यन्तो विरहं शार्ङ्गधन्वनः ॥१०॥ सत्संगान्मुक्तदुःसंगो हातुं नो
त्सहते बुधः ॥ कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनं ॥११॥ तस्मिन्न्यस्तधियः पार्थाः सहेरन्वि
रहं कथं ॥ दर्शनस्पर्शनालापशयनासनभोजनैः ॥१२॥ सर्वे ते निमिषैर्नेत्रैस्तमनु द्रुतचेतसः । वी
क्षन्तः स्नेहसंबद्धा विचेलुस्तत्र तत्र ह ॥१३॥ न्यरुन्धन्नुद्गलद्बाष्पमौत्कण्ठ्याद्देवकीसुते । निर्यात्यगा
रान्नोऽभद्रमिति स्याद्बान्धवस्त्रियः ॥१४॥ मृदङ्गशङ्खभेर्यश्च वीणापणवगोमुखाः । पटहानकघ
ण्टाद्या नेदुर्दुन्दुभयस्तदा ॥१५॥

दर्शनादिभिः तस्मिन् श्रीकृष्णे न्यस्ता अर्पिता धीर्येषां ते ॥१२॥ अनिमिषैर्नेत्रैस्तमेव वीक्षमाणास्तत्र त
त्र गार्हेणानयनाद्यर्थं चेलुरितस्ततः स्नेहेन सम्यक् बद्धाः अनपवतमनुमता निवेतासियेषां
न्हेदान्त्रिगिकाति सति उत्कण्ठ्याद्धेतोः उद्गलत् स्रवत् वाष्पमश्रु न्यरुन्धन् नेत्रेष्वेव स्तंभितवन्तः ॥१३॥ अगारा
अभद्रं नो स्यादमंगलं माभूदित्येतदर्थं ॥१४॥ मृदङ्गादयो दशवाद्यभेदाः ॥१५॥ तत्र हेतुः ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भाग॰ प्रटी॰ २२

प्रेमव्रीडास्मितेनयुक्तमीक्षणं यासां ताः ॥ ८ ॥ पुराकालनिद्रान्तस्यार्ईशेणजितनिद्रोर्जुनः ॥ ९ ॥ व्यजनेचामरैर्जगद्वह्व
मधुपतिः श्रीकृष्णः ॥ ८ ॥ सत्याः श्रीकृष्णेनासामव्यभिचारात ॥ किंवनानुरूपाख्याताः ॥ अनुरूपाश्च निर्गुणस्य
परमानंदस्य स्तुतिर्भवेत्पादयोनानुरूपाः ॥ गुणात्मनो मनुष्यनाट्यावतारेऽनुरूपाश्चेत्यर्थः ॥ सैयिरार्थः ॥ ९
सर्वासां सुकृतीनां मनोहरा उपनिषदो मूर्त्तिमत्यः सत्यः तं संजल्पमभ्यनंदन्नित्यर्थः ॥ तत्र नेत्रः सौंदर्यायतिश
येन विस्मितामयः सर्वाभ्योन्याः स्त्रियः कथयंतिनात्रविस्मयः कार्यः साक्षादीश्वरवादस्येतितदेवाह चतुर्भिः

प्रसादशिखरारूढाः कुरुनार्योदिदृक्षया ॥ ववर्षुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः ॥ ९ ॥ सिता
तपत्रं जग्राह मुक्तादामविभूषितं ॥ रत्नदंडं गुडाकेशः प्रियः प्रियतमस्य ह ॥ ९ ॥ उद्धवः सात्यकि
श्चैव व्यजने परमाद्भुते ॥ विकीर्यमाणः कुसुमैः रेजे मधुपतिः पथि ॥ ९ ॥ अश्रूयंताशिषः सत्याः त
त्रतत्रद्विजेरिताः ॥ नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः ॥ १९ ॥ अन्योन्यमासीत्संजल्प उत्तमश्
लोकचेतसां ॥ कौरवेंद्रपुरस्त्रीणां सर्वश्रुतिमनोहरः ॥ २० ॥ सवै किलायं पुरुषः पुरातनो यएक
आसीदविशेषआत्मनि ॥ अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु ॥ २१ ॥

वैसम्यक्लोकिलेति प्रसिद्धा प्रमाणयोतन्केर्यएकएवाद्वितीयः ॥ पुरुषआसीत्सएवायं श्रीकृष्णः ॥ कुत्रासीद
विशेषआत्मनि निष्प्रपंचे निजरूपे कदा अग्रे गुणेभ्यो गुणक्षोभात्पूर्वं निशिप्रलये कल्पांतस्य लक्षणं जगतामा
त्मनि जीवे निमीलितात्मनि निमीलितात्मत्वं तित्व प्रसन्नम्पनपदं जातावेकवचनं ईश्वरे लीनरूपेषु जीवेषु सत्स्व
त्यर्थः ॥ ननु जीवानां ब्रह्मत्वात्कथंलयः तत्राह सुप्तासु शक्तिषु सत्सु जीवोपाधिभूतसत्त्वादिशक्तिलयएव
जीवलयइत्यर्थः ॥ तदेवं स्वरूपेणादौ प्रलयांतरे च निष्प्रपंचावस्थानमुक्तं सृष्टिप्रलययोर्मध्ये सप्रपंचावस्थानमा

राम॰ २२

ने ध्ये

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सएवायंप्रसुतांस्थितांतदेवप्रकृतिमनुससाराधिष्ठितवान्॥ भूयः पुनः सृष्टिप्रवाहस्यानादित्वात्॥ कीदृशींनिज
वीर्यचोदितांस्वकालशक्तिप्रेरितांस्वांशभूतानांजीवानांमायांमोहिनीम्अतएवसिसृक्षतींस्रष्टुमिच्छन्तींकिमर्थं
मनुससारअनामरूपे॥ आत्मनिजीवेरूपनामनीविधातुमिच्छन्। उपाधिसृष्ट्याजीवानांभोगायेत्यर्थः कर्मा
णिचविधातुंवेदान्। कृतवानित्याह शास्त्रकृदिति अस्यदर्शनंत्वतिदुर्लभमस्माभिर्लब्धमित्याहुः॥२२॥ सवै
अयंयस्यपदंस्वरूपमत्रजितेन्द्रियानिर्जितोमातरिश्वाप्राणोयैस्तेसूरयःसमाधौतेसूरयएवपश्यन्तिकेनभक्त्याउत्कलित
उत्कण्ठितोमलआत्माबुद्धिस्तेनदृश्यतेत्वग्र्ययाबुद्ध्येतिश्रुतेर्बुद्धिवैमल्यस्याप्ययमेवहेतुरित्याहुः ननुएषस
त्त्वएवसत्त्वंबुद्धिंपरिमार्ष्टुंसम्यक्शोधयितुंअर्हतीति। नतुयोगादयइत्यर्थः। यद्वाअत्रअहोएषएवसत्त्वंज्ञानं

सएवभूयोनिजवीर्यचोदितांस्वजीवमायांप्रकृतिंसिसृक्षतीम्॥ अनामरूपात्मनिरूपनामनीविधि
त्समानोनुससारशास्त्रकृत्॥२२॥ सवाअयंयत्पदमत्रसूरयोजितेन्द्रियानिर्जितमातरिश्वनः। पश्यंति
भक्त्युत्कलितामलात्मनाननुएषसत्त्वंपरिमार्ष्टुमर्हति॥२३॥ सवाअयंसख्यनुगीतसत्कथोवेदे
षुगुह्येषुचवेदवादिभिः॥ यएकईशोजगदात्मलीलयासृजत्यवत्यत्तिनतत्रसज्जते॥२४॥ यदाह्यध
र्मेणतमोधियोनृपाजीवंतितत्रैषहिसत्त्वतःकिल धत्तेभगंसत्यमृतंदयां यशोभवायरूपाणि
दधद्युगेयुगे॥२५॥

परिमार्ष्टुंनाशयितुंहृदयासनेनाप्रत्यक्षीभवितुंनार्हतीति। किंत्वनेनैवसहृद्गंतव्यमित्यर्थः पुण्यश्लोकतामाहुः
२३ हेसखियोवेदेषुरहस्यागमेषुचरहस्यनिरूपकैरनुगीतसत्कथः। अनुगीताःसत्यःकथायस्यसएवा
यंनप्रकारमाहुः। यएकईशइत्यादिएवंभूतस्यनानावतारकारणत्वमाहुः यदेति॥२४॥ तमोव्याप्ताधीर्ये
षांतेनृपाअधर्मेणजीवंति केवलप्राणवृत्तिमंति। तत्रतदाएषएवभवायस्थित्यैसत्त्वतः॥ विशुद्धरूपेणसत्वेन
रूपाणिदधत्। भगादीनिधत्तेप्रकटयतियुगेयुगेतत्रतदवसरेभगऐश्वर्यंसत्यंसत्यप्रतिज्ञत्वंऋतंयथार्थो
पदेशःकारुण्यंदयांभक्तकृपांयशःअद्भुतकर्मत्वंविशेषणः। श्रीकृष्णावतारेसौभाग्यंवर्णयति अहोअतिधन्यं प्र२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा द प्री २२

यस्मादेव पुरुषोत्तमः श्रियः पतिः स्वजन्मना यदोः कुलं अलंचकार तस्मात् कुलं सर्वतिश्च त्यनि सत्करोति अतः श्लाघ्यतमं तत्कुलं मत्सर्वेणमथोरा
वंशं मधुरां सत्करोति अतः सत्तमत्व तमस्मिति तद्देव मध्ये स्यापि अत्यन्तातिशायेनाल मिति तन्नाम्ना अस्तुर्ये अहो इत्युक्ते
अहो वत नेत्यास्त्र्यपि किं न तत् शस्यलीहाका स्वर्ग उत्कृष्ट इति यशः ॥ तस्मात् निरस्त्वरी परिभवकरी भुवपुण्यपया
शस्करी भवतीति यत ॥ यतो यत्र त्यासु नास्वात्रय हेतोः षिते स्मि तं पूर्वाव लोकें युद्वात् गृहार्थे मिषतमिरु स्वस्या
त्मनः पतिः तं श्रीकृष्ण नत्वापिता दिव है कृमात्र पतिं निर्व्यप प्रयत निरसम अहो भाग्यमित्यर्थः ॥ उषितमिति पाठे स्वात्

प्रेषितं यत्तू ॥ तत्र ॥ यस्यतं ॥

अहो अलं श्लाघ्यतमं यदोः कुलं अहो अलं पुण्यतमं मधोर्वनं ॥ यदेष पुंसामृषभः श्रियः श्रियः स्वज
न्मना चंक्रमणेन चांचति ॥ २६ ॥ अहो वत स्वर्यशसस्तिरस्करी कुशस्थली पुण्ययशस्करी भुवः ॥ प
श्यन्ति नित्यं यदनुग्रहेषितं स्मितावलोकं स्वपतिं स्म यत्प्रजाः ॥ २७ ॥ नूनं व्रतस्नानहुतादिनेश्वरः स
मर्चितो ह्यस्य गृहीतपाणिभिः ॥ पिबंति याः सख्यधरामृतं मुहुर्व्रजस्त्रियः संमुमुहुर्यदाशयाः ॥ २८
या वीर्यशुल्केन हृताः स्वयंवरे प्रमथ्य चैद्यप्रमुखान्हि शुष्मिणः ॥ प्रद्युम्नसांबांबसुतादयोऽपरा या
श्चाहृता भौमवधे सहस्रशः ॥ २९ ॥

अहा अर्थं भुषितं कृतनिवासं नैन न त्वगें स्त्री त्यर्थः ॥ २० ॥ हेस एवि अनुग्रह गृहीतया पाणिभिः ॥ पत्नीभिरीश्वरो यमेव
त्वन जन्मान्तरेषु समर्चितः ॥ यस्मिन्नधरामृते आशय स्त्रिंन्ने या सोतान ॥ संमोहं प्राप्ताः पतिमनोहरा मुकुंद पतः
त्वमस्यैव पाशतिहाभ्या ॥ २८ ॥ वीर्य प्रभाव एव शुल्कं मल्य नेन शुष्मिणो बलिष्टान् ॥ प्रद्युम्नश्च सांबश्च अंबश्च
सुता यासां रुक्मिणी जांबवती नाग्नजितीनां आदि यासां सत्यभामादीनां ताः याश्चा यरां अपि श्लोक स्यान्वय

यति २

नो

राम २२

यतः स्त्रीत्वमेव परं केवलं साधु शोभनं कुर्वते अपालेपि पालं भद्रं स्यात् तेन यस्मात्। निरस्त पौर्वं अविलं यस्मात् तथा
भूतमपि जातु कदाचित् पिनापितिन निर्गच्छति प्राप्तिभिर्व्यवहारेषं वापारि जानादि प्रियवस्त्राहरणैः स्थिदिस्मर
स्मृतम् आनंदयन ॥ २३॥ एवंविधा आश्रित्यागिरः सस्मितेन निरीक्षणेनाभिनंदन् महर्षिर्ययौ ॥ २४॥ मधुद्विषो विगोपी
धायरत्त यणायस्ते दायदेभ्यः पाचुभ्यः पोषितः सत्त्वायुक्तः दस्य खरघपादातंरत्येवं चतुरंगिनी इतनां सेनां
॥ २५॥ पोडोः कुरुवंशजत्वात् पांडवा अपि कौरवाएव तान् प्रियैः सुहृद्वादिभिः सह ॥ २६॥ कुरुदेवं कुरुदेशांतर्गतं एव

च

यतः परंस्त्रीत्वमयालपेपालं निरस्त पौर्वं च तत् साधु कुर्वते ॥ यासां गदाग्रजकरलालितः पतिर्न जातु पैत्या
स्थितिभिर्दिदिस्पृशान ॥ २३॥ एवंविधा वदंतीनां स गिरः पुरयोषितां ॥ निरीक्षणेनाभिनंदन् सस्मितेन य
यौ हरिः ॥ २४॥ अजातशत्रुः प्रतनां गोपीथाय मधुद्विषः ॥ परेभ्यः शंकितः स्नेहात् प्रायुंक्त चतुरंगिनी २२
अथ सुहृदागतान् शौरिः कौरवान् विरहातुरान् ॥ सन्निवर्त्य दृढं स्निग्धान्प्रायात् स्वनगरीं प्रियैः ॥ २३॥ कु
रुजांगलपांचालान् शूरसेनान् सयामुनान् ॥ ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान्सारस्वतानथ ॥ २४॥ मरुध
न्वमतिक्रम्य सौवीराभीरयोः परान् ॥ आनर्तान्भार्गवो पागात् श्रांतवाहो मनाग्विभुः ॥ २५॥

तत्र तत्र ह तत्रत्यैर्हरिः प्रत्यु[illegible]तार्हणः ॥ सायं भेजे दिशं पश्चाद्गविष्ठो गां गतस्तदा ॥ ॥१॥

ततः क्रमेणनु विवर्तितः मरुन्निरुदकदेशो धन्वा अल्पोदकः आनर्तो द्वारकादेशः स विभुः कृष्ण आगात् प्राप्तः हे भार्ग
व मनाक् ईषत् श्रांता वाहा यस्य सः ॥ तत्र तत्रास्मिन्देशे तत्रत्यैर्जनैः प्रत्युद्गितानि निवेदितानि अर्हणानि उपायनानि यस्य
सः सायमपराह्णे पश्चाद्दिशां पश्चिमां दिशं भेजे प्राप्तः तदा गविष्ठः स्वर्गस्थः सूर्यो गां समुद्रं केगतः प्रविष्टः अ
स्तंगत इत्यर्थः ॥ अक्रीडावाणप्रातरुदेति अपः सायं प्रविशतीति श्रुतेः ॥ यद्वा तदा सायंकाले जाते रथाद् वती
र्य गविष्ठो भूमौ स्थितः गां जलाशयं गतः सन् पश्चाद्दिशं संध्यां भेजे उपासितवानित्यर्थः ॥ २६॥ ॥ ॥ राम ॥ २४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इति श्रीभावार्थदीपिकायां प्रथमस्कंधे दशमोध्यायः ॥ १० ॥ आनर्तैः स्तूयमानस्य पुरीं निर्विशपबंधुभिः ॥ एकादशे रतिः
सम्यग्यादवेंद्रस्य वर्ण्यते ॥ उत्सवैरुज्वलत्यौरमंदं च ध्वजतोरणं ॥ उल्लसद्रत्नदीपालि स्वपुरं प्रभुराविशत् ॥ स[…]द्धा
न्सुसमृद्धान् दरवरं पांचजन्यं पांचदध्मौ वादितवान् ॥ १ ॥ दर[…] पांच उच्चकाशे शुशुभे धवलं उदरं यस्य सः क
शुभ्रं च काशे अंबुजखंडे रक्तकमलसमूहे कलहंसो राजहंसो यथा चकास्ति तद्वत् ॥ २ ॥ जगतो यद्भयं तस्य भया॰
वहं प्रत्युद्ययुः प्रत्युज्जग्मुः भर्तृदर्शने लालसा औत्कंठ्यं यासां ताः ॥ ३ ॥ तत्र तस्मिन् श्रीकृष्णे उपनीताः समर्पिताः

इति श्रीभागवते प्रथमस्कंधे दशमोध्यायः ॥ १० ॥ श्रीसूतः ॥ आनर्तान्स उपव्रज्य स्वृद्धान्जनपदा॰
न्स्वकान् ॥ दध्मौ दरवरं तेषां श्रुचः प्रशमयन्निव ॥ १ ॥ स उच्चकाशो धवलोदरो दरो प्युरुक्रमस्याधर
शोणशोणिमा ॥ दध्मायमानः करकंजसंपुटे यथाब्जषंडे कलहंस उत्स्वनः ॥ २ ॥ तमुपश्रुत्य निनदं ज
ह॰ गद्भयभयावहं प्रत्युद्ययुः प्रजाः सर्वाः भर्तृदर्शनलालसाः ॥ ३ ॥ तत्रोपनीतबलयो रवेर्दीपमिवादृताः
आत्मारामं पूर्णकामं निजलाभेन नित्यदा ॥ ४ ॥ प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा ॥ पितरं स॰
र्वसुहृदमवितारमिवार्भकाः ॥ ५ ॥ नताः स्मते नाथ सदांघ्रिपंकजं विरिंचिवैरिंच्यसुरेंद्रवंदितं प
रायणं क्षेममिहेच्छतां परं न यत्र कालः प्रभवेत्परः प्रभुः ॥ ६ ॥

बलयः उपायनानि याभिः निरपेक्षेपि तस्मिन्नादरेण समर्पणेपि दृष्टांतः रवेर्दीपमिवेति ॥ ४ ॥ पितरमर्भका इव
सर्वसुहृदमवितारमूचुरित्यन्वयः ॥ सुहृत्त्वेनैवावितारं न तु कामेन अत्र हेतुः ॥ आत्मारामं अत्रापि हेतुः पर
मानंदं निजस्वरूपलाभेनैव पूर्णकामं किमूचुरित्याह ॥ ५ ॥ ते नताः स्मेति विरिंचिर्ब्रह्मा वैरिंच्याः सनकादयः इ
ह संसारे परं क्षेममिच्छतां परायणं ॥ अतः परेषां ब्रह्मादीनां प्रभुरपि कालो यत्र प्रभुर्न भवेत् ॥ ॥ ६ ॥ राम ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अतोभवायउद्भवायन अस्माकं त्वं भव हे विश्वभावन कृतिनः कृतार्था बभूविम ज्ञाता वयं ॥ कृतार्थत्वमेवाह अहो इति ८
अहो भवता वयं सनाथाः स्मः यतः यस्मात् तव रूपं यत् प्रेम त्रैविष्टपानामपि हृद्दर्शनं यत् सुदेवानामपि दुर्लभमित्यर्थः
प्रेमस्मितं तद्युक्तं स्निग्धं निरीक्षणं यस्मिंस्तदाननं यस्मिंस्तद्रूपं सर्वसौभगं यस्मिंस्तत् ॥ अर्भकाः स्वसकृणां
माहः ९ यर्हि यदा भो अंबुजाक्ष नो भवांस्त्रिनियावेन इत्यनादरे षष्ठी अस्मानन्ताहृत्य अपसंसारमपहाय जगामेव
र्थः कुरून् हस्तिनापुरं मधून् मथुरां वा तत्र तदा रविं विना अक्ष्णोः अस्माद् तृणो यथा ॥ एवं तव नः त्वदीया नां अस्मा
कमपीत्यर्थः ॥ ९ ॥ इति च एवंविधा अन्या अश्राव्या रिता वाचः श्रुत्वा नृहरि स्तान्नेदावलोकनेनानुगृह्णन् ऊर्वन् द्वार

भवायन त्वं भवविश्वभावन त्वमेव माताथ सुहृत्पतिः पिता ॥ त्वं सद्गुरुर्नः परमं च दैवतं यस्यानुवृत्त्या कृति
नो बभूविम ॥ ७ ॥ अहो सनाथा भवता स्म यद्वयं त्रैविष्टपानामपि दूरदर्शनं प्रेमस्मितस्निग्धनिरीक्षणा
ननं पश्येम रूपं तव सर्वसौभगं ॥ ८ ॥ यर्ह्यम्बुजाक्षापससार भो भवान् कुरून् मधून् वाथ सुहृद्दिदृक्षया
तत्राब्दकोटिप्रतिमः क्षणो भवेद्रविं विनाक्ष्णोरिव नस्तवाच्युत ॥ ९ ॥ इति चोदीरिता वाचः प्रजानां भक्त
वत्सलः ॥ शृण्वानोऽनुग्रहं दृष्ट्या वितन्वन् प्राविशत् पुरीं ॥ १० ॥ मधुभोजदशार्हार्हकुकुरान्धकवृष्णिभिः
आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ॥ ११ ॥ सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः ॥ उद्यानोपवन
नारामैर्वृतपद्माकरश्रियं ॥ १२ ॥ गोपुरद्वारमार्गेषु कृतकौतुकतोरणां ॥ चित्रध्वजपताकाग्रैरन्तः प्र
तिहतातपां ॥ १३ ॥ संमार्जितमहामार्गरथ्यापणकचत्वरां ॥ सिक्तां गन्धजलैरुप्तां फलपुष्पाक्षताङ्कुरैः ॥ १४

कोऽस्मीति पंचभिः ॥ १० ॥ तां पुरीं वर्णयति पंचभिः मधिति स्वतुल्यबलैर्मधुभोजादिभिर्गुप्तां रक्षितां ॥ ११ ॥ सर्वेषु ऋतुषु
सर्वे विभवाः पुष्पादिसंपदो येषां ते पुण्यवृक्षाः लताश्रमालताः मंडपाश्च येषु तैरुद्यानादिभिर्वृताः पद्माकराः
सरांसि तैः श्रीः शोभा यस्याः तां ॥ उद्यानं फलप्रधानं उपवनं पुष्पप्रधानं आरामः क्रीडार्थवनं ॥ १२ ॥ गोपुरं पुरद्वारं
द्वारं गृहस्य द्वारं कृतानि कौतुकेनोत्सवेन तोरणानि यस्यां गरुडादिचिह्निता ध्वजाः जयप्रदर्शकाः अंकिताः पता
काः चित्राणां ध्वजपताकानामग्रैरन्तः प्रतिहत आतपः यस्याः ॥ १३ ॥ संमार्जितानितिः सार्जितरजस्कानि महामा
र्गादीनि यस्यां महामार्गाः राजमार्गाः रथ्या इतरमार्गाः आपणकाः पण्यवीथ्यः चत्वराणि फलादिभिरुप्तां अवकी

कथं वयं नाथ चिरोषिते त्वयि प्रपन्नतन्द्रहमाखिलतापशोषणं । जीवेम ते सुंदरहासशोभितं अप
श्यमाना वदनं मनोहरं ॥ त्रुटिः

नकेवलं तव अदर्शनेनास्माकं मा धंः किंतु जीवनमपि दुर्लभमित्याहुः प्रप
न्नानां तृष्णाह्वायो खिलतापस्य शोषणं नाशकं त्वां प्रपन्नानां तृष्णासं
भवात् इ टीका ॥

॥ ८६ ॥

ग्रंथनाशि १

८ मू०

मंतराजान

उहंलहितानि

श्री॰ भा॰ ग॰ प्र॰ टी॰ ७४

प्रेष्ठमायांतं निशाम्य श्रुत्वा वसुदेवादयः प्रत्युज्जग्मुरिति चतुर्थेनान्वयः ॥१६॥ [illegible] प्रहर्षवेगेनोच्छ्वसितानि शय
नादीनि यैः समस्तु तगतो ॥१७॥ मंगलार्थं गजं पुरतः कृत्वा ससुमंगलैः सुमंगलपुष्पादियुक्तपाणिभिः द्विजैः ब
ह्मघोषो मंत्रपाठः प्रणयेन स्नेहेनागतः साध्वसः संभ्रमः येषां ॥१८॥ वारमुख्याश्च यानस्थाश्च प्रत्युज्जग्मुर्लसत्कुंडलै
र्निर्भातानि यानि कपोलानि तैः वदनेषु श्रीः शोभा यासां ताः वारमुख्या नर्तक्यो वेश्या ॥१९॥ सूताः पौराणिकाः
प्रोक्ता मागधा वंशशंसकाः ॥ वंदिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः नवरसाभिनयचतुरा नटास्तालाद्यनु — इतियावत

द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः ॥ अलंकृतां पूर्णकुंभैर्बलिभिर्दीपधूपकैः ॥१५॥ निशाम्य प्रेष्ठ
मायांतं वसुदेवो महामनाः ॥ अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः ॥१६॥ प्रद्युम्नश्चारुदेष्णश्च सांबो
जांबवतीसुतः ॥ प्रहर्षवेगोच्छ्वसितशयनासनभोजनाः ॥१७॥ वारणेंद्रं पुरस्कृत्य ब्राह्मणैः ससुमंगलैः
शंखतूर्यनिनादेन ब्रह्मघोषेण चादृताः ॥ प्रत्युज्जग्मू रथैर्हृष्टाः प्रणयागतसाध्वसाः ॥१८॥ वारमु
ख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः ॥ लसत्कुंडलनिर्भातकपोलवदनश्रियः ॥१९॥ नटनर्तकगंधर्वाः
सूतमागधवंदिनः ॥ गायंति चोत्तमश्लोकचरितान्यद्भुतानि च ॥२०॥ भगवांस्तत्र बंधूनां पौराणामनुवर्ति
नां ॥ यथाविध्युपसंगम्य सर्वेषां मानमादधे ॥२१॥ प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः ॥ आश्वा
स्य चाश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः ॥२२॥ स्वयं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि ॥ आशीर्भिर्युज्यमानो
न्यैर्वंदिभिश्चाविशत्पुरी ॥२३॥ राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः ॥ हर्म्याण्यारुरुहुर्विप्र तदीक्षण
महोत्सवाः ॥२४॥ ॥

सारेण नर्तयंतो नर्तका गंधर्वा गायकाः ते सर्वे गायंति चेति चकारस्यान्वयः अद्भुतानि चेति द्वितीयचकारस्य वंदिन इ
त्यन्वयः ॥२०॥ यथाविधि यैः सह यथोचितं तैः तथा समागमं कृत्वा सर्वेषां मानं कृतवानित्यर्थः । तदाह प्रह्वेति
॥२१॥ प्रह्वत्वं शिरसा नतिः अभिवादनं वाचा नतिः ॥ आश्वास्य अभयं दत्वा श्वपाकानभिव्याप्य वरैः अभीष्टदानैश्च मानं
कृतवान् शिरोनतिवाङ्नत्यादिभिः ॥२२॥ अन्यैश्च वंदिभिश्च ॥२३॥ तदीक्षणमहानुत्सवो यासां ताः ॥ ॥२४॥ ॥

राम॰ ७४

हे विप्र शौनक

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यद्यस्मात् नित्यं सदा अच्युतं निरीक्षमाणानामपि दृशो नैव तृप्यंति अतृप्ता आरुरुक्षुः ॥ २५ ॥ कथंभूतं श्रियः शोभाया धा
मस्थानं अंगं यस्य तं एतद्देवाभिनयेनेत्याह ॥ श्रियः लक्ष्म्याः निवासो यस्योरः यस्य मुखं सर्वप्राणिनां दृशां
दर्शामृतपानाय पात्रं यस्य बाहवो लोकपालानां निवासः सारं गायंतीति सारंगा भक्ताः तेषां यस्य पदांबुजं नि
वासः तं निरीक्षमाणानां दृशः इति पूर्वेणान्वयः ॥ २६ ॥ सितैरातपत्रैः व्यजनैश्च उपस्कृतः मंडितः अर्कैः उडुपश्च
चन्द्रसहितः चंद्रस्य चापमिंद्रधनुश्च वैद्युतं विद्युत्तेजः तैर्यको ऽभ्रस्योपमानं नक्षत्राणि पुष्पवृष्टेः चंद्रः परिभ्रमकृत्तमे

नित्यं निरीक्षमाणानां यदपि द्वारकौकसां ॥ न वितृप्यंति हि दृशः श्रियो धामांगमच्युतं ॥ २५ ॥ श्रियो
निवासो यस्योरः पानपात्रं मुखं दृशाम् ॥ बाहवो लोकपालानां सारंगाणां पदांबुजम् ॥ २६ ॥ सितात
पत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि ॥ पिशंगवासा वनमालया बभौ घनो यथार्कोडु
पचापवैद्युतैः ॥ २७ ॥ प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः ॥ ववंदे शिरसा सप्त देवकीप्रमु
खा मुदा ॥ २८ ॥ ताः पुत्रमंकमारोप्य स्नेहस्नुतपयोधराः ॥ हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः
२९ ॥ अथाविशत्स्वभवनं सर्वकाममनुत्तमम् ॥ प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ॥ ३० ॥

डुलाकारयोः चामरव्यजनयोः चापं वनमालाया विद्युत्तेजः पिशंगवाससः अभ्रं तोपमेयं यद्दिवनस्योपरिस्
यं बिंबमभयतः चंद्रौ सर्वतो नक्षत्राणि मध्ये च मिलिते चापद्वयं स्थिरं च विद्युत्तेजो यदि भवेत्तर्हि सघनो यथा भा
तित स्याद्विबिंभावितार्थः ॥ २७ ॥ देवकीप्रमुखाः सप्त ववंदे इति मातृसौंदर्यादविशेषत्तापनार्थं मुदेति अष्टा
दशापि वसुदेवस्य भार्या मातरस्तल्पत्वात् नमस्कृताः एव ॥ २८ ॥ सहस्राणि च षोडशेति चकारादष्टोत्तरशताधिक

श्री
भा.ग.
प्र.टी.
३६

राम

प्रोष्यदेशांतरेउषित्वाआगतंगृहानागतंदेवविलोक्यसंजातोमनसिमहोत्सवोयासांताः आसनादुत्तस्थुः आशयादंतःकरणाच्चो
त्तस्थुः आशयांतःकरणं श्रीकृष्णेनात्मनः संश्लेषेणतःकरणव्यवधानमपिनासहंतेत्यर्थः व्रीडितानिलोचना
न्याननानिचयासांताः अपांगैरेववीक्षणात् ॥ व्रीडितलोचनाश्चवाङ्मुखत्वाद्व्रीडिताननाः साकंव्रतैरितिदासक्रीडा
वर्जनादिनियमादिभिःपुत्रस्थुरित्यर्थः ॥ यतःव्रतान्येवात्रस्थुरितिवाव्रतानियाज्ञवल्क्येनोक्तानिक्रीडांशरीरसंस्का
रंसमाजोत्सवदर्शनंहास्यंपरगृहेयानंत्यजेत्प्रोषितभर्तृकेति ॥ ३१ ॥ आयांतंपतिंदर्शनात्पूर्वमात्मनाबुद्ध्यापरिर
भिरेततोदृष्टिभिरिंद्रियैस्ततःसमीपमागतमात्मजैःपुत्रैर्गृहीतकंठमालिंगंत्यइवस्व यमा लिंगितवत्यइ
त्यर्थः तत्रहेतुः दुरंतभावाः गंभीराभिप्रायाः तदाचतासांचनेत्रयोर्निरुद्धमपिअस्त्रंबाष्पंवैक्लव्याद्वैवश्यादास्र

पत्न्यःपतिंप्रोष्यगृहानुपागतंविलोक्यसंजातमनोमहोत्सवाः ॥ उत्तस्थुरारात्सहसासनाशयात्साकं
व्रतैर्व्रीडितलोचनाननाः ॥ ३१ ॥ तमात्मजैर्दृष्टिभिरंतरात्मनादुरंतभावाःपरिरेभिरेपतिं ॥ निरुद्धमप्यास्र
वदंबुनेत्रयोर्विलज्जतीनांभृगुवर्यवैक्लवात् ॥ ३२ ॥ यद्यप्यसौपार्श्वगतोरहोगतस्तथापितस्यांघ्रियुगं
नवंनवं ॥ पदेपदेकाविरमेततत्पदाच्चलापियच्छ्रीर्नजहातिकर्हिचित् ॥ ३३ ॥ एवंनृपाणांक्षितिभारज
न्मनामक्षौहिणीभिःपरिवृत्ततेजसां ॥ विधायवैरंश्वसनोयथानलंमिथोवधेनोपरतोनिरायुधः ॥ ३४ स
एषनरलोकेस्मिन्नवतीर्णःस्वमायया ॥ रेमेस्त्रीरत्नकूटस्थोभगवान्प्राकृतोयथा ॥ ॥ ३५ ॥

वदीषत्स्रस्राव ॥ अतएवधैर्यहान्याविलज्जतीनांहेभृगुवर्यवि प्रर्षेइति ॥ ३२ पार्श्वगतःसमीपस्थः तत्रापिर
होगतःएकांतेप्रवर्ततेस्मपदेपदेप्रतिक्षणंनवंनवमेवात्रकैमुत्यन्यायः काविरमेतेतिचलाचलस्वभावापिश्रीर्न
जहाति ॥ इत्युक्तंश्रीकृष्णचरितंसंक्षिप्याह ॥ एवमितिद्वाभ्यां ॥ ३४ ॥ क्षितेर्भारायजन्मयेषांअक्षौहिणीभिःकृत्वा
परिवृत्तंसर्वतःप्रसृतंतेजःप्रभावोयेषां ॥ श्वसनोवायुर्वेणूनामन्योन्यसंघर्षणेनअनलंविधायमिथोदाहेन
यथाउपशाम्यतितद्वत् ॥ ३४ ॥ स्त्रीरत्नकूटस्थःउत्तमस्त्रीकदंबस्थः ॥ नन्वेवंस्त्रीसंगादिभिः संसारप्रतीतेः
कथंभगवानवतीर्णइत्युच्यते ॥ तत्राह उद्दाम इतिद्वाभ्यां ॥ ३५ ॥ ॥ राम ॥

राम:
३६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यासामुद्दामो गंभीरो यो भावोऽभिप्रायः ॥ तस्यापि पिशुनः सूचकोऽमलो वल्गुः ॥ सुंदरो हासो व्रीडावलोकश्च [illegible]
ताभ्यां निहतस्तु मदनः श्रीमहादेवोऽपि संमुह्य लज्जया चापं पिनाकमजहात् ॥ अथवा निहतः ॥ ताडितो मदनो
पि जगद्विजयी संमुह्येति कर्तव्यतामूढः सन् ॥ चापं धनुर्लज्जया तत्यजौ ताश्च प्रमदोत्तमाः ॥ कामविजयिन्योऽपि ए
वंप्रभावा याः ॥ स्त्रियो विमथितुं क्षोभयितुं न शेकुः ॥ यद्वा भगवतो मोहिनीरूपेण महेशोऽपि मोहित एव ताश्च
हरिविलासा एवेति तस्योक्ता नाः कुहकैः कपटैः विभ्रमैर्यस्येंद्रियं मनः ॥ क्षोभयितुं न शेकुः ॥ ३६ ॥ तं श्रीकृष्णमयं
प्राकृतो लोक आत्मौपम्येन स्वसादृश्येन संगिनं मनुजं मन्यते ॥ व्यापृण्वानं व्याप्रियमाणं यत अयमबु
धोऽतत्त्वज्ञः ॥ ऊनत्वापेक्षया मैश्वर्यलक्षणमाह ॥ एतदिति ॥ ३८ ॥ ईशस्येशनमैश्वर्यं नामैतदेव किं तत् प्रकृति

उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतो मदनोऽपि यासां ॥ संमुह्य चापमजहात्प्रम
दोत्तमास्ता यस्येंद्रियं विमथितुं कुहकैर्न शेकुः ॥ ३६ ॥ तमयं मन्यते लोको ह्यसंगमपि संगिनं ॥ आ
त्मौपम्येन मनुजं व्यापृण्वानं यतोऽबुधः ॥ ३७ ॥ एतदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः ॥ न युज्यते
सदात्मस्थैर्यथा बुद्धिस्तदाश्रया ॥ ३८ ॥ तं मेनिरेऽबला मूढाः स्त्रैणं चानुव्रतं रहः ॥ अप्रमाणविदो
भर्तुरीश्वरं मतयो यथा ॥ ३९ ॥ इति श्रीभागवते प्रथमस्कंधे एकादशोऽध्यायः ॥ ११ ॥

स्थोऽपि तस्या गुणैः सुखदुःखादिभिः ॥ सदा न युज्यते इति यतः यथाऽऽत्मस्थैरानंदादिभिरात्माश्रयापि बुद्धिर्न युज्
यते न हत ॥ वैधर्म्ये दृष्टांतो वा आत्मस्थैरानंदादिभिः सत्ताप्रकाशादिभिर्यथा बुद्धिर्युज्यते इति ॥ एवं वा सदात्मा नै २
देहः ॥ तत्रस्थैर्गुणैस्तदाश्रया बुद्धिः ॥ तद्गुणा पार्थिवी वा युज्यते इति पूर्वं प्रकृतिस्थोऽपि तद्गुणैर्न युज्यते इति यतः ए
तदीशनमीशस्येति ॥ न ह्यत्योपि न स्यात्तं न जानंतीत्याह ॥ ३९ ॥ तं स्त्रैणमात्मवशं रहः एकांते अनुव्रतमनुगतं ते
मेनिरे भर्तुः प्रमाणनियंतामहिमानमजानंत्य इत्यर्थः ॥ ईश्वरं तेषु तं मतयः अहंकृतयो यथा स्वाधीनं स्वविष
योगिनमयं मन्यंते तद्वत् यद्वा यथा नानासामतयः कल्पनाः स्वयमतमीश्वरं स्वैर्गुणादिरूपं मेन ॥ ३९ ॥ इति प्रथमे एकादशः

मृताः रूपा

प्रमाणविदः २ देहइत्यर्थः २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰
भा ग
प्र टी॰
मू २

प्रोक्तं यदस्त्रं सुगायद्रौणिना दग्धादि विसृजनात् ॥ द्वादशे तु तद्देवाद्धपरीक्षिज्जन्मवर्णनं ॥ परीक्षितो धर्मराजस्यैव जन्म॰
कर्मविलापनं ॥ संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयं ॥ इति प्रतिज्ञाय पांडवानां राज्यस्थितिरूपोद्धातः स
प्रसंगात् सप्तमाध्यायमारभ्य निरूपिता ॥ इदानीं सोपोद्धातिकमुक्तवादर्थं कं पृच्छति ॥ अश्वत्थाम्नेति ॥ उपसृ
ष्टेन विसृष्टेन तस्य जन्मकर्मादि ब्रूहीत्युत्तरेणान्वयः ॥ १ ॥ स परीक्षित् प्रेत्य देहं त्यक्त्वा प्रार्थ्येन त्वोत्तमप्रयामीत्या
ह ॥ गदितुं यदि मन्यसे अनुग्रहेण तर्हि ब्रूहीति यस्य ज्ञानमदात् शुक इति ॥ श्रवणेच्छायां कारणं निःस्पृहस्य

शौनक उवाच ॥ अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा ॥ उत्तराया हतो गर्भ ईशेनाजीवितः पुनः १
तस्य जन्म महाबुद्धेः कर्माणि च महात्मनः ॥ निधनं च यथैवासीत्स प्रेत्य गतवान्यथा ॥ २ ॥ तदिदं श्रोतुमि
च्छामि गदितुं यदि मन्यसे ॥ ब्रूहि नः श्रद्दधानानां यस्य ज्ञानमदात् शुकः ॥ ३ ॥ सूत उवाच ॥ अपीप॰
लद्धर्मराजः पितृवद्रंजयन्प्रजाः ॥ निःस्पृहः सर्वकामेभ्यः कृष्णपादानुसेवया ॥ ४ ॥ संपदः क्रतवो विप्र
महिषी भ्रातरो मही ॥ जंबुद्वीपाधिपत्यं च यशश्च त्रिदिवं गतं ॥ ५ ॥ किं ते कामाः सुरस्पार्हा मुकुंदमन॰
सो द्विजाः ॥ अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे ॥ ६ ॥ मातुर्गर्भगतो वीरः स तदा भृगुनंदन ॥ ददर्श पुरु
षं कंचिद्दह्यमानोऽस्त्रतेजसा ॥ ७ ॥

पितुः श्रीकृष्णात् अनुग्रहात् वृष्णेराहवे यो ऽवः समजनीति वक्तुं तस्य युधिष्ठिरस्य श्रीकृष्णे भक्त्युद्रेकमाह ॥ अपीपलदिति
त्रिभिः ॥ ४ ॥ पितृवत् अपीपलत् पालयामास निःस्पृहत्वे हेतुः कृष्णपादेति ॥ ४ ॥ क्रतवस्तदुपार्जिता लोकाः श्रुतेः संप
दादयः विषयाः सुरस्पार्हाः सुराणां स्पृहणीयाः ॥ हे द्विजाः राज्ञो मुदं प्रीतिं किमधिजह्रुः ॥ न हृतवंत इत्यर्थः ॥ अत्र
हेतुः मुकुंदमनस इति मुकुंद एव मनो यस्येति ॥ यथा बुभुक्षितस्यान्नैकमनसः ॥ इतरे स्रक्चंदनाद्याः न रुचिं ति
तद्वत् ॥ अस्त्रतनमाह मातरिति ॥ ६ ॥ गर्भ एव ददर्श कंचिदद्भुतमित्याह ॥ ७ ॥ ॥

संतोषं

रास॰
मू २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पुरंदरस्य वर्णौ स्फुरत्सुरटमौलिर्यस्मात्तीति तं मौलिनमितिश्रीत्यादिभ्यश्चेति निप्रत्ययः अपीव्यमतिसुंदरं प्रिया
ममितिचपदाभ्यां दृश्यते इतिदर्शनं रूपं यस्य तडिद्धाससं तडिद्वद्भाससीयस्येति विद्युद्भूषितमेघोपमास्त विना
श्रुतमविकारं ॥ ८ ॥ तमुंदाहोत्रीलेयत्कांचनं तन्मयं कुंडलेयस्य तत्तज्जातसंरंभादत्यारक्तनेत्रं अहोमहत्क्रः
तदुमत्यमायुषंषां अहो मर्त्यानां मरणवतां नयापि ऋतं नेसत्यं भोत्तम्यि कृतां यो मत्युः स ग्रह सत्ये प्राणित्वविदं प्राणितं कमेपत्यु हिंसनेतदर्थमुपहृतः ततः किमतआह नकश्चिदिति ॥ ८ ॥ तावत्तत्र समाप्तिपर्यंते इहभूत लेनकश्चिन्नियतेनन अपि किमत आह ॥ ९ ॥ अहोनल्लोके हरिकथा मृतेववः यो येईश्यनदर्थं हरिलीलेत्त वामृतेयस्मिन्न तदभावे हच्येवजीवन मित्याह मंदस्य अल्पसस्य नक्रा राज्ञो यद्व यआयुः तत्रिइयादिवा अद्विवयहृयः नहाय कर्मभिः प्रत्याहियते यस्मिन्यीनेहातं सर्वं इहासनोदिके भवेत् ॥ नत्रतावत्कलिनिग्र(

तदायुषांत्वण मंगमत्यानामृतमिकृतं ॥ इहोपहूतो भगवान्मृत्युः शामित्र कर्मणि ॥ ८ ॥ नकश्चि न्मियते तावद्यावदास्त इहान्तकः ॥ एतदर्थं हि भगवानाहूतः परमर्षिभिः ॥ ९ ॥ अहोन्नृलोके पी येत हरिलीलामृतं वचः ॥ मंदस्य मंदप्रज्ञस्य वयो मंदायुषश्च वै ॥ १० ॥ निद्रयाह्रियते नक्तं दिवा व्यर्थकर्मभिः ॥ सूत उवाच ॥ यदा परीक्षित्कुरुजांगलेऽवसत्कलिं प्रविष्टं निजचक्रवर्तिते ॥ निशाम्य वार्तामनतिप्रियां ततः शरासनं संयुगशौण्डिराददे ॥ ११ ॥ स्वलंकृतं श्यामतुरंगयोजितं रथं मृगेन्द्रध्वजमाश्रितः पुरात् ॥ वृतो रथाश्वद्विपपत्तियुक्तया स्वसेनया दिग्विजयाय निर्गतः ॥ १२ ॥ भद्राश्वं केतुमालं च भारतं चोत्तरान्कुरून् ॥ किंपुरुषादीनि सर्वाणि विजित्य जगृहे बलिम् ॥ १३ ॥ तत्र तत्रोपशृण्वानः स्वपूर्वेषां महात्मनाम् ॥ प्रगीयमाणं च यशः कृष्णमाहात्म्यसूचकम् ॥ १४ ॥ आत्मानं च परित्रातमश्वत्थाम्नोऽस्त्रतेजसः ॥ स्नेहं च वृष्णिपार्थानां तेषां भक्तिं च केशवे ॥ १५ ॥ तेभ्यः परमसंतुष्टः प्रीत्युज्जृम्भितलोचनः ॥ म

ग्रहप्रसंगमाह ॥ १० ॥ यदा निजचक्रवर्तिते स्वसेनया पालिते देशे कलिं प्रविष्टं शुश्राव तदा तामनतिप्रियां वार्तां विचित्यविवृद्धकौतुक संपन्नेः तां निशाम्य तदा शरासनं दृष्ट्वा निग्रहार्थमाददे ॥ संयुगशौण्डिः युद्धे प्रगल्भः ॥ पाणोत्तरे युद्धे शौर्यवित्वल्यः ॥ ११ ॥ तत्र स्वादिग्विजयार्थं निर्गतः ॥ १२ ॥ भद्राश्वादीनि पूर्वपश्चिमदक्षिणोत्तरतः सप्तहलपानि सर्वाणि वर्षाणि मेरोः सर्वतः इलावृतेन ततउत्तरतो रम्यकं हिरण्मयं च दक्षिणतो हरिवर्षं किंपुरुषं च तानि विजित्य ॥ १३ ॥ प्रगी

:श्रीकृष्ण३

ए. स्कंधे ... रामः
९९

किंवा त्रिमेषु पांडवेषु विसोयोनि सारस्याधादीनि कर्मोणि श्रावस्त स्याविसोर्जे गात्कर्टकोप्रणति चस्प्राएवन नृप
तिः परीक्षिन् विसोः चवरणार्विदे भक्तिं करोति स्म पाविषद स्मिति रेफ सकारयोर्विश्लेषः ॥ छांदसः ॥ तत्रपाविष
दं समापनित्वं सेवनं वित्राशुवृत्तिः ॥ वीरासनेनाशोलवङ्गदसस्पतिश्रुतोजागरणं ॥१८॥ पनोवृत्तिमनुवर्तमानस्य
नातिदूरेस्थीत्रमेव ॥१८॥ धर्मोनुषद्रूपो विज्ञायोहत प्रभांगीगोवृत्याष्टघ्रीविवस्मानस्रापत्यो ॥१९॥ तेआत्मनो
देहस्य यद्यपि वह्नि रामयोनलत्यनेनस्यापिश्रुंतमेधोश्राधिः ॥ पीडायस्मास्तोत्वामालत्वयेकेनयतोविज्ञायासि
श्रुतरेषन्स्नायनावेवशंयभजनातुवेनलिंगेनतत्रकारणानिकल्प्यनृष्क्रति ॥ इदं तं भुमित्यादि षड्विधिः ॥ हदे

सारस्यापाविषदमेवनसत्यदैास्यवीरासनानुगमनस्तवनप्रणामं ॥ त्रिमेषु पांडुषु जगत्त्राणति स्म
विसो [illegible] भक्तिं करोतिन्दपनिस्तुवरणावर्विंदे ॥१७॥ तस्यैववर्तमानस्य एवंषां
वृत्तिमन्वहं ॥ नातिदूरे किलाश्चर्यं यदासीत्तन्निबोधमे ॥१८॥ धर्मः पदैकेनचरन् विच्छायामुपलभ्य गां
पृच्छति स्मास्रुवदनां विवत्सामिव मातरं ॥१९॥ कच्चिद्भद्रेनामयमात्मनस्ते विच्छायासि म्लायते षन्मुखेन
न आलक्षये भवतीमन्तराधिं दूरे बंधुं शोचसि कंचनांब ॥२०॥ पादैर्न्यूनं शोचसि मैकपादमात्मानं वा ह
षलैर्भोक्ष्यमाणं ॥ आहो सुरादीन् हृतयज्ञभागान् प्रजा उत स्विन्मघवन्यवर्षति ॥२१॥ अरक्ष्यमाणाः स्त्रिय
उर्वि बालान् शोचस्यथो पुरुषादैरिवार्तान् ॥ वाचं देवीं ब्रह्मकुले कुकर्मण्यब्रह्मण्ये ब्रह्मकुले कुला
ग्यान् ॥२२॥ किं क्षत्रबंधून् कलिनोपसृष्टान् राष्ट्राणि वा तैरवरोपितानि ॥ इतस्ततो वाशनपानवासःस्ना
नं भुमित्यादि षड्भिः हरे स्थितं बंधुं ॥२०॥ त्रिभिः पादैर्न्यूनं अतएवैकपादं मा वृषलैः ॥ श्वपचादिभिर्भोक्ष्यमाणं पुं
स्त्वमात्मपदविशेषणत्वात् ॥ हृतयज्ञभागा येषां तेषु यज्ञाद्यकरणात ॥२१॥ हे उर्वि दुष्टप्रतिभिररक्ष्यमाणाः स्त्रि
यः पितृभिररक्ष्यमाणान् ॥ बालान् प्रत्युत तैरेव पुरुषादैरिव निर्दयैरार्तान् ॥ क्लिष्टान् ॥ वाचं देवीं सरस्वतीं कुकर्म
णि दुर्व्यवहारे स्थिता ॥ कुलाग्यान् ब्रह्मण्येनत्नमानुसेवकान् ॥२२॥ उपसृष्टान् व्याप्तान् ॥ अवरोपितानि उद्वासितानि
वासायः मैथुनैर्निषेधानादरेण सर्वतोऽशनादिषु उन्मुक्तप्रवर्तमानजीवलोकवा ॥२३॥ ॥

दृतलतोः

लितउद्दी

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा. पु.
प्र. टी.
५०

हेतुमाह तथैवेति तेन वयो भूरिभारः ॥ तस्यावतारणार्थं कृतावतारस्य कर्माणि स्मरंती तेन विसृष्टा सती शोचसि
निर्वाणविलंबितानि मोक्षितं येभ्यस्तानि ॥ पादौ तवेनिर्वाणं विहंबितमुपहसितं येभुवने मोद्यादयधिकसुखानीत्यर्थः २३
हे अंब तव सौभाग्यं कालेन वा हृतं ॥ २४ ॥ भवान्तं ज्ञानात्येव तथापि वक्ष्यामीत्याह ॥ येन कृत्स्नेन हेतुभूतेन कृत्स्नशोकः
सोऽवत्वस्य माणत्वात् त्वं चतुर्भिः पादैर्वर्तसे ॥ २५ ॥ यदुक्तं स्वस्मादयो गुणा न वियंति तेन ह्रीयंते तेन श्रीनिवासेन रहितं
लोकं शोचामीति षष्ठेनान्वयः ॥ सत्यं यथार्थभाषणं शौचं शुद्धत्वं दया परदुःखासहनं क्षांतिः क्रोधप्राप्तौ चित्तसं-
यमनं त्यागो याचितुं प्रकृत्या दानं संतोषोऽलंबुद्धिः ॥ आर्जवमवक्रता शमो मनोनैश्चल्यं दमो बाह्येंद्रियनैश्चल्यं त-
पः स्वधर्मः साम्यं सरिमित्रादिभावः ॥ तितिक्षा परापराधसहनं उपरतिर्लाभप्राप्तौ औदासीन्यं श्रुतं शास्त्रविचारः
[illegible] यदांबु ते भूरिभरावतारकृतावतारस्य हरेर्धरित्रि ॥ अंतर्हितस्य स्मरती विसृष्टा कर्माणि निर्वाणविलंबि- [illegible]
तानि ॥ २३ ॥ इदं ममाचक्ष्व तवाधिमूलं वसुंधरे येन विकर्शितासि ॥ कालेन वा ते बलिनां बलीयसा सुरार्चि-
तं किं हृतमंब सौभगं ॥ २४ ॥ धरण्युवाच ॥ भवान्हि वेद तत्सर्वं यन्मां धर्मानुपृच्छसि ॥ चतुर्भिर्वर्तसे ये-
न पादैर्लोकसुखावहैः ॥ २५ ॥ सत्यं शौचं दया [illegible] क्षांतिस्त्यागः संतोष आर्जवं ॥ शमो दमस्त-
पः साम्यं तितिक्षोपरतिः श्रुतं ॥ २६ ॥ ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः स्वातंत्र्यं कौशलं कांतिर्धैर्यं मार्दवं
एव च ॥ २७ ॥ प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः ॥ गांभीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोऽनहंकृतिः ॥ २८ ॥
एते चान्ये च भगवन्नित्या यत्र महागुणाः ॥ प्रार्थ्या महत्त्वमिच्छद्भिर्न वियंति स्म कर्हिचित् ॥ तेनाहं गुणपात्रेण श्री-
१० ज्ञानं [illegible] विरक्तिर्वैतृष्ण्यं ऐश्वर्यं नियंतृत्वं शौर्यं संग्रामोत्साहः तेजः प्रभावः बलं दक्षत्वं स्मृतिः कर्तव्याक-
र्तव्यानुसंधानं स्वातंत्र्यं अपराधीनता कौशलं क्रियानिपुणता कांतिः सौंदर्यं धैर्यं अव्याकुलता मार्दवं चित्ताकाठिन्यं
प्रागल्भ्यं प्रतिभातिशयः प्रश्रयो विनयः शीलं सुस्वभावः सहो मनसः ओजो ज्ञानेंद्रियाणां बलं कर्मेंद्रियाणां पाट-
वं भगो भोगास्पदत्वं गांभीर्यं मतो[illegible] स्थैर्यमचंचलता आस्तिक्यं [illegible] श्रद्धा कीर्तिर्यशः मानः पूज्यत्वं अनहंकृति-
र्गर्वाभावः एते एकोनचत्वारिंशत् ॥ २९ ॥ अन्ये च ब्रह्मण्यत्वशरण्यत्वादयो महांतो गुणाः प्रार्थनीयाः सहजा न वियंति
न हीयंते स्म ॥ ३० ॥ तेन गुणपात्रेण गुणालयेन पाप्मना पापहेतुना ॥ ३० ॥

ये १
पृथ्वीधर्मसं
१६
५०

भ्य३

तस्मादिदं रोदः सहस्रन्यासहस्तनमिः ग्लानिर्योवसाः श्रियः श्रवांगमोदाः स्वास्मिनहक्षणाः हृष्टिपानाः नकामाः संतोषे
हकालनयः समसदस्यस्मपकचोरनिसा ॥ भगवद्धक्तमेः म पद्माश्राश्रितापिसाश्रीपिसपाद लावण्यमलमनु
रक्तासतीसेवते ॥ २२ ॥ तमसभगवन् श्रीमदि पदे केनप्रभुनाम्नारघः केनानिविद्धानिवेषांनेः ॥ पदाङ्गादीनामिश्र
यः सम्यगलं कृतनगयस्याः साहन्तमो भगवतः संपदविभूतिउपलभ्यमाश्रयश्रीलोकानतिव्रन्याध्यरोवेशोः
भितवनास्मि ॥ यज्ञानस्मादिविश्वतेन ना श कालमामेसनिःउलसपनीगर्वकवोएणमानवास्सजनतक्रवा
न ॥ २४ ॥ किंदयोदेश्रान्तरोवेशः पदानामसतांहिणीशानरूपश्रानिभारमपनानवान ॥ नार्योऽनुपादनातुःस्य
आलानेचानुशोचामिभवंतंवामरोत्तमं ॥ देवान्पितॄन्ऋषीन्साधून्सर्वान्वर्णांस्तथाश्रमान ॥ २५ ॥ ब्रह्मादयो
बहुतिथंयदपांगमोक्षकामास्तपः समचरन्भगवत्प्रपन्नाः ॥ साश्रीः स्ववासमरविंदवनंविहाय
यत्पादसौभगमलंभजतेनुरक्ता ॥ २६ ॥ तस्याहमब्जकुलिशांकुशकेतुकेतैः ॥ श्रीमत्पदैर्भगवतः सम
लंकृतांगी ॥ त्रीनत्यरोचउपलभ्यततोविभूतिंलोकान्समावसृजउत्स्मयतींतदंते ॥ २७ ॥ यो वै म
मातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानुदरात्मतंत्रः ॥ त्वां दुःस्थमूनपदमात्मनि पौरुषेण
संपादयन्यदुषुरम्यमबिभ्रदंगं ॥ २८ ॥ कावासहेतस्य विरहंपुरुषोत्तमस्यप्रेमावलोकरुचिरस्मितवल्गुजल्पैः
स्थैर्यंसमानमहरन्मधुमानिनीनांरोमोत्सवोममयदंघ्रिविटंकिताया ॥ २९ ॥ तयोरेवं कथयतोः
पृथिवीधर्मयोस्तदा ॥ परीक्षिन्नामराजर्षिः प्राप्तः प्राचीं सरस्वतीं ॥ ३० ॥ इतिश्रीभागवतेप्रथमस्कं
धेषोडशोऽध्यायः १६ राम
संनैयौरुक्षेणपुरुषकारेणश्रान्तान्निस्वासिमंसपूर्णपरेस्वस्थेसपर्दपर ॥ स्तहाणरोतोः श्रियावाहनिरेसौ
शास्त्रप्रनापः सपारावितानिम्नस्थैः ॥ श्रविप्रनष्टनवानिनार्यः ॥ २५ ॥ तस्याविरहेकावासहेत ॥ प्रेमावलोकस्तुरु
चिरस्मितवल्गुजल्पत्रिनेमधुमानिनीनांसत्याभामादीनांगर्वसहितेस्थैर्यंसम्यगनेयोहरत ॥ पदं घ्रिरजसो
नोरुकंहसेवे ॥ २९ ॥ इतिश्रीभावार्थेप्रथमेषोडशः १६ ॥ राम

समानं २

श्री
भा० रा०
प्र० टी०
या

ततः समरदेवताः कलितनिग्रहव्याते ॥ नमेवं वीर्यभाजोऽपि वैराग्यवृक्षमङ्कुतं हन्यमानेन तत्र मात्रे ॥ ८ ॥ मरालं पञ्ज
कटः नरहन्तधवलभ पाने हं न मम त्रयेण तामवैनमनेनयदारशोपयभेपकामकृत्रपत्रिरमनिलतलान्नीयमण्णांशः
तस्यायानिर्वाहतनकंदमानदवेसेवराशीनं ॥ ९ ॥ यमेवघाहविदंद्याहिक्रयणा दामायवसेतलणमिच्छती श्रुश
यिमस्यादिश्रमवलयाहिवसेव ॥ यज्ञाभावात्क्रशा ॥ श्रुतपवयश्रमागामिच्छ तीहस्त्रीनिसरचितेत ॥ १० ॥ कार्तवरचेश
वर्षेववक्लृटः यमिकरोयमासत्सांनिबद्धमित्यर्थः ॥ सत्तोऽहृतकार्मुकः ॥ ४ ॥ हे मिथान यमि राजा हर्षीतिवित्र
द ॥ नटवदेशमात्रेणतनार्देवात्मिक मर्मणां हिजः शूद्रः ॥ ५ ॥ श्रुशेणाध्यात्मानिरपराधावहसिनयप्रद र तस्य शोचाः

समा

स्ततः ततवेगासिधुने राजा हनना मार्गस्य च देहदूसेवतमवलेंददर्शननपलोक्यने ॥ ११ ॥ हे पंकमणालपवले
मे हं तामिवविभ्यति ॥ वृपमानेपदेकेनसीरेतेमूद्रतादिते ॥ १ ॥ गांचयमेडुवंरीनामम्हशास्त्रहपरादहनो विव
ताम मस्तवरनोहृपांयवसमिच्छती ॥ २ ॥ प्रश्नरथमा हृष्टः कार्तवरयविकृट मे त्वं गंभीरपाल्लावा
समारोपितकार्मुकः ॥ ५ ॥ क लंस मक्रूरणलोकेवलासवलानुलो नरदेवासिवे सुतनटवक्कमे ढं ४
णाः हिज ॥ ५ ॥ कस्मिन्हृहलगतेहदेमस्तमांडीवयन्वना ॥ शाखाेऽ सोऽ श्री ॥ हारामिम हरा त्वधर्महमिह च्यात् ४
तेवामरणालपवल पादेत्तूनःपद्रावान ॥ क्षमत्त्व वणाकिंकांश्चिहेवः पिरयसीहनः ॥ ७ ॥ नजानके
वेहाणरोदेडयपरिरंभिने ॥ भूतलेनवपतेनांसिमालिनानेप्राणिना नास्थवः ॥ ८ ॥ मासोरभेयानु
वेध्येतनेहषलाइय ॥ मारोदीरेवमेहतेवलानांमाथिशक्तिनि ॥ ८ ॥ ॥ रामः ॥

माणनाधोस्मिस्रतोवधर्महे हासिहणे त्रनाहनवेति ॥ ९ ॥ हे मरणालयवलनैवाकः स्वयमेवसंभावयति किंकरि
सो २ देवोत्सवह्वणोस्त्र साम्नेवेरपल्लवर्नसे ॥ १ ॥ दोर्दडैः परिरंभितेरदिनेभूतलेतेनपातिना श्रुवः श्रुलगणीसनोवाताज्ञ
पततीतिविरहेनवेदर्शीइति पवमसेउ नरपिशेशावनेमन्याह ॥ ५ ॥ गोः स्वरभेः उत्तमाशुवमाशोकेतराक्बोन्तु रामः ५
श्रुणयानगांप्रनाह ॥ हे श्रेवमानः श्रावानरिमयिजीवतिसतितेभद्रमेव ॥ श्रुतोमारोदीः ममहेतार्थमेवेनंहंति
वामिनतवोपका येत्नाह ॥ यसोनिद्राभ्यो ॥ ४ ॥

रा० ते ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हे साधु सर्वथा: कश्चिदित्यर्थः ॥ असाधुभिः ॥ असंते पीड्यंते भगो भाग्यं गतिः परलोकस्य पुनरपि शोचंतं तद्वृषभ इत्याह ॥ १०
कस्य हेतोश्चिच्छेद त्वाह यस्मात् तद्विधाः दुःखिताः ॥ ११ ॥ यो भद्रमस्तु आत्मनस्तव पादच्छेदेन वैरूप्यं कृतवंतं कीर्तिं दूषयतीति
तथा तमाख्याहि तदाख्याने कृते कथं भद्रं स्यादित्याह ॥ १३ ॥ यस्मादनागसि जने योऽघं दुःखं कुर्वन्भवति ॥ एवंभूतस्यास्य
मर्त्यः सकाशात् सर्वत्र भयं भवति ततः साधूनां भद्रं भवेत् ॥ एतद्धेतुद्वयमसमर्थः इति मा विपक्षी कीर्त्याह ॥ अनागस्स्विति आ
गत्य तमपराधकर्तारं तस्य मर्त्यस्य देवस्यापि भुजमाहर्तास्मि आहरिष्यामि सांगदमित्यनेन मूलतउत्पात्य आहरिष्यामीति ष्य २
दर्शितं ॥ ननेकस्य निग्रहेणान्यस्यानुग्रहेण वा किं प्रयोजनं तत्राह ॥ १५ ॥ अन्यान् तथर्मिष्ठान् शासतः दंडयतः ॥ १६ ॥ आर्तानामभये

यस्य राष्ट्रे प्रजाः सर्वाः त्रस्यंते साध्व्यसाधुभिः ॥ तस्य मत्तस्य नश्यंति कीर्तिरायुर्भगो गतिः ॥ १० ॥ एष राज्ञां परो धर्मो
ह्यार्तानामार्तिनिग्रहः ॥ अत एनं वधिष्यामि भूतद्रोहमसत्तमं ॥ ११ ॥ कोऽवृश्चत्तव पादांस्त्रीन्सौरभेय चतुष्पद
मा भूवंस्त्वादृशा राष्ट्रे राज्ञां कृष्णानुवर्तिनां ॥ १२ ॥ आख्याहि वृषभद्रं वः साधूनामकृतागसां ॥ आत्मवैरूप्यकर्तारं
पार्थानां कीर्तिदूषणं ॥ १३ ॥ जनेऽनागस्यघं युंजन्सर्वतोऽस्य च मद्भयं ॥ अनागास्स्विह भूतेषु य आगस्कृन्निरंकुशः ॥ साधूनां भद्रमेव स्यादसाधुकर्तृके कृते ॥ १४ ॥
आहर्तास्मि भुजं साक्षादमर्त्यस्यापि सांगदं ॥ १५ ॥ राज्ञो हि परमो धर्मः स्वधर्मस्थानुपालनं ॥ शासतोऽन्यान्यथा शा
धर्मउवाच २ स्त्रमनापद्युत्पथानिह ॥ १६ ॥ एतद्वः पांडवेयानां युक्तमार्ताभयं वचः ॥ येषां गुणगणैः कृष्णो दौत्यादौ भगवान्कृतः
१७ न वयं क्लेशबीजानि यतः स्युः पुरुषर्षभ ॥ पुरुषं तं विजानीमो वाक्यभेदविमोहिताः ॥ १८ ॥ केचिद्विकल्पवस
ना आहुरात्मानमात्मनः ॥ दैवमन्ये परे कर्म स्वभावमपरे प्रभुं ॥ १९ ॥ ॥

यस्मात्तव वचसो वः युष्माकं युक्तमुचितमेव ॥ १७ ॥ वयं तं यतः पुरुषात् क्लेशानां क्लेशहेतवो भवेयुः तं पुरुषं न जानीमः ॥ यतो वा
दिनो वाक्यभेदैर्विमोहिताः वाक्यभेदानेवाह ॥ १८ ॥ विकल्पं भेदं वसते आच्छादयंतीति ये योगिनः ते आत्मानमेव आत्मनः प्रभुं सु
खदुःखप्रदमाहुः ॥ तदुक्तं ॥ आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मन इति यद्वा विकल्पैः कुतर्कैः शाद्वतानास्तिका एवं हि ते वदं
ति ॥ न तावद्देवतादीनां प्रभुत्वं कर्माधीनत्वात् ॥ न च कर्मणः स्वाधीनत्वात् ॥ अतः स्वयमेव भगवान्प्रभुः कश्चिदिति ॥ अन्ये दै
वज्ञाः दैवग्रहादिरूपिताः दैवं ग्रहादिरूपं देवतामपरे मीमांसकाः कर्म अपरे लोकायतिकाः स्वभावं ॥ १९ ॥ ॥ ❀ ॥ नचान्यः २

केचित्तु सेश्वरेश्वरपि इति डुलेभन्त्वं दर्शितं तंनिश्चयइतिसिद्धांततत्वं अप्रतर्क्यान्मनोगोचरत्वादनिर्देश्यात् वचनागोचरात्परमेश्वरात्
वै भवतीति विमृष विचारय स्वबुद्ध्या ॥ २० ॥ विखेदो गतमोहः पर्यचष्ट प्रत्यभाषत ज्ञातवानिति वा ॥ २१ ॥ अनिर्धारितमिव ब्रुवन्त्या
न के ज्ञानं त्वयापि न सूचये दित्येवं रूपं धर्मं ब्रवीषि अतो धर्मोसि सूचकेको दोष इत्यत आह ॥ यदिति स्थानं नरकादि ॥ यद्वा ज्ञानादेः
पकस्य न वै भवतीत्याह ॥ अथवेति ॥ २२ ॥ देवस्य मायाया गतिर्वध्यघातकलक्षणा भूतानां चेतसो वचसश्चागोचरस्ति विचे
यानभवतीति निश्चयः ॥ धर्मो साविति ज्ञात्वा तस्य पादान्वादेन स्तुवन्नाह तप इति द्वाभ्यां ॥ २३ ॥ अधर्मपादैः त्रयः पादाः
त्रिभिरंशैः भग्नाः स्मयो विस्मयः संगः क्रीडामदः अहंकारः इदानीं कलौ हे धर्म ते पादः चतुर्थांशः तत्रापि सत्यमेवास्ति ॥ यतः स

अप्रतर्क्याद निर्देश्यादिति केष्वपि निश्चयः ॥ अत्रानुरूपं राजर्षे विमृश स्वमनीषया ॥ २० ॥ एवं धर्मे प्रवदति स सं-
म्राड्द्विजसत्तम ॥ समाहितेन मनसा विखेदः पर्यचष्टत ॥ २१ ॥ धर्मं ब्रवीषि धर्मज्ञ धर्मोसि वृषरूपधृक् ॥ यदधर्मकृतः
स्थानं सूचकस्यापि तद्भवेत् ॥ २२ ॥ अथवा देवमायाया नूनं गतिरगोचरा ॥ चेतसो वचसश्चापि भूतानामिति निश्च-
कृता:४ यः ॥ २३ ॥ तपः शौचं दया सत्यमिति पादाः कृते कृताः ॥ अधर्मांशैस्त्रयो भग्नाः स्मयसंगमदैस्तव ॥ २४ ॥ इदानीं धर्म
पादस्ते सत्यं निर्वर्तयेद्यतः ॥ तं जिघृक्षत्यधर्मोयमनृतेनैधितः कलिः ॥ २५ ॥ इयं च भूमिर्भगवता न्यासितोरुभरा
सती ॥ श्रीमद्भिस्तत्पदन्यासैः सर्वतः कृतकौतुका ॥ २६ ॥ शोचत्यश्रुकला साध्वी दुर्भगेवोज्झिता सती ॥ अब्रा-
ह्मण्या नृपव्याजाः शूद्रा भोक्ष्यंति मामिति ॥ २७ ॥ इति धर्मं महीं चैव सांत्वयित्वा महारथः ॥ निशातमाददे ख-
ड्गं कलयेधर्महेतवे २८ ॥

न्याद्रेवा नान्यानं निवर्तयेत् कथंचिद्धारयेत् यद्वा पूरुषस्तां साधयेत् ॥ तदपि पादमनृतेन संवर्धितः कलिरूपोयमधर्मो ग्रही-
तुमिच्छति ॥ तत्रेयं स्थितिः कृतयुगे प्रथमं संपूर्णाः चत्वारः पादाः धर्मस्य ॥ त्रेतायां [illegible] चतुर्णामपि पादानां मध्ये स्मयेन तपः संगेन शौ-
चं मदेन दया अनृतेन सत्यमित्येव चतुर्थांशो हीयते ॥ द्वापरे तु अर्धं कलौ चतुर्थांशो वशिष्यते सोप्यनृतेन नश्यतीति ॥ २५ ॥ न्यासितो-
सोन्यद्वारेणावतारितः उरुभारो यस्याः कृतं कौतुकं मंगलं यस्याः ॥ २६ ॥ अश्रूणि कलयति मुंचतीत्यश्रुकला अनेन त्यक्ता सती
शूद्रा भोक्ष्यंति मामिति शोचति ॥ २७ ॥ निशाते निशिते अधर्मस्य हेतवे यः कलिस्तं हंतुमित्यर्थः ॥ २८ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अभिप्रेत्य ज्ञात्वा ॥ २९ ॥ शरण्यः शरणार्हः आश्रयार्हः श्लोक्यः संकीर्त्यः ॥ ३० ॥ गुडाकेशोऽर्जुनः तस्य यशोधरा ये वयं तेषां त्वत्प्रति बद्धा-
ञ्जलिर्येन तस्य ते तव किं तु कथं च न केनाप्यंशेन न वर्तितव्यं यस्मात्त्वं अधर्मबंधुः तदेवाह ॥ ३१ ॥ राजन्देहेषु वर्तमानं त्वामनु
सर्वतः प्रवृत्तः अनार्यं दोषजन्यं अंहः स्वधर्मत्यागः ज्येष्ठाऽलक्ष्मीः माया कपटं ॥ ३२ ॥ तत्तस्मात् वर्तितव्ये वर्तितुमर्हे ब्रह्मावर्ते
देशे यत्तस्य वितानं विस्तारो हि तत्र निपुणाः ॥ ३३ ॥ इज्या यागः तद्रूपा मूर्तिर्यस्य शं तेषां तनोति कामांश्च न तु इंद्रादयो देवा

तं जिघांसुमभिप्रेत्य विहाय नृपलांछनं ॥ तत्पादं शिरसा नम्रः समगाद्भयविह्वलः ॥ २९ ॥ पतितं पादयोर्वीरः
कृपया दीनवत्सलः ॥ शरण्यो नावधीच्छ्लोक्य आह चेदं हसन्निव ॥ ३० ॥ राजोवाच ॥ न ते गुडाकेशयशोधरा
णां बद्धांजलेर्वै भयमस्ति किंचित ॥ न वर्तितव्यं भवता कथं च न क्षेत्रे मदीये त्वमधर्मबंधुः ॥ ३१ ॥ त्वां वर्तमा
नं नरदेवदेहेष्वनुप्रवृत्तोऽयमधर्मपूगः ॥ लोभोऽनृतं चौर्यमनार्यमंहो ज्येष्ठा च माया कलहश्च दंभः ॥ ३२ ॥ न व
र्तितव्यं तदधर्मबंधो धर्मेण सत्येन च वर्तितव्ये ॥ ब्रह्मावर्ते यत्र यजंति यज्ञैर्यज्ञेश्वरं यज्ञवितानविज्ञाः ॥ ३३ ॥
यस्मिन्हरिर्भगवानिज्यमान इज्यात्ममूर्तिर्यजतां शं तनोति ॥ कामानमोघान्स्थिरजंगमानामंतर्बहिर्वा
युरिवैष आत्मा ॥ ३४ ॥ सूत उवाच ॥ परीक्षितैवमादिष्टः स कलिर्जातवेपथुः ॥ तमुद्यतासिमाहेदं दंडपा
णिमिवोद्यतं ॥ ३५ ॥ यत्र क्वचन वत्स्यामि सार्वभौम तवाज्ञया ॥ लक्षये तत्र तत्रापि त्वामात्तेषुशरासनं ॥ ३६ ॥
तन्मे धर्मभृतां श्रेष्ठ स्थानं निर्देष्टुमर्हसि ॥ यत्रैव नियतो वत्स्य आतिष्ठंस्तेऽनुशासनं ॥ ३७ ॥

इज्यंते न तद्वदित्याह ॥ एष स्थावरादीनां आत्मेति तथापि जीववत्परिच्छिन्नत्वं स्यादत आह ॥ अंतर्बहिरिति यथा वायुः प्राण-
रूपेणांतः स्थितोऽपि बहिरप्यपरिच्छिन्न एवं सर्वांतर्यामीश्वरोऽपीति ॥ ३४ ॥ उद्यतासिं उद्यतखड्गं दंडपाणिं यममिवोद्यतं ॥ ३५
यत्र तत्र वत्स्यामि इति यात्वयाज्ञातया यत्र क्वापि वत्स्यामि ॥ किं तत्र तत्रापि आत्तः गृहीत इषुः शरासनं च येन तं त्वामेव लक्ष-
ये ॥ ३६ ॥ यस्मान्नियतः निश्चलो वत्स्यामि ॥ ३७ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी
५३

पानेमद्यादेः सूनाप्राणिवधः द्यूतेअनृतंपानेमदः पूर्वेमदोदयानाशकत्वेनोक्तः॥ अव्रतगर्वेह्यावातपोनाशकत्वेनस्त्रीषु
संगः॥ हिंसाचक्रौर्यंदयानाशकमितिज्ञेयं॥ यद्यपिसर्वेसर्वत्रसंभवंतितथापिप्राधान्येनअनृतादीनांद्यूतादिषुयथासं
ख्यंज्ञेयं॥ द्वादशस्कंधेतुसत्यंदयातपोदानमितिपादाविभोर्नृपेत्यत्रदानशब्देनशौचमेवोक्तं॥ मनःशुद्धिरूपत्वात्ततोअभ
यदानस्यत्रेतायांधर्मपादानांतुर्यांशोह्रीयते॥ शौचैस्त्रधर्मपादैरनृतहिंसासंतोषविग्रहैरित्यत्रवासंतोषशब्देनतत्सहेत
र्गर्वोल्लक्ष्यतेविग्रहशब्देनचतद्धेतुःस्त्रीसंगइत्यविशेषःचतुर्विधस्याप्येकत्रैवावस्थाने॥ ३८॥ देहीतिपुनर्याचमानाय

अभ्यर्थितःतदातस्मैस्थानानिकलयेददौ॥ द्यूतंपानंस्त्रियःसूनायत्राधर्मश्चतुर्विधः॥ ३८॥ पुनश्चयाचमा-
नायजातरूपमदात्प्रभुः॥ ततोऽनृतंमदंकामंरजोवैरंचपंचमं॥ ३९॥ अमूनिपंचस्थानानिह्यधर्मप्रभवःकलिः
औत्तरेयेणदत्तानिन्यवसत्तन्निदेशकृत्॥ ४०॥ अथैतानिनसेवेतबुभूषुःपुरुषःक्वचित्॥ विशेषतोधर्मशीलो
राजालोकपतिर्गुरुः॥ ४१॥ वृषस्यनष्टांस्त्रीन्पादान्तपःशौचंदयामिति॥ प्रतिसंदधआश्वास्यमहींचसमवर्ध-
यत्॥ ४२॥ सएषएतर्ह्यध्यास्तआसनंपार्थिवोचितं॥ पितामहेनोपन्यस्तंराज्ञारण्यंविविक्षता॥ ४३॥ आस्ते
ऽधुनासराजर्षिःकौरवेंद्रश्रियोल्लसन्॥ गजाह्वयेमहाभागःचक्रवर्तीबृहच्छ्रवाः॥ ४४॥ इत्थंभूतानुभावोऽय
मभिमन्युसुतोनृपः॥ यस्यपालयतःक्षौणींयूयंसत्रायदीक्षिताः॥ ४५॥

जातरूपंस्वर्णंददावाननंततःस्वर्णदानादनृतंमदंकाममितिस्त्रीषुसंगंरजइतिरजोमूलांहिंसांएतानिचत्वारिपंचमंवै
रंचाददादिति॥ ३९॥ अमूनिअमीषुस्थानेषुन्यवसदित्यर्थः॥ ४०॥ अथैतानिहेतोर्बुभूषुःउद्भवितुमिच्छुःस्त्रीस्वर्णयोरसेवं
तेनामतत्रापिनासक्तिः॥ ४१॥ एवंकलिंनिगृह्यवृषस्यपादान्प्रतिसंदधेतपआदीनिप्रवर्तितवानित्यर्थः॥ युष्मदीयं
सत्रंप्रवृत्तिरपितत्प्रभावादेवेत्याहत्रिभिः॥ ४२॥ एतर्हिइदानींयुधिष्ठिरेणारण्यंप्रवेष्टुमिच्छताउपन्यस्तंसमर्पितमासन
मध्यास्ते॥ अधुनापालयन्इतिचवर्तमानसामीप्येवर्तमानवन्निर्देशः॥ ४३॥ सत्रायसत्रंकर्तुंदीक्षिताःदीक्षांकृतवंतः ४५

५३

सोऽत्यप्याहारोवा

इति श्रीभावार्थे प्रथमस्कंधे सप्तदशोऽध्यायः ॥१७॥ राज्ञस्त्वष्टादशे तस्य ब्रह्मशापो निरूप्यते ॥ स चानुग्रह एवास्य जातो वैराग्यमावहन् ॥ परीक्षितो निर्याणमन्याश्चर्यं वक्तुं तज्जन्म भावनाय जन्माश्चर्यमनुस्मारयति ॥ यो वा इति विप्लुष्टो निर्दग्धः सन् ॥१॥ ब्रह्मकोपोत्थितात् तक्षकाद्यः प्राणविप्लवः प्राणनाशः तेनोरुभयं तस्मात् संसम्मोह अयं हेतुः यतस्तु भगवत्येवार्पिताशयः इति ॥२॥ किंतु उत्सृज्येति वैयासकेः शुकस्य शिष्यः सन् विज्ञाता अजितस्य हरेः संस्थितिः तत्त्वं येन सः नैतच्चित्रमित्याह ॥३॥ उत्तमश्लोकस्य वार्ता येषु अत एव नित्यं तत्कथामृतं जुषतां संभ्रमो न स्यात् ॥ तस्मिन् राज्ञि सति नतरां तच्चित्रमित्याशयेनाह ॥४॥ तावदि

इति श्रीभागवते प्रथमस्कंधे सप्तदशोऽध्यायः ॥१७॥ सूत उवाच ॥ यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः ॥ अनुग्रहाद्भगवतः कृष्णस्याद्भुतकर्मणः ॥१॥ ब्रह्मकोपोत्थिताद्यस्तु तक्षकात्प्राणविप्लवात् ॥ न संमुमोहोरुभयाद्भगवत्यर्पिताशयः ॥२॥ उत्सृज्य सर्वतः संगं विज्ञाताजितसंस्थितिः ॥ वैयासकेर्जहौ शिष्यो गंगायां स्वं कलेवरं ॥३॥ नोत्तमश्लोकवार्तानां जुषतां तत्कथामृतं ॥ स्यात्संभ्रमोऽन्तकालेपि स्मरतां तत्पदांबुजं ॥४॥ तावत्कलिर्न प्रभवेत्प्रविष्टोपीह सर्वतः ॥ यावदीशो महानुर्व्यामाभिमन्यव एकराट् ॥५॥ यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गां ॥ तदैवेहानुवृत्तोऽसावधर्मप्रभवः कलिः ॥६॥ नानुद्वेष्टि कलिं सम्राट् सारंग इव सारभुक् ॥ कुशलान्याशु सिद्ध्यंति नेतराणि कृतानि यत् ॥७॥ ॥

ति अभिमन्युपुत्र एकराट् चक्रवर्ती ईशः पतिः तावत् ॥ ननु तदा कलेः प्रवेश एवास्तु प्रविष्टोपि न प्रभवेदिति कुतः तत्राह ॥५॥ यस्मिन्नहनि यर्हि यस्मिन्नेव क्षणे गां पृथ्वीमुत्सृष्टवान् ततः प्रविष्टः अधर्मस्य प्रभवो यस्मात् ॥ ननु धर्मे हेतुं क लिं सर्वथा किं न हतवान् ॥६॥ सारंगो भ्रमर इव सारग्राही सारमेवा [illegible] ह ॥ यद्यस्मिन् कलौ कुशलानि पुण्यानि आशु संकल्पमात्रेण फलंति इतराणि पापानि आशु न सिद्ध्यंति यत्नान्निष्कृतान्येव सिद्ध्यंति न तु संकल्पमात्राणीति तस्मात् कलिं न हतवान् उक्तं च कलौ लोकैर्नैव लिप्यत इत्यादि ॥ ननु दोषाधिक्याद्द्वेष एव युक्तः न धीरेषु तस्मात् किं चिन्त्यकरत्वादित्याह ॥

किन्तु

श्री
भाष
टी
पध
शान्तुतोः सर्गः ४

किन्तु तेन भवेद्वालेषु अधीरेषु प्रमत्तोऽनवहितः स्वयोद्दकस्य वर्तते ॥ कलिनाकीदृशेन स्मरेण ॥ ८ ॥ पारिदितमाख्यानमस्य
च्छत्तस्य वंतो यूयं किं बहुना ॥ नरैरेतावदेव कर्तव्यमितिसर्वे शास्त्रसारं कथयतियायाऽऽदूति ॥ ९ ॥ कथनीयान्स्वरू[illegible] णिकर्मा-
णिगस्यतस्य गुणकर्मविषयाः कुम्भूभिः सद्भावमिच्छद्भिः पुनर्विस्तरेण कथनार्थं स्तुतो किं स्तुतस्य च संगमर्मभिनंदतिस्म
वेतिविभिः ॥ १० ॥ अनंतानन्तसंसारानजीवस्त्रयंतसंयोगोऽहितीयाविशुद्धं यशः कीर्तयसित चासाकं मर्त्यानामस्तं तमरणं नि-
वर्तकौ किंच ॥ ११ ॥ अस्मिन्कर्मणि सत्रे अनाप्रवासे अविश्वसनीये वैगुण्यवर्द्धिल्येन फलनिश्चयाभावात् ॥ श्रमेण श्रम्रोविवर्ण

किन्तु वालेषु स्मरेण कलिनाधीरभीरुणा ॥ अप्रमत्तः श्रमतेष्वप्येऽहूकोऽन्नुष्टवर्तते ॥ ८ ॥ उपवर्णितमेतद्धः श्रुण्वं
पारिदितं मया ॥ वासुदेवकथोपेतमाख्यानं यदशृच्छत ॥ ९ ॥ याथाः कथ्या भगवतं कथनीयोरुकर्मणः
गुणकर्माश्रयाः पुंभिः संसेव्यास्ताबुभूषुभिः ॥ १० ॥ अथयः ॥ स्तनजीवसमौ[वधु] सौम्य प्राश्वनीर्विप्रादेयशः
यस्तत्पेशसम्ब्लिष्टसस्य मर्त्यानामस्मृतेहिनः ॥ ११ ॥ कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनो भवान् ॥ आपाययति
गोविंदपादपद्मासवं मधु ॥ १२ ॥ तुलयाम लवेनापि न स्वर्गं नापुनर्भवं ॥ भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ॥ १३ ॥ को नाम तृप्येद्रसवित्कथायां महत्तमैकांतपरायणस्य ॥ नांतं गुणानामगुणस्य जग्मुर्योगीश्वरायं भवपाद्ममुख्याः ॥ १४ ॥ ॥

लीम

आत्माशरीरेयेषां तान् ॥ अस्मान्कर्मणिषष्ठी ॥ आसवं मकरंदमथ मधुरं ॥ १२ ॥ भगवत्संगिनः विस्नभक्ताः तेषां सं-
गस्य विस्नभक्तसंगस्य योऽवस्त्रात्यल्पः कालः तेनापि स्वर्गं न तुलयाम ॥ सुमेन पश्यामो मो दो णापि समेन पश्यामः नं
चापवर्गं संभावनायां लोट् मर्त्यानां तु तच्छ्या आशिषो राज्यायान तु लांयांति ॥ किमुत वक्तव्यं ॥ एवं तत्संगमभिनंद्य-
श्रवणोत्सुकमाविष्कुर्वंति को नामेति ॥ १३ ॥ रसवित्रससत्तः कोम हत्तमानामेकांतेन परमं धनमाश्रयोयस्तस्यकथायाः
मगुणस्य प्राकृतगुणरहितस्य कल्याणगुणानामंतं ये योगीश्वराः ते पि न जग्मुः एतावंत इति परिगणयांचक्रुः भवः शि-
व[illegible]पाद्मः ब्रह्मा च मुख्यो येषां ते ॥ १४ ॥ ॥

५४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नन्वस्माकं मध्ये भगवान्प्रधानं सेव्यो यस्य स भवान्नः शुश्रूषतां हरेश्चरितं विस्तारयतु तत्र शुकपरीक्षित्संवादेन कथ्य
येत्याह ॥ स वा इति द्वाभ्यां ॥ १५ ॥ वैयासकिना श्रीशुकेन शब्दितेन कथितेन ज्ञानेन ज्ञानसाधनेनापवर्ग इत्याख्याय
स्य तं तत्र खगेन्द्रध्वजस्य हरेः पादमूलं भेजे ॥ १६ ॥ तत्र असंवृतार्थं यथा तथा आख्याहि तदेव निर्दिशति परीक्षितं कथि
आख्यानं ५ तं पारीक्षितं श्रीभागवतं पुराणं परं पुण्यं सत्त्वशोधकं ॥ अत्यद्भुते योगे निष्ठा यस्य अनन्तस्याचरितैरुपपन्नं युक्तं अत
एव भागवतानां अभिरामं प्रियं एते विशेषणे ः कर्मज्ञानभक्तियोगप्रकाशकत्वमुक्तं श्रीभागवतव्याख्यानेन लब्धप्रसं
गमहत्तामादरयात्रमात्मानं श्लाघते द्वाभ्यां ॥ १७ ॥ अहो आश्चर्ये हेति हर्षे वयमिति निकृष्टजातयः प्रतिलोमजाता अपि

तन्नो भवान्वै भगवत्प्रधानो महत्तमैकान्तपरायणस्य ॥ हरेरुदारं चरितं विशुद्धं शुश्रूषतां नो वितनोतु
विद्वन् ॥ १५ ॥ स वै महाभागवतः परीक्षिद्येनापवर्गाख्यमदभ्रबुद्धिः ॥ ज्ञानेन वैयासकिशब्दितेन भेजे खगें
द्रध्वजपादमूलं ॥ १६ ॥ तन्नः परं पुण्यमसंवृतार्थमाख्यानमत्यद्भुतयोगनिष्ठं ॥ आख्याह्यनन्ताचरितोप
पन्नं पारीक्षितं भागवताभिरामं ॥ १७ ॥ सूत उवाच ॥ अहो वयं जन्मभृतोद्य हास्म वृद्धानुवृत्त्यापि विलो
मजाताः ॥ दौष्कुल्यमाधिं विधुनोति शीघ्रं महत्तमानामभिधानयोगः ॥ १८ ॥ कुतः पुनर्गृणतो ना
म तस्य महत्तमैकान्तपरायणस्य ॥ योऽनन्तशक्तिर्भगवाननन्तो महद्गुणत्वाद्यमनन्तमाहुः ॥ १९ ॥ ॥

महत् ३

अद्य जन्मभृतः सफलजन्मानो अस्म जाताः वृद्धानामनुवृत्त्या आदरेण ज्ञानवृद्धः शुकः तस्य सेवयेति वा दौष्कुल
त्वं तन्निमित्ततो आधिं च मनःपीडां महत्तमानामभिधानयोगः लौकिकोपि संभाषणलक्षणः संबंधो विधुनोति एवं तर्हि यत्
ति एव कुतः पुनः किं पुनर्वक्तव्यं तस्यानन्तस्य नाम गृणतः पुंसो महत्तमानामभिधानयोगो दौष्कुल्यमानसीव्यथां विधु
नोतीति यद्वा नामगृणतः न पुनर्दौष्कुल्यमिति यद्वा गृणतः पुंसः तस्य नाम दौष्कुल्यं विधुनोति इति किं वक्तव्य
मिति कैमुत्यमेवाह ॥ अनन्ताः शक्तयो यस्य स्वतोप्यनन्तः किं च महान्तो गुणा यस्य स महद्गुणः तस्य भावः तस्माद्य
गुणतोप्यनन्तमाहुः ॥ एतत्प्रपंचयति त्रिभिः ॥ एतावतेति ॥ ॥ १९ रामाय नमः ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तस्य यदसाम्यमनतिप्रायनं च गुणैस्तत्साम्यं तदाधिक्यं वा न्यस्य नास्तीत्यस्यार्थस्य ज्ञानमेतावता मम चिंतेन अल्पप्रयोजनेन क २०
श्चिदिहलब्धो वर्कं प्राप्नोतीति तदेवाह इतरान् ब्रह्मादीन् प्रार्थयमानान् हित्वा विभूतिः श्रीः न रभीप्सोरपि यस्या अंघ्रिरेणुं सेवते इति
प्रथेत्यर्थात् तेषां पस्यपादनाबादवसृष्टेनिः सृतमपि विरिंचिनाउपहृतं समर्पितं अर्घोदकं ईशासहितं जगत्पुनाति विरिं
चेनोपहृतं सेशं च तयोरुपासकत्वमुक्तं तस्मान्मुकुंदाद्यतिरिक्तः को नाम भगवत्पदस्यार्थः सर्वेश्वर इत्यर्थः ॥ २१
यत्र यस्मिन् दृढधीरा संतः कृत्तिंभूतेन्द्रं परमकाष्ठापत्रं तदाह ॥ यस्मिन्नहिंसा उपशमश्च स्वाभाविकः धर्मः एवं स्वर
भागमभिनयपारीक्षितो याख्यानं तत्त्वमाह ॥ अहंहीति ॥ २२ ॥ हे यमणः हे सूर्याः त्रयीमूर्तयः अत्र यावानात्मावर

एतावतालं ननु सुविंतेन गुणैरसाम्यानतिशायनस्य ॥ हित्वेतरान्प्रार्थयतो विभूतिर्यस्यांघ्रिरेणुं जुषतेनभ
भीप्सोः ॥ २० ॥ अथापि यत्पादनखावसृष्टं जगद्विरिंचोपहृतार्हणांभः ॥ सेशं पुनात्यन्यतमो मुकुंदात्को
नाम लोके भगवत्पदार्थः ॥ २१ ॥ यत्रानुरक्ताः सहसैव धीरा व्यपोह्य देहादिषु संगमूढं ॥ व्रजंति तत्पारमह
स्यमंत्यं यस्मिन्नहिंसोपशमः स्वधर्मः ॥ २२ ॥ अहं हि पृष्टोर्यमणो भवद्भिराचक्ष आत्मावगमोत्र यावान् नभः
पतंत्यात्मसमं पतत्रिणः तथा समं विष्णुगतिं विपश्चितः ॥ २३ ॥ एकदा धनुरुद्यम्य विचरन्मृगयां वने ॥ मृगाननु च २
गतः श्रांतः क्षुधितः तृषितो भृशं ॥ २४ ॥ जलाशयमचक्षाणः प्रविवेश तमाश्रमम् ॥ ददर्श मुनिमासीनं प्रशा
तंमीलितलोचनम् ॥ २५ ॥ विप्रकीर्णजटाछन्नं रौरवेणाजिनेन च ॥ विशुष्यत्तालुरुदकं तथाभूतमयाचत २६ २
प्रतिहृतेंद्रियप्राणमनोबुद्धिमुपारतम् ॥ स्थानत्रयात्परं प्राप्तं ब्रह्मभूतमविक्रियम् ॥ २

रामः ॥ ममत्वानंतावदाचक्षे प्रवक्ष्यामि ॥ तथाहि ॥ पक्षिणो नभआत्मसमं स्वपक्षबलानुरूपमेवोत्पतंति न कृत्स्नं तथा
विपश्चितोपि विष्णोर्गतिं लीलां समं स्वमत्यनुरूपमेव वदंतीत्यर्थः ॥ २३ ॥ अचक्षाणः अपश्यन् तं प्रसिद्धमाश्रमं तत्
स्मिन् मुनिं शमीकं ॥ २४ ॥ प्रतिरुद्धाः प्रत्याहृता इंद्रियादयो येन अत एव उपारतं स्थानत्रयात् जाग्रदादिलक्षणात्
परं तुरीयं पदं प्राप्तं अत एव ब्रह्मभूतत्वादविक्रियं ॥ २५ ॥ विप्रकीर्णाभिर्जटाभिराछन्नं रुरुसंज्ञगविशेषस्तस्य चर्मरौ
रवं चक्षुन्नं विशोषेण शुष्यत्तालु यस्य सः तथाभूतं मुनिम् ॥ २६ ॥ ॥ रामाय नमः ॥ ॥ राम ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नलब्धं रणं रणासनं भूमिरूपवेशास्थानं च येन सः न संप्राप्तार्ध्यासूनृतं प्रियवचनं च येन सः ॥ २७ ॥ गतास्तंभस्तं ध
नुष्कोट्या वा पाग्रेण सर्पं निधाने राजतोभिप्रायमाह ॥ ३० ॥ एवं किं प्रत्यानत सर्वेंद्रियः सन्मीलितलोचनः स्थि
तः यद्वाल्प त्रबंधु भिरागतैः किं नः स्यादितीव वत्त्या मृषा समाधिरिति निजितास्मयेत्यर्थः ॥ ३१ ॥ तस्य पुत्रः शृंगी
नाम ब्रह्मवर्चस्वी ॥ ३४ ॥ तत्रार्भकमध्ये पालानां द्वारस्थानां पीनानां पुष्टानामधर्ममेवाभिनिर्दिशाति ॥ स्वामिनि दासानां यद

अलब्धश्चरणभूम्यादिरसंप्राप्तार्ध्यसूनृतः ॥ अवज्ञातमिवात्मानं मन्यमानश्चुकोप ह ॥ २९ ॥ अभूत
पूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः ॥ ब्राह्मणं प्रत्यभूद्ब्रह्मन्मत्सरो मन्युरेव च ॥ ३० ॥ स तु ब्रह्मऋषेरंसे
गतासुमुरगं रुषा ॥ विनिर्गच्छन्धनुष्कोट्या निधाय पुरमागमत ॥ ३१ ॥ एष किं निभृताशेषकरणो
मीलितेक्षणः ॥ मिथ्यासमाधिराहोस्वित्किं नः स्यात्क्षत्रबंधुभिः ॥ ३२ ॥ तस्य पुत्रोऽतितेजस्वी विहरन्
बालकोऽर्भकैः ॥ राज्ञाघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत ॥ ३३ ॥ अहो अधर्मः पालानां पीव्नां बलिभु
जामिव ॥ स्वामिन्यघं यद्दासानां द्वारपानां शुनामिव ॥ ३४ ॥ ब्राह्मणैः क्षत्रबंधुर्हि द्वारपालो निरूपि
तः स कथं तद्गृहे द्वाःस्थः सभांडं भोक्तुमर्हति ॥ ३५ ॥ कृष्णे गते भगवति शास्तर्युत्पथगामिनां तद्भि
न्नसेतूनद्याहं शास्मि पश्यत मे बलं ॥ ३६ ॥ इत्युक्त्वा रोषताम्राक्षो वयस्यानृषिबालकान् ॥ कौशिक्या
प उपस्पृश्य वाग्वज्रं विससर्ज ह ॥ ३७ ॥ इति लंघितमर्यादं तक्षकः सप्तमेऽहनि ॥ धक्ष्यति स्म कुलांगा
रं चोदितो मे ततद्रुहं ॥ ३८ ॥

शुनां पापाच्च रणं बलिभुजां काकानामिव शुनां इव चेति ॥ दासत्वं दर्शयति ब्राह्मण इति स भांडं भांडे स्थितं तत्र तद
न्नं तं संस्थं दंड्यामि शास्मि दंडयामि ॥ ३६ ॥ इति वयस्यान्नुक्त्वा रोषेण ताम्रे लोहिते ईक्षणे यस्य कौशिकी नदीतस्याप उपः स्पृश्य
वाग्वज्रं प्राणयं ॥ ३७ ॥ इत्येव सर्पनिक्षेपेन धक्ष्यति भवति यिष्यति पापं गंतरे धक्ष्यति भस्मी करिष्यति स्मेति यादृ एवं रणे
उल्लसपांगार कुलं मेमयानं तेनिक्षस्वमार्गम् ॥ ३८ ॥ ॥ राम ॥ ॥

श्री· भा·ग· प्र·टी· ५८

गलेसर्पः कलेवरं यस्येति अलुक्समासः मुक्तकंठं उच्चैरित्यर्थः ३९ आंगिरसः गोत्रोद्भवः केनापकारः कृतः सर्वं विसृज्य अ
अनभिनंदनवाक्यमहो इति वितर्कणेनेत्यामहत्पापं कृतं द्रोहे ऽपराधे दमः दंडः ४१ परीक्षिद्विष्णुरात इत्याख्याति यस्यतं परा
ख्यं नरदेवं नृभिः संमातुं समं द्रष्टुं ४२ अलक्ष्यमाणे अदृश्यमाने अविवरूथवत् मेषसंघवत् चौरप्रचुरो ऽयं लोको वि
नंक्ष्यति कस्मिन्नेव रथांगपाणाविव ४३ नष्टो नाथो यस्य लोकस्य तस्य वसोः धनस्य विलुंपकात् चौरादेर्हेतोर्यत्पा
पं भविष्यति तदस्मन्निमित्तत्वादस्माकं उपैष्यति अनन्वयं संबंधशून्यमेव तदेव पापं दर्शयति परस्परं इति पापं तिः
 अपहर्तुः २

ततो ऽभ्येत्याश्रमं बालो गले सर्पकलेवरं पितरं वीक्ष्य दुःखार्तो मुक्तकंठो रुरोद ह ३९ स वा आंगिरसो ब्र
ह्मन् श्रुत्वा सुतविलापनं उन्मील्य शनकैर्नेत्रे दृष्ट्वा वांसे मृतोरगं ३० विसृज्य पुत्रं पप्रच्छ वत्स कस्माद्धि
रोदिषि केन वा ते ऽपकृतमित्युक्तः स न्यवेदयत् ४० निशम्य शप्तमतदर्हं नरेंद्रं स ब्राह्मणो नात्मजमभ्य
नंदत् अहो बतांहो महदद्य ते कृतमल्पीयसि द्रोह उरुर्दमो धृतः ४१ न वै नृभिर्नरदेवं पराख्यं संमा
तुमर्हस्यविपक्वबुद्धे यत्तेजसा दुर्विषहेण गुप्ता विंदंति भद्राण्यकुतोभयाः प्रजाः ४२ अलक्ष्यमाणे नर
देवनाम्नि रथांगपाणावयमंग लोकः तदा हि चौरप्रचुरो विनंक्ष्यत्यरक्ष्यमाणो ऽविवरूथवत्क्षणात्
तदद्य नः पापमुपैत्यनन्वयं यन्नष्टनाथस्य वसोर्विलुंपकात् परस्परं घ्नंति शपंति वृंजते पशून् स्त्रियो ऽर्थान्
पुरुदस्यवो जनाः ४४ तदार्यधर्मः प्रविलीयते नृणां वर्णाश्रमाचारयुतस्त्रयीमयः ततो ऽर्थकामाभि
निवेशितात्मनां शुनां कपीनामिव वर्णसंकरः ४४ धर्मपालो नरपतिः स तु सम्राड् बृहच्छ्रवाः सा
क्षान्महाभागवतो राजर्षिर्हयमेधयाट् ४५ क्षुत्तृट्श्रमयुतो दीनो नैवास्मच्छापमर्हति ४६

पुरुदस्यवः जनाः ते अपहरंतीत्यर्थः पुरुदस्यवः चौरबहुलाः ४३ आर्यधर्मः सदाचारः अर्थकामयोरेवाभिनिवेशितात्मनां शुनां कपीनामिव अर्थ
कामयोरेवाभिनिवेशितात्मनां एवं राजमात्रस्य शापानर्हत्वमुक्त्वा प्रस्तुते विशेषमाह धर्मपाल इति सार्धेन ४४ हय
मेधयाट् अश्वमेधयाजी ४५ अस्य महापापस्यान्यप्रायश्चित्तमदृष्ट्वा पापमावेदयन् भगवंतं प्रार्थयते अपापेष्विति

राम· ५८
५८

दुर्जा चैति शापे यद्यप्यत्र ब्रह्म निष्कृतिर्भवेत्तथापि न संभवति ॥ तदेव महाभागवतत्वादित्याह ॥ ४७ ॥ तिरस्कृता निंदिताः
विप्रलब्धा वंचिताः शप्ताः क्षिप्ता अवज्ञाताः हता ताडिताः च अस्य तिरस्कर्त्रादिकर्तुः न तत्प्रतीकारं कुर्वंति तद्भक्ता वि
भुभक्ताः प्रभवः समर्था अपि ॥ ४८ ॥ विप्रकृतस्यापकृतः ॥ अघमपराधं नाचिंतयत् युक्तं चैतदित्याह प्रायश इ
ति ॥ ४९ ॥ द्वंद्वेषु सुखदुःखादिषु अगुणाश्रयः आत्मनात्मा यतः ॥ ५० ॥ इति श्रीभावार्थदीपिकायां प्रथमस्कं
धेऽष्टादशोऽध्यायः ॥ १८ ॥ प्रायोपविष्टे गंगायां राज्ञि योगिजनाहृते ॥ शुकस्यागमनं प्रोक्तं तत्र चैकोनविंशके
पुनिस्त्वथेत्यथ प्रणिधाय स्वकृतं तत् कर्म गर्ह्यं निंद्यं विचिंतयन् सुदुर्मना जातः ॥ चिंतामाह सार्धद्वाभ्यां अहो इति

अपापेषु स्वभृत्येषु बालेनापक्वबुद्धिना ॥ पापं कृतं तद्भगवान्सर्वात्मा क्षंतुमर्हति ॥ ४७ ॥ तिरस्कृता
विप्रलब्धाः शप्ताः क्षिप्ता हता अपि नास्य तत्प्रतिकुर्वंति तद्भक्ताः प्रभवोऽपि हि ॥ ४८ ॥ इति पुत्रकृता
घेन सोऽनुतप्तो महामुनिः स्वयं विप्रकृतो राज्ञा नैवाघं तदचिंतयत् ॥ ४९ ॥ प्रायशः साधवो लोके
परैर्द्वंद्वेषु योजिताः ॥ न व्यथंति न हृष्यंति यत आत्मागुणाश्रयः ॥ ५० ॥ इति श्रीभागवते प्रथमस्कं
धेऽष्टादशोऽध्यायः ॥ १८ ॥ सूत उवाच ॥ महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिंतयन्नात्मकृतं सुदुर्मनाः
अहो मया नीचमनार्यवत्कृतं निरागसि ब्रह्मणि गूढतेजसि ॥ १ ॥ ध्रुवं ततो मे कृतदेवहेलनाद्दुर
त्ययं व्यसनं नातिदीर्घात् तदस्तु कामं ह्यघनिष्कृताय मे यथा न कुर्यां पुनरेवमद्धा ॥ २ ॥ अद्यैव रा
ज्यं बलमृद्धकोशं प्रकोपितब्रह्मकुलानलो मे ॥ दहत्वभद्रस्य पुनर्न मेऽभूत्पापीयसी धीर्द्विजदेवगोभ्यः ॥ ३ ॥

आत्मनोऽघं नीचं पापं गूढं तेजो यस्मिंस्तस्मिन् ... कृतेन यद्देवहेलनमीश्वरावज्ञा पापमित्यर्थः ॥ तस्मान्मे व्यसनं भविष्यति
न तु नातिदीर्घकालात् अचिरादेवास्तु तत्राप्यहं सोत्साहः ॥ न तु पुत्रादिद्वारेणेति ॥ प्रार्थने कामं असंकोचतः यसी धीः
एवं प्रार्थनायाः प्रयोजनं अघस्य निष्कृताय शुद्धये यथा पापं पुनरेवं न कुर्यामिति च एवं सा दान्तस्यैव व्यसनं प्रा
र्थितं ननु आत्मापराधे किं विनाश्येतेति ॥ २ ॥ अद्यैव राज्यादि दहतु प्रकोपितब्रह्मकुलमेवानलः पुनः द्विजादीन् पापी
यसी धीर्मे माभूत् अपवेरित्यर्थः ॥ ३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इत्थं चिंतयन्नस्मा राजा मुनेः सुतेनोक्तः सप्तमेह्नि तक्षकात् मृत्युर्यथा भवति तथाशृणोत् ॥ शमीकप्रेषिताच्छि
ष्यात् श्रुत्वा च तं तक्षकस्य विषं साधु मेने ॥ यतो विषयेषु प्रसक्तस्य विरक्तिकारणं ॥ अथो अनेन उभौ लोकौ पुर
स्तात् हेयतया विचारितौ विहाय श्रीकृष्णांघ्रिसेवामेवाधिमन्यमानः सर्वपुरुषार्थाधिकां जानन्
प्रायमनशनं तस्मिन्नित्यर्थः ॥ तत्र कालेनोपाविशदिति यावत् ॥ यद्वा प्रायं प्रकृष्टं यत्र अनशनं यथा भवति त
था मरणेन धामिति ॥ विशेषणस्य फलमाह ॥ ५ ॥ या गंगा लसंती श्रीर्यस्याः तुलस्याः ॥ तया विमिश्रा ये कृष्णां

:स्कं १ स चिंतयन्नित्थमथाशृणोद्यथा मुनेः सुतोक्तो निरृतिस्तक्षकाख्यः ॥ स साधु मेने न चिरेण तक्षकानलं
प्रसक्तस्य विरक्तिकारणं ॥ ४ ॥ अथो विहायेममं च लोकं विमर्शितौ हेयतया पुरस्तात् ॥ कृष्णांघ्रि
सेवामधिमन्यमान उपाविशत्प्रायममर्त्यनद्यां ॥ ५ ॥ या वै लसच्छ्रीतुलसीविमिश्रकृष्णांघ्रिरेणव
भ्यधिकांबुनेत्री ॥ पुनाति लोकानुभयत्र सेशान्कस्तां न सेवेत मरिष्यमाणः ॥ ६ ॥ इति व्यवच्छिद्य स
पांडवेयः प्रायोपवेशं प्रति विष्णुपद्यां ॥ दधौ मुकुंदांघ्रिमनन्यभावो मुनिव्रतो मुक्तसमस्तसंगः ॥ ७
तत्रोपजग्मुर्भुवनं पुनाना महानुभावा मुनयः सशिष्याः ॥ प्रायेण तीर्थाभिगमापदेशैः स्वयं हि
तीर्थानि पुनंति संतः ॥ ८ ॥ अत्रिर्वसिष्ठश्च्यवनः शरद्वानरिष्टनेमिर्भृगुरंगिराश्च ॥ पराशरो गाधि
धम२ सुतोथ राम उतथ्य इंद्रप्रमदेध्मवाहो ॥ ९ ॥ मेधातिथिर्देवल आर्ष्टिषेणो भारद्वाजो गौतमः पिप्प
कवष:१ लादः ॥ मैत्रेय और्वः कवषः कुंभयोनिर्द्वैपायनो भगवान्नारदश्च ॥ १० ॥

घ्रिरेणवः तैरभ्यधिकं सर्वोत्कृष्टं यदंबु तस्य नेत्री नयंती ॥ उभयत्र बहिरंतश्च सेशान् ॥ लोकपालैः सहिता
न्लोकान् पुनाति मरिष्यमाणः ॥ आसन्नमरणः मरणे सम्यग्नियतकालत्वात् ॥ सर्वोपि तत्र आस्तां कोन सेवे
त ॥ ६ ॥ इत्येवं विष्णुपद्यां गंगायां प्रायोपवेशं प्रति व्यवच्छिद्य निश्चित्य पांडवेय इति तत्कुलोचितं दर्शयति ना
स२ न्यस्मिन्भावो यस्य सः ॥ मुनेः मुनिव्रतं उपशांतः ॥ तत्र मुनिः मुक्तः समस्तः संगो येन सः ॥ ७ ॥ तत्र गंगातीरे पुनाना इति
न यत्र पापानाः ॥ न तु तीर्थस्नानार्थं कृतार्थत्वात् ॥ तत्र नादृशानामपि तीर्थेष्वादरः प्रयत्ने ॥ तथाह प्रायेणेति तीर्थं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अस्मात्प्रसादतः कोऽपि चित्तविशेषेण प्रबुद्धिः। दिष्टा नानायानि प्रार्थयाणि ऋषिगोत्राणि तेषु प्रवरान् श्रेष्ठान् शिर
सा प्रणम्य स्वहस्तौ ववंदे ॥ १ ॥ चिंतापरो नामर्षेः पुनः कृतप्रणामः विविक्ते प्रदेशे तोयस्याभिरक्षीतो संस्तोषितो पाणीयेन
प्राप्तोपवेशनादि स्वचिकीर्षितं प्रकट्य कुर्वे ते निचिंतयामास ॥ अस्तु मोदनेनानुग्रहमालभ्यात्मानं प्रार्थयेन ॥
अहो इति अस्य पालनमध्ये महद्भ्रमेरनुग्रहणीय प्रीतेन हृयेषां पतद्धराताम निरुजेभमित्याह ब्राह्मणेनापाद
शौचात् ॥ अत्तान्नोदकात् ॥ इ राडच्छिश्चविरामूत्रपादाभ्यां सिसृज्य हजे दिति स्वने ॥ इत्येहि नन्वैर्विसृज्यते ततो
पिदृषादे शविसृष्टे ति प्रतताप स्यान्नमयोध्यमिस्यथः गार्हस्थ्यकर्मस्यस्यात्मानं उद्दिश्य केऽप्रास्तां भवनानाव

अन्येचदेवर्षिब्रह्मर्षिवर्यराजर्षिवर्याः प्रकृत्यादयश्च ॥ नानार्थेयप्रवरान्समेतानभ्यर्च्य राजा शिरसा
ववंदे ॥ १ ॥ तत्त्वोपविष्टेषु च्युतेषु भूयः कृतप्रणामः स्वचिकीर्षितं यत ॥ चिंतापयामास विविक्तचेता
उपस्थितेष्वभिरक्षीतपाणिः ॥ २ ॥ राजोवाच ॥ अहो वयं यत्पतन्मानपाणि महद्भ्रमाज्ञ ग्रहणीय
प्रीताः राज्ञो कुले ब्राह्मणपादशौचादाराद्धि स्पृष्टं च नताहर्यक में ततः ॥ ३ ॥ तस्येव मेधस्य परावशेषा
व्यासकृ चित्रस्य सदहेव भीतन्नां ॥ निर्वेदसत्तोहितशापहृयोयच प्रसक्तो भयमाश्रयते ॥ ४ ॥ तं मे सो
नविस्तुगाथ्याः ॥ ५ ॥ पुनश्च भूयाद्भगवत्प्रनेनेरनिः प्रसंगश्च तदाश्रयेषु महत्स्वयाया प्रय या
मिस्तु हि मे यस्तु सर्वत्र नमो द्विजेभ्यः ॥ ६ ॥

इत्युपदेशो ब्रह्मशापोऽपि भगवत्प्रसादादेव जातः इत्याह ॥ ७ ॥ तस्य गार्हस्थ्यकर्मण एव अनयवाय सपायात्मनोयद
हेतु प्रासत्कचित्तस्य मेऽमलत्र शाश्रयेष्वे भ्राश्रयेत्र निपातः पत्तावत्राणमी शापवह्नितशापतयो बभूव यश्चय
स्मिन् शोपेसति सदहेतु प्रसक्ते भयं यथत्रेनिर्विस्तोभवतियतोनिर्वेदमूलः वैराग्यमूलप्राप्तिकारणं यस्मिन् स्वस्व
देवताप्रसादात् ॥ तस्य वह्नितसत्तानत्र दर्थाद्विजशापेकादितवानित्यर्थः ॥ नान्याश्रयेनेद्वाभ्यां ॥ ८ ॥ तं मा
सत्राश्रयोपेवांतेषु प्रसक्तहुः संगो भूयात् ॥ तस्यांतस्यांस्तुषोजन्मनि ॥ ९ ॥ ॥ राम ॥

अनंतर

जातं तु

श्री॰ भा॰ प्र॰ टी॰ ५८

अध्यवसायो निश्चयः तेन युक्तः प्राचीनमूलेषु कुशेषु धीरः ॥ आस्ते समुद्रपत्न्या गंगायाः ॥१६॥ मुदा
अकिरन् देवसंघैर्वादितानेदुः ॥१७॥ प्रजानुग्रहे शीलं सारो बलं च येषां उत्तमश्लोकगुणैरनुरूपं सदृशमिव ॥१८॥
भवत्सु यादवेषु ये यूयं तदनुव्रतितिष्ठथ इत्यभिप्रायेणापरस्मैवेमं त्रयं ते सर्वे इति ॥ परं श्रेष्ठं लोकं तत्र हेतुः विरजस्कं
निर्मायं विशुद्धं विशोकं च यास्यतीति कृतः तत्राह अयमिति ॥२१॥ आश्रुत्य आकर्ण्य समं पक्षपातशून्यं मधु

इति स्म राजाध्यवसाययुक्तः प्राचीनमूलेषु कुशेषु धीरः ॥ उदङ्मुखो दक्षिणकूल आस्ते समुद्रपत्न्याः
स्वसुतन्यस्तभारः ॥१७॥ एवं च तस्मिन्नरदेवदेवे प्रायोपविष्टे दिवि देवसंघाः ॥ प्रशस्य भूमौ व्यकिरन्
प्रसूनैर्मुदा मुहुर्दुन्दुभयश्च नेदुः ॥१८॥ महर्षयो वै समुपागता ये प्रशस्य साध्वित्यनुमोदमानाः ऊ
चुः प्रजानुग्रहशीलसारा यदुत्तमश्लोकगुणाभिरूपं ॥१९॥ न वा इदं राजर्षिवर्य चित्रं भवत्सु कृष्णं स
मनुव्रतेषु ॥ येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः ॥२०॥ सर्वे वयं तावदिहास्म
हेऽथ कलेवरं यावदसौ विहाय ॥ लोकं परं विरजस्कं विशोकं यास्यत्ययं भागवतप्रधानः ॥२१॥ आश्रु
त्य तदृषिगणवचः परीक्षित्समं मधुच्युद्गुरु चाव्यलीकं ॥ आभाषतैतानभिनंद्य युक्तान् शुश्रूषमाणश्च
रितानि विष्णोः ॥२२॥ समागताः सर्वत एव सर्वे वेदा यथा मूर्तिधरास्त्रिपृष्ठे नेहाथ वामुत्र च क
श्चनार्थ ऋते परानुग्रहमात्मशीलं ॥२३॥ ततश्च वः पृच्छ्यमिमं विपृच्छे विश्रभ्य विप्रा इति कृत्यता
यां ॥ सर्वात्मना म्रियमाणैश्च कृत्यं शुद्धं च तत्रामृशताभियुक्ताः ॥२४ ॥

च्युत् ॥ अस्तनस्राविगुरु गंभीरार्थं अव्यलीकं सत्यं च ॥२२॥ यथा एते लोकानामुपरि त्रिपृष्ठे सत्यलोके वेदा यथा
मूर्तिधरा भवंति तद्वत्यूयं ॥ तानानतिशयमुक्तात्मकं पालनामाह ॥ नेहेति अमुत्र प्रयोजनं च शरणं ग्रहं विना ना
न्यत् हि सम्यवार्थः स्यात्स्वात्मशीलं स्वभावं ॥२३॥ पृच्छ्यं प्रष्टव्यं विश्रभ्य विश्वासं कृत्वा एवं कर्तव्यमित्यस्य
भावः ॥ इति कृत्यतायामस्मिन्विषये सर्वात्मना सर्वावस्थासु कृत्यं विशेषतस्तु म्रियमाणैस्तत्र शुद्धं पाप
संपर्करहितं आमृशत विचारयत ॥२४ ॥ यत् ॥ ॥

अध्याय ऊचुः ४

स्व

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तद्वत्तेषु पात्रयोग्यतयो दानादिभिर्विवदमानेषु सत्स्व यदृच्छया गां पर्यटन् व्यासपुत्रः तत्रागमत्तत्र प्राप्तः नलक्ष्य
माश्रमादि चिह्नं लिंगं यस्य स अवधूतयाजनैः सक्तः प्रवयसे नायस्तस्यैव वेशो यस्य तमित्यादिना प्रत्युत्थित इति तृ
तीयश्लोकेनान्वयः २४ द्विगुणान्यष्टौ वर्षाणि यस्य सुकुमारौ पादौ ऊरू बाहू अंसौ कपोले गात्रं च यस्य चारूणी
आयते अक्षिणी यस्मिन् उन्नता नासा यस्मिन् तुल्ये च रूपादिवैषम्यविनाद्भूते कर्णौ यस्मिन् शोभने भ्रुवौ यस्मि
न् एवंभूतमाननं यस्य कंबुवद्रेखात्रयांकितः सुष्ठुजातः कंठो यस्य ॥२५॥ कंठस्याधोभागे स्थिते अस्थिनी जत्रुणी
मांसेन निगूढे जत्रुणी यस्य तं तुंगमुन्नतं पृथु विस्तीर्णं वक्षो यस्य आवर्तवन्नाभिर्यस्य वलिभिस्तिर्यक् निम्नरेखाभिः

८२ तत्राभवद्भगवान्व्यासपुत्रो यदृच्छया गामटमानो नपेक्षः ॥ अलक्ष्यलिंगो निजलाभतुष्टो वृतश्च बाले
रवधूतवेषः ॥२५॥ तं द्व्यष्टवर्षं सुकुमारपादकरोरुबाह्वंसकपोलगात्रं ॥ चार्वायताक्षोन्नसतुल्यक
र्णसुभ्र्वाननं कंबुसुजातकंठं ॥२६॥ निगूढजत्रुं पृथुतुंगवक्षसमावर्तनाभिं वलिवल्गूदरं च ॥ दिगंब
रं वक्त्रविकीर्णकेशं प्रलंबबाहुं स्वमरोत्तमाभं ॥२७॥ श्यामं सदापीव्यवयोंगलक्ष्म्या स्त्रीणां मनोज्ञं
रुचिरस्मितेन ॥ प्रत्युत्थितास्ते मुनयः स्वासनेभ्यस्तल्लक्षणज्ञा अपि गूढवर्चसं ॥२८॥ स विष्णुरातोतिथय आग
ताय तस्मै सपर्यां शिरसाजहार ॥ ततो निवृत्ता ह्यबुधाः स्त्रियोर्भका महासने सोपविवेश पूजितः २९
स संवृतस्तत्र महान्महीयसां ब्रह्मर्षिराजर्षिदेवर्षिसंघैः ॥ व्यरोचतालं भगवान्यथेंदुर्ग्रहर्क्षतारा
निकरैः परीतः ॥३०॥ प्रशांतमासीनमकुंठमेधसं मुनिं नृपो भागवतोभ्युपेत्य ॥ प्रणम्य मूर्ध्नावहितः कृतांज

रम्यं वल्गु उदरं यस्य दिश एवांबरं यस्य वक्त्रे विकीर्णा यस्य प्रलंबौ बाहू यस्य स्वमरेषु श्रेष्ठेषु देवेषु उत्तमो हरिः
स्तद्वदाभा यस्य ॥२७॥ सदापीव्यं सत्वेनोत्तमं यद्वयो यौवनं तेन या अंगलक्ष्मीः ॥ देहकांतिः तया रुचिरस्मितेन च गू
ढवर्चसमपि प्रत्युत्थिताः तद्दर्शनप्रसह्यसंकेतत्वेनेत्यर्थः ॥२८॥ शिरसैव सपर्यां पूजामाजहार आत्मनिवेदनं कृतवा
न् तेन सहसा तास्तथा प्रत्याय्य ते निवृत्ताः स उपविवेश ॥२९॥ स भगवान्ब्रह्मर्षिसंघादिभिः ॥ संवृतः सन्नलं व्यरो
चत ग्रहाः सूर्याद्याः नक्षत्राण्यश्विन्यादीनि अन्यास्ताराः ॥३०॥ अकुंठा सर्वार्थेषु मेधा यस्य तं प्रणम्य नत्वा सू
नृतां गिरमाह ॥ अहो इति पंचभिः ॥३१॥

॥ ॥ ॥

वे २

केषार

श्रीकृष्णः अयमेव भक्तोज्ञातः २ तस्य तव दर्शनं कथमस्मदादीनां तथापि ३

कृताः २ गयाद्य १

श्री भाग प्रटी ५९

सतां सेव्या जातायतो तिथिरूपेण देहेन तीर्थीकार्या त्वया ॥ ३३ ॥ विष्णोः सान्निध्यात् सुरेतरा इव ॥ ३४ ॥ पांडुसुता-
नां प्रियः अतः तस्य पैतृष्वसेयानां प्रीत्यर्थं तद्गोत्रस्य मे आत्तं स्वीकृतं बांधवं बंधुकृत्यं येन सः ३५
अन्यथा श्रीकृष्णप्रसादं विना अव्यक्तगतेस्तिर्यक्ष्य म्रियमाणानां नितरां कथं स्यात् ॥ वनयिता याचयिता वन-
यिता तमो वनीयान् तस्यात्युदारतया मां याचयितेति प्रवर्तकस्येत्यर्थः ॥ ३६ ॥ सम्यक् सिद्धिं यस्मात्तं कार्यं
कर्तव्यं योग्यं ॥ ३८ ॥ कर्तव्यं त्वावश्यकमिति भेदः विपर्ययमश्रोतव्यादि गृहकदर्शनस्य पुनर्दुर्लभत्वादिदा-

मद्गोत्रस्य तव यं बलन्स्मत्से व्याः तत्र बंधवः ॥ कृपयातिथिरूपेण भवद्भिस्तीर्थकाः कृताः ॥ ३२ ॥ येषां
संस्मरणात्पुंसां सद्यः शुद्ध्यंति वै गृहाः ॥ किं पुनर्दर्शनस्पर्शपादशौचासनादिभिः ॥ ३३ ॥ सान्नि-
ध्यात्ते महायोगिन्पातकानि महांत्यपि ॥ सद्यो नश्यंति वै पुंसां विष्णोरिव सुरेतराः ॥ ३४ ॥ अपि मे भ-
गवान्प्रीतः कृष्णः पांडुसुतप्रियः ॥ पैतृष्वसेयप्रीत्यर्थं तद्गोत्रस्यात्तबांधवः ॥ ३५ ॥ अन्यथा तेऽव्यक्त-
गतेर्दर्शनं नः कथं नृणां ॥ नितरां म्रियमाणानां संसिद्धस्य वनीयसः ॥ ३६ ॥ अतः पृच्छामि संसिद्धिं
योगिनां परमं गुरुं ॥ पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वथा ॥ ३७ ॥ यच्छ्रोतव्यमथो जाप्यं यत्कर्त-
व्यं नृभिः प्रभो ॥ स्मर्तव्यं भजनीयं वा ब्रूहि यद्वा विपर्ययं ॥ ३८ ॥ नूनं भगवतो ब्रह्मन्गृहेषु गृहमे-
धिनां ॥ न लक्ष्यते ह्यवस्थानमपि गोदोहनं क्वचित् ॥ ३९ ॥ [illegible] एवमाभाषितः पृष्टः स राज्ञा
श्लक्ष्णया गिरा ॥ प्रत्यभाषत धर्मज्ञो भगवान्बादरायणिः ॥ ४० ॥ इति श्रीभागवते महापुराणे प्रथ-
मस्कंधे एकोनविंशोऽध्यायः ॥ १९ ॥ समाप्तोयं प्रथमस्कंधः ॥ १ ॥

अतएव सर्वथा म्रियमाणस्य पुरुषस्य यस्मिन्कृते संसिद्धिर्मोक्षलक्षणा सिद्धिर्भवति तां योगिनां गुरुं पृच्छामि ३८ यच्छ्रोतव्यं यज्जाप्यं यत्कर्तव्यं यत्स्मर्तव्यं यद्वा भजनीयं तद्ब्रूहि ॥ २ ॥

प्रायेनाः १

नीं तेऽकथनीयमित्याह नूनमिति ॥ ३८ ॥ गोदोहन[illegible]मात्रकालमपि ॥ ३९ ॥ एवमहो इत्यादिकया श्लक्ष्ण-
या मधुरया गिरा आभाषितः अभिमुखीकृतः पृष्टश्च ॥ ४० ॥ इति श्रीभावार्थदीपिकायां प्रथमस्कंधे एकोन-
विंशोऽध्यायः ॥ १९ ॥ आद्ये धर्मजमाहात्म्यादिमनुः कृत्वा परीक्षिद्रूपं ब्रह्मास्त्रादभिरक्षितं कलिनिग्रहख्यापितं
दृष्ट्वा पुनः अंते यः प्रकटयतः स्वपरमज्ञानोपदेशेन तं श्रीपादावदमेनमामि परमानंदाकृतिं माधवं ॥ १ ॥

भाग ५९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रथमः १ समाप्तः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative